Bill No. 5/07-08

270

2008-0732

शुक्ल यजुर्वेद
माध्यन्दिनीय संहिता
Loose leaves edn.
वेंकटेश्वर प्रेस edn.
मुम्बई. 1944 Vikram era.

Veda.

30

308

शुक्ल यजुर्वेद माध्यन्दिनी संहिता
वेंकटेश्वर प्रेस. 1944 V.E.

अथ शुक्लयजुर्वेदमाध्यंदिनीयसंहिता प्रा०

हेमाद्रि कृत चतुर्वर्ग चिंतामणौ व्रतखंडे विश्वकर्मशास्त्रवाक्यात् वेदस्वरूपाणि.



ऋग्वेदः श्वेतवर्णः स्यात्
द्विभुजो रासभाननः ॥
अक्षमालायुतः सौम्यः
प्रीतश्चाध्ययनोद्यतः ॥ १

अजास्यः पीतवर्णः स्यात्
यजुर्वेदोऽक्षसूत्रधृक् ॥
वामे कुलिशपाणिस्तु
भूतिदो मंगलप्रदः ॥ २ ॥

नीलोत्पलदलाभासः
सामवेदो हयाननः ॥
अक्षमालान्वितो दक्षे
वामे कंबुधरः स्मृतः ॥ ३ ॥

अथर्वणाभिधो वेदो
धवलो मर्कटाननः ॥
अक्षसूत्रं च खट्वांगं
बिभ्राणोऽयं जनप्रियः ॥ ४ ॥

शिक्षा शुभ्राभयकरा
ज्ञानमुद्रान्विता शुभा ॥
अक्षसूत्रा सकुण्डीका
द्विभुजा दण्डपङ्कजा ॥ ५ ॥

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीवेदपुरुषायनमः॥ ॐ इ
षेत्त्वा इषेत्त्वोर्ज्जेत्त्वा वायवस्त्थदेवोवः सविताप्प्रार्प्पयतुश्श्रेष्ठत
मायकर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवा
ऽअयक्ष्म्मामावस्तेनऽईशतमाघशꣳसोद्ध्रुवाऽअस्म्मिन्गोपतौस्यात
बह्वीर्य्यजमानस्यपशून्पाहि १ वसोःपवित्त्रम् वसोःपवित्रमसि
द्यौरसिपृथिव्व्यसिमातरिश्श्वनोघर्म्मोसिविश्श्वधाऽअसि परमेण
धाम्म्नादृꣳहस्वमाह्वार्म्मातेयज्ञपतिर्ह्वार्षीत् २ वसोःपवित्त्रम् व

संहि. सोःपवित्रमसिशतधारंव्वसोःपवित्रमसिसहस्रधारम् देवस्त्वासवि पू.अ.
१ तापुनातुव्वसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ३ साव्विश्वा १
युः साव्विश्वायुः साव्विश्वकर्म्मा साव्विश्वधायाः॥इन्द्रस्यत्त्वा
भागꣳसोमेनातनच्मिव्विष्णोहव्यꣳरक्ष ४ अग्नेव्व्रतपते॥व्व्रतञ्च
रिष्ष्यामितच्छकेयन्तन्मेराध्यताम्॥इदमहमनृतात्सत्यमुपैमि ५ कस्त्वा
॥युनक्तिसत्त्वायुनक्तिकस्मैत्त्वायुनक्तितस्मैत्वायुनक्ति॥कर्म्मणे १
वांव्वेषायवाम् ६ प्रत्युष्टꣳरक्षः प्रत्युष्टꣳरक्षःप्रत्युष्टाऽअरातयोनि

ष्टृप्तर्ठ॰रक्षोनिष्टृप्ताऽअरातयः॥उर्व्वन्तरिक्षमन्न्वेमि ७ धूरसि॥धूर्व्व
धूर्व्वन्तन्धूर्व्वतंय्योस्म्मान्धूर्व्वतितन्धूर्व्वयंवयन्धूर्व्वामः॥देवानामसिवह्नि
तमर्ठ॰सस्नितमम्पप्रितमञ्जुष्टृतमन्देवहूतमम् ८ अह्रुतमसि॥हवि
र्द्धानन्दृर्ठ॰हस्वमाह्वाम्मातेयज्ञपतिर्ह्वार्षीत्॥विष्णुस्त्वाक्क्रमतामुरुवा
तायापहतर्ठ॰रक्षोयच्छन्ताम्पञ्च ९ देवस्यत्वा॥सवितुः प्प्रसवेश्वि-
नोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥अग्ग्नयेजुष्टृङ्गृह्णाम्म्यग्ग्नीषोमा
भ्याञ्जुष्टृङ्गृह्णामि १० भूतायत्वा॥भूतायत्वानारातयेस्वरभिविक्ख्ये

संहि· षन्दृꣳहन्तान्दुर्व्वाः पृथिव्यामुर्व्वन्तरिक्षमन्वेमि पृथिव्यास्त्वानाभौ सादया पू·अ·
२ म्म्यदित्याऽउपस्त्थेग्ग्नेहव्यꣳरक्ष ११ पवित्रेस्त्थः॥ पवित्रेस्थो वैष्णव्यौ स- १
वितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः॥ देवीरापो
ऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुंयज्ञपतिन्दे
वयुवम् १२ युष्म्माऽइन्द्रः। युष्म्माऽइन्द्रोवृणीतवृत्रतूर्य्येयूयमिन्द्रमवृणीद्ध्वं
वृत्रतूर्य्येप्प्रोक्षितास्त्थ॥ अग्ग्नयेत्त्वाजुष्टम्प्रोक्षाम्म्यग्ग्नीषोमाभ्यांत्वाजुष्ट २
म्प्रोक्षामि॥ दैव्यायकर्म्मणेशुंधद्ध्वन्देवयज्ज्यायैयद्वोशुद्धाःपराजग्घ्नुरिदंव

स्त्तच्छुन्धामि १३ शर्म्मासि।शर्म्मास्यवधूतꣳरक्षोवधूताऽअरातयो
दित्यास्त्वगसिप्प्रतित्वादितिर्व्वेत्तु।अद्रिरसिवानस्प्पत्योग्ग्रावासिपृथु
बुध्नःप्प्रतित्वादित्यास्त्वग्ग्वेत्तु १४ अग्ग्नेस्त्तनूः अग्ग्नेस्त्तनूरसिवाचो
विसर्ज्जनन्देववीतयेत्वागृह्णामिबृहद्ग्रावासिवानस्प्पत्त्यः सऽइदन्देवे
भ्योहविः शमीष्वसुशमिशमीष्व॥हविष्कृदेहिहविष्कृदेहि १५ कु
क्कुटोसि।कुक्कुटोसिमधुजिह्वऽइषमूर्ज्जमावदत्वयावयꣳसङ्घातꣳस
ङ्घातञ्जेष्ष्मवर्षवृद्धमसिप्प्रतित्वावर्षवृद्धंवेत्तुपरापूतꣳरक्षःपरापूता

संहि॰ ऽअरातयोपहतᳪरक्षो व्वायुर्व्वो व्विविनक्तु देवो वः सविता हिरण्यपाणिः पू॰अ॰
३ प्प्रतिगृब्भ्णात्वच्छिद्रेण पाणिना १६ धृष्टिरसि। धृष्टिरस्य पाग्ग्नेऽअ १
ग्निमामादञ्जहि निष्क्रव्व्यादᳪसेधा देवयजं व्वह॥ ध्रुवमसि पृथिवीन्दृᳪ
ह ब्रह्मवनि त्वा क्षत्त्रवनि सजातवन्न्युपदधामि ब्भ्रातृव्व्यस्य व्वधाय १७
अग्ग्ने ब्रह्म। गृब्भ्णीष्व धरुणमस्यन्तरिक्षन्दृᳪह ब्रह्मवनि त्त्वा क्षत्त्र
वनि सजातवन्न्युपदधामि ब्भ्रातृव्व्यस्य व्वधाय॥ धर्त्त्रमसि दिवन्दृᳪह ब्र ३
ह्मवनि त्त्वा क्षत्त्रवनि सजातवन्न्युपदधामि ब्भ्रातृव्व्यस्य व्वधाय॥ व्वि

श्वाभ्यस्त्वाशाभ्यः उपदधामिचितस्थोर्द्ध्वचितोभृगूणामङ्गिरसान्तपसा
तप्प्यद्ध्वम् १८ शर्म्मासि। शर्म्मास्यवधूतꣳ रक्षोवधूताः अरातयोदित्या
स्त्वगसिप्प्रतित्वादितिर्व्वेत्तु॥ धिषणासिपर्व्वतीप्प्रतित्वादित्यास्त्वग्वेत्तुदिव
स्कम्भनीरसिधिषणासिपार्व्वतेयीप्प्रतित्वापर्व्वतीव्वेत्तुधान्यमसि १९ धान्य
मसि। धिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा॥ दीर्घा मनुप्प्रसिति
मायुषेधान्देवोवः सविताहिरण्यपाणिः प्प्रतिगृभ्णात्वच्छिद्रेणपाणिना
चक्षुषेत्वामहीनाम्पयोसि २० देवस्यत्वा। सवितुः प्प्रसवेश्विनोर्बाहुभ्या

संहि॰ म्पूष्णोहस्ताभ्याम्।संवपामिसमापऽओषधीभिःसमोषधयोरसेन॥स पू॰अ॰
४ ठं·रेवतीर्ज्जगतीभिःपृच्च्यन्ताᳬसम्मधुमतीर्म्मधुमतीभिःपृच्च्यन्ताम् २१ ज १
नयत्यैत्वा।जनयत्यैत्वासंय्यौमीदमग्नेरिदमग्नीषोमयोरिषेत्वाघर्म्मोसि
विश्वायुरुरुप्प्रथाऽउरुप्प्रथस्वोरुतेयज्ञपतिःप्प्रथतामग्निष्टेत्वचम्माहि
ठंसीद्देवस्त्वासविताश्श्रपयतुवर्षिष्ठेधिनाके २२ माभेर्मासंविक्था
ऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्यप्प्रजाभूयात्त्रितायत्वाद्द्वितायत्वैकता ४
यत्वा २३ देवस्यत्वा।सवितुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥

आददेद्धरकृतन्देवेभ्यऽइन्द्रस्यबाहुरसिदक्षिणःसहस्रभृष्टिःशततेजावा
युरसितिग्मतेजाद्विषतोवधः २४ पृथिविदेवयजनि।पृथिविदेवयजन्न्योष
ध्यास्तेमूलम्माहिंसिषंव्रजङ्गच्छगोष्ठानंवर्षतुतेद्यौर्बधानदेवसवितःपरम
स्याम्पृथिव्याꣳशतेनपाशैर्योस्मान्द्वेष्टियञ्चवयन्द्विष्मस्तमतोमामौक्
२५ अपाररुम्।अपाररुम्पृथिव्यैदेवयजनाद्वध्यासंव्रजङ्गच्छगोष्ठानंवर्षतु
तेद्यौर्बधानदेवसवितःपरमस्याम्पृथिव्याꣳशतेनपाशैर्योस्मान्द्वेष्टिय
ञ्चवयन्द्विष्मस्तमतोमामौक्॥अररोदिवम्मापप्तोद्रप्सस्तेद्याम्मास्कन्व

संहि॰ जङ्गच्छगोष्ठानंव्वर्षतुतेद्यौर्व्वधानदेवसवितःपरमस्याम्पृथिव्याँशतेनपा पू॰अ॰
५ शैर्य्योस्मान्द्वेष्टियञ्चव्वयन्द्विष्मस्तमतोमामौक् २६ गायत्रेणत्वा।गायत्रे १
णत्वाच्छन्दसापरिगृह्णामित्रैष्टुभेनत्वाच्छन्दसापरिगृह्णामिजागतेनत्वा
च्छन्दसापरिगृह्णामि।सुक्ष्माचासिशिवाचासिस्योनाचासिसुषदाचास्यू
र्ज्जस्वतीचासिपयस्वतीच २७ पुराक्रूरस्यविसृपोविरप्शिन्नुदादायपृ
थिवीञ्जीवदानुम्॥ यामैरयँश्चन्द्रमसिस्वधाभिस्तामुधीरासोऽअनुदिश्य ५
यजन्ते॥प्रोक्षणीरासादयद्विषतोवधोसि २८ प्रत्युष्टँरक्षः।प्रत्युष्टं

रक्षः प्प्रत्युष्टाआरातयोनिष्टप्तुꣳरक्षोनिष्टप्ताऽअरातयः॥ अनिशितो
सिसपत्नक्षिद्वाजिनन्त्वाव्वाजेध्यायैसम्मार्ज्मि॥ प्रत्युष्टꣳरक्षःप्प्रत्युष्टा
ऽअरातयोनिष्टप्तꣳरक्षोनिष्टप्ताऽअरातयः॥ अनिशितासिसपत्नक्षिद्वा
जिनीन्त्वाव्वाजेध्यायैसम्मार्ज्मि २९ अदित्यैरास्नासिव्विष्णोर्व्वेष्प्योस्यूर्ज्जे
त्वादब्धेनत्वाचक्षुषावपश्यामि॥ अग्नेर्ज्जिह्वासिसुहूर्देवेभ्योधाम्नेधाम्ने
मेभवयजुषेयजुषे॥३०॥ सवितुस्त्वाप्प्रसवऽउत्पुनाम्यछिद्रेणपवित्रेणसू
र्य्यस्यरश्मिभिः॥ सवितुर्व्वःप्प्रसवऽउत्पुनाम्यछिद्रेणपवित्रेणसूर्य्यस्यर

संहि॰ ६ श्मिभिः तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवय पू॰अ॰
जनमसि ३१ इतिश्रीवाजसनेयसंहितायांप्रथमोध्यायः १ कृष्णोसि। कृ १
ष्णोस्याखरेष्ठोग्नयेत्वाजुष्टम्प्रोक्षामिवेदिरसिबर्हिषेत्वाजुष्टाम्प्रोक्षामिबर्हिर
सिस्रुग्भ्यस्त्वाजुष्टम्प्रोक्षाम्यदित्यैव्युन्दनम् १ अदित्यैव्युन्दनमसिविष्णो
स्तुपोस्यूर्णम्रदसन्त्वास्तृणामिस्वासस्थान्देवेभ्योभुवपतयेस्वाहाभुवनपत
येस्वाहाभूतानाम्पतयेस्वाहा २ गन्धर्वस्त्वा। विश्वावसुः परिदधातुविश्वस्या ६
रिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडईडितः। इन्द्रस्यबाहुरसिदक्षिणोवि-

श्वस्यारिष्ट्यै यजमानस्यपरिधिरस्यग्निरिडऽईडितः मित्रावरुणौत्वोत्तर
तः परिधत्तान्ध्रुवेणधर्म्मणाविश्वस्यारिष्ट्यै यजमानस्यपरिधिरस्यग्निरिडऽ
ईडितः ३ वीतिहोत्रन्त्वा। कवेद्युमन्तꣳ समीधीमहि॥ अग्ने बृहन्तमध्वरे
४ समिदसि। समिदसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै। सवितु
र्ब्बाहूस्थऽऊर्णम्म्रदसन्त्वास्तृणामिस्वासस्थन्देवेभ्यःआत्वावसवोरुद्राऽ
आदित्याः सदन्तु ५ घृताच्यसि। जुहूर्नाम्नासेदम्प्रियेणधाम्नाप्प्रियꣳ सद
आसीदघृताच्यस्युपभृन्नाम्नासेदम्प्रियेणधाम्नाप्प्रियꣳ सदऽआसीदघृ

संहि॰ ताच्च्यसिद्ध्रुवानाम्न्नासेदम्प्रियेणधाम्न्नाप्प्रियꣳ॰सदऽआसीदम्प्रियेणधाम्न्ना पु॰ अ॰
७ प्प्रियꣳ॰सदऽआसीद॥ ध्रुवाऽअसदन्नृतस्ययोनौताविष्ष्णोपाहिपाहियज्ञम्पा २
हियज्ञपतिम्पाहिमांय्यज्ञन्न्यम् ६ अग्ग्नेवाजजित्। अग्ग्नेवाजजिद्वाजन्त्वास
रिष्ष्यन्तंवाजजितꣳ॰सम्मार्ज्मि। नमोदेवेब्भ्यः स्वधापितृब्भ्यः सुयमेमेभूयास्त
मस्कन्नमद्य ७ अस्कन्नमद्य देवेब्भ्यऽआज्ज्यꣳ॰सम्भ्रियासमङ्घ्रिणाविष्ष्णो
मात्वावक्क्रमिषंव्वसुमतीमग्नेतेच्छायामुपस्त्थेषंव्विष्ष्णोस्त्थानमसीतऽइन्द्रो- ७
वीर्य्यमकृणोदूर्द्ध्वोर्द्ध्वऽआस्त्थात् ८ अग्ग्नेर्व्वेः। अग्ग्नेर्व्वेर्होत्त्रंव्वेर्दूत्त्यमवता-

न्त्वान्द्यावापृथिवीऽअवत्वन्द्यावापृथिवीस्विष्टकृद्देवेभ्यऽइन्द्रऽआज्ज्येनहवि
षाभूत्स्वाहासञ्ज्योतिषाज्ज्योतिः ९ मयीदम्। मयीदमिन्द्रऽइन्द्रियन्दधात्व
स्मान्रायोमघवानः सचन्ताम्॥ आस्माकं सन्त्वाशिषः सत्यानः सन्त्वा
शिषऽउपहूतापृथिवीमातोपमाम्पृथिवीमाताह्वयतामग्निराग्नीध्रात्स्वाहा।
१० उपहूतोद्यौः। उपहूतोद्यौष्पितोपमान्द्यौष्पिताह्वयतामग्निराग्नीध्रात्स्वा
हा। देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ प्रतिगृ
ह्णाम्यग्नेस्त्वास्येनप्राश्नामि ११ एतन्ते। देवसवितर्यज्ञम्प्राहुर्बृहस्पतये

सं.हि. ब्रह्मणे। तेनयज्ञमवतेनयज्ञपतिन्तेनमामव १२ मनोजूतिः। मनोजूतिर्ज्जु शु.अ.
८ षतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञᳬ समिमन्दधातु॥ वि २
श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ १३ एषाते। ऽअग्नेसमित्तयावर्द्धस्व
चाचप्प्यायस्व॥ वर्द्धिषीमहिचवयमाचप्प्यासिषीमहि॥ अग्नेवाजजिद्वा
जन्त्वासस्वृवाᳬसंवाजजितᳬ सम्मार्ज्मि १४ अग्नीषोमयोरुज्जितिम्॥ अ
ग्नीषोमयोरुज्जितिमनूज्जेषंवाजस्यमाप्रसवेनप्प्रोहामि॥ अग्नीषोमौत ८
मपनुदतांय्योस्मान्द्वेष्टियञ्चवयन्द्विष्मोवाजस्यैनम्प्रसवेनापोहामि॥ इ

न्द्राग्न्योरुज्जितिमनूज्जेषंवाजस्यमाप्प्रसवेनप्प्रोहामि॥इन्द्राग्नीतमपनुद
तांय्योस्मान्द्वेष्टियञ्चवयन्द्विष्मोवाजस्यैनम्प्रसवेनापोहामि १५ वसुभ्य
स्त्वारुद्रेभ्यस्त्वादित्येभ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्वावृ
ष्ट्यावताम्॥व्यन्तुवयोक्तꣳरिहाणामरुताम्पृषतीर्गच्छवशापृश्निर्भूत्वा
दिवङ्गच्छततोनोवृष्टिमावह॥चक्षुष्पाऽअग्नेसिचक्षुर्म्मेपाहि १६ यम्परिधि
म्।यम्परिधिम्पर्य्यधत्थाऽअग्नेदेवपणिभिर्गुह्यमानः॥तन्तऽएतमनुजो
षम्भराम्येषनेत्त्वदपचेतयाताऽअग्नेःप्रियम्पाथोपीतम् १७ सꣳस्रव

संहि॰ भागास्थेषाबृहन्तःप्रस्तरेष्ठाः परिधेयाश्चदेवाः ॥ इमांवाचमभिविश्वेगृण पू॰ अ॰
९ न्तऽआसद्यास्मिन्बर्हिषिमादयध्वꣳस्वाहावाट् १८ घृताचीस्त्थः । घृताची २
स्त्थोधुर्य्यौपातꣳसुम्नेस्त्थःसुम्नेमाधत्तम् ॥ यज्ञनमश्चतऽउपचयज्ञ
स्यशिवेसन्तिष्ठस्वस्विष्टेमेसन्तिष्ठस्व १९ अग्नेदब्धायो । शीतमपाहिमादि
द्योःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्याऽअविषन्नःपितुङ्कृणुसुषदा
योनौस्वाहावाडग्नयेसंवेशपतयेस्वाहासरस्वत्यैयशोभगिन्यैस्वाहा २० ९
वेदोसि । वेदोसियेनत्वन्देववेददेवेभ्योवेदोभवस्तेनमह्यंवेदोभूयाः ॥

देवागातुविदोगातुंवित्वागातुमित॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावाते
धाः॥२१ सम्बर्हिः। सम्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्यैर्वसुभिःसम्मरुद्भिः॥
समिन्द्रोविश्वेदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा॥२२ कस्त्वा। कस्त्वाविमुञ्च
तिसत्वाविमुञ्चतिकस्मैत्वाविमुञ्चतितस्मैत्वाविमुञ्चति॥ पोषायरक्षसा
म्भागोसि२३ संवर्च्चसा। संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशि
वेन॥ त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम्॥२४ दिविविष्णुः। दि
विविष्णुर्व्यक्रꣳस्तजागतेनछन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयन्द्वि

संहि ष्मोन्तरिक्षेव्विष्णुर्व्यक्रꣳस्तत्रैष्टुभेनच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टिय पू॰अ॰
१० ञ्चवयन्द्विष्मःपृथिव्यांव्विष्णुर्व्यक्रꣳस्तगायत्रेणच्छन्दसाततोनिर्भक्तो २
योस्मान्द्वेष्टियञ्चवयन्द्विष्मोस्मादन्नादस्यैप्रतिष्ठायाऽअगन्मस्वःसञ्ज्यो
तिषाभूम २५ स्वयम्भूरसि।स्वयम्भूरसिश्रेष्ठोरश्मिर्वर्चोदाऽअसिवर्चोमेदे
हि।सूर्यस्यावृतमन्वावर्त्ते २६ अग्नेगृहपते।सुगृहपतिस्त्वयाग्नेहङ्गृहपतिना
भूयासꣳसुगृहपतिस्त्वम्मयाग्नेगृहपतिनाभूयाः।अस्थूरिणौगार्हपत्यानि १०
सन्तुशतꣳहिमाःसूर्यस्यावृतमन्वावर्त्ते २७ अग्नेव्रतपते।व्रतमचारिषन्त

देशकन्तन्नोराधीदमहंस्व्यऽएवास्मिुसोस्मि २८ अग्नयेकव्यवाहनायस्वा
हासोमायपितृमतेस्वाहा। अपहताऽअसुरारक्षाꣳसिवेदिषदः २९ येरूपा
णि। प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति॥ परापुरोनिपुरोयेभर
न्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ३० अत्रपितरः। अत्रपितरोमादयध्वंयथा
भागमावृषायध्वम्॥ अमीमदन्तपितरोयथाभागमावृषायिषत ३१ नमोवःपि
तरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायै
नमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवःपितरःपितरोनमोवोगृहा

संहि॰ न्नेः पितरोदत्तसुतोवः पितरोदेष्मेतन्नः पितरोबासः आधत्त ३२ आधत्त पित पू॰अ॰
११ रोगर्भङ्कुमारम्पुष्करस्रजम्॥ यथेहपुरुषोसत् ३३ ऊर्ज्जम्बहन्तीः। ऊर्जंबहन्ती २
रमृतङ्घृतम्पयः कीलालंपरिस्रुतम्। स्वधास्थतर्प्पयतमेपितॄन् ३४ इतिसंहि
तायांद्वितीयोध्यायः २ समिधाग्निम्। समिधाग्निन्दुवस्यतघृतैर्बोधय-
तातिथिम्॥ आस्मिन्हव्याजुहोतन १ सुसमिद्धायशोचिषे॥ घृतन्तीव्रञ्जुहोत
न॥ अग्नयेजातवेदसे २ तन्त्वा। समिद्भिरङ्गिरोघृतेनवर्द्धयामसि॥ बृहच्छोचा ११
यविष्ठ्य ३ उपत्वा। ग्नेहविष्मतीर्घृताचीर्यन्तुहर्य्यत॥ जुषस्वसमिधोमम ४

भूर्भुवः। भूर्भुवः स्वर्द्यौरिवभूम्नापृथिवीववरिम्णा॥ तस्यास्तेपृथिवीदेवय
जनिपृष्ठेग्निमन्नादमन्नाद्यायादधे ५ आयम्। आयङ्गौः पृश्निरक्रमीदसद
न्मातरम्पुरः॥ पितरञ्चप्रयंत्स्वः ६ अन्तश्चरतिरोचनास्यप्राणादपान-
ती॥ व्यख्यन्महिषोदिवम् ७ त्रिंशद्धामविराजतिवाक्पतङ्गायधीयते॥ प्र
तिवस्तोरहद्युभिः ८ अग्निर्ज्योतिः। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहासू
र्य्योज्ज्योतिर्ज्योतिः सूर्य्यः स्वाहा। अग्निर्वर्च्चोज्ज्योतिर्वर्च्चः स्वाहासूर्य्यो
वर्च्चोज्ज्योतिर्वर्च्चः स्वाहा॥ ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ९ सजूर्दे

संहि॰ वेन। सवित्रासजूरात्र्येन्द्रवत्या॥ जुषाणोऽअग्निर्वेतुस्वाहा॥ सजूर्देवेनसवि अ॰
१२ त्रासजूरुषसेन्द्रवत्या। जुषाणःसूर्य्योवेतुस्वाहा १० उपप्रयन्तोऽअद्ध्वरम् ३
।उपप्रयन्तोऽअद्ध्वरम्मन्त्रंवोचेमाग्नये॥ आरेऽअस्मेचशृण्वते ११ अग्निर्मू
र्द्धा। दिवःककुत्पतिःपृथिव्याऽअयम्॥ अपाꣳरेताꣳसिजिन्वति १२ उभावा
म्। उभावामिन्द्राग्नीऽआहुवद्ध्याऽउभाराधसःसहमादयद्ध्यै॥ उभादातारावि
षाꣳरयीणामुभावाजस्यसातयेहुवेवाम् १३ अयन्ते। अयन्तेयोनिर्ऋत्वियो १२
यतोजातोऽअरोचथाः॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् १४ अय

मिह। प्प्रथमोधायिधातृभिर्होतायजिष्ठो ऽअद्ध्वरेष्वीड्यः॥ यमप्नवा
नोभृगवोविरुरुचुर्व्वनेषुचित्रंविभ्वंविशेविशे १५ अस्यप्रत्नाम्॥अस्य
प्रत्नामनुद्युतꣳशुक्रन्दुदुह्रेऽअह्रयः॥पयःसहस्रसामृषिम् १६ तनूपाऽ
अग्ने।सितन्वम्मेपाह्यायुर्दाऽअग्नेस्यायुर्म्मेदेहिवर्च्चोदाऽअग्नेसिव
र्च्चोमेदेहि॥अग्नेयन्मेतन्वाऽऊनन्तन्मऽआपृण॥१७ इन्धानास्त्वा।शत
ꣳहिमाद्युमन्तꣳसमिधीमहि॥वयस्वन्तोवयस्कृतꣳसहस्वन्तःसहस्कृ
तम्॥अग्नेसपत्नदम्भनमदब्धासोऽअदाभ्यम्।चित्रावसोस्वस्तितेपार

संहि॰ मशीय १८ सन्त्वम्। सन्त्वमग्ग्ने सूर्य्यस्य वर्च्चसागथाः समृषीणाꣳ स्तुतेन॥ पू.अ.
१३ सम्प्रियेण धाम्ना समहमायुषा संवर्च्चसा सम्प्रजया सꣳ रायस्पोषेण ग्मिषी ३
य १९ अन्धस्थ। अन्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोर्ज्जस्थोर्ज्जं
वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय २० रेवतीरमध्वम्। रेवतीरम
ध्वमस्मिन्योनावस्मिन्गोष्ठेस्मिँल्लोकेस्मिन्क्षये॥ इहैव स्त मापगात २१ सꣳ
हितासि विश्वरूप्यूर्ज्जा माविश गौपत्येन॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्द्धिया १३
वयम्॥ नमो भरन्त ऽएमसि २२ राजन्तमध्वराणाम्। राजन्तमध्वराणाङ्गोपाम्

तस्यदीदिविम्॥ ब्बर्द्धमानꣳस्वेदमे २३ सनः।सनः पितेवसूनवेग्नेसूपायनो
भव।सचस्वानः स्वुस्तये २४ अग्नेत्त्वम्। अग्नेत्वन्नोऽअन्तमऽउतत्त्राताशि
वोभवावरूत्थ्यः।वसुरग्निर्व्वसुश्श्रवाऽअच्छानक्षिद्द्युमत्तमꣳरयिन्दाः २५ त
न्त्वा।तन्त्वाशोचिष्ठदीदिवः सुम्म्नायनूनमीमहेसखिभ्यः॥सनोबोधिश्श्रुधी
हवमुरुष्याणोऽअघायतः समस्मात् २६ इडऽएहि।इडएत्यदितऽएहि
काम्म्याऽएत॥मयिवः कामधारणम्भूयात् २७ सोमानꣳस्वरणङ्कृणुहि
ब्ब्रह्मणस्प्पते॥कक्षीवन्तय्यऽऔशिजः २८ योरेवान्। योरेवान्योऽअमी

संहि॰ वह्वावस्कविस्तुष्टिवर्द्धनः ।।सनःसिषक्तु यस्तुरः २९ मानःमानुःशर्द्धसोऽ पू॰अ॰
१४ अररुषोधूर्त्तिःप्प्रणङ्मर्त्यस्य। रक्षाणोब्रह्मणस्पते ३० महिस्त्रीणाम्। म ३
हिस्त्रीणामवोस्तुद्युक्षम्मित्रस्यार्य्यम्णः ।। दुराधर्षंवरुणस्य ३१ नहितेषा
म। नहितेषाममाचननाध्वस्वारणेषु ।।ईशेरिपुरघशंसः ३२ तेहिपुत्रा
सोऽअदितेःप्प्रजीवसेमर्त्याय ।।ज्योतिर्य्यच्छन्त्यजस्रम् ३३ कदाचन।स्तरी
रसिनेन्द्रसश्चसिदाशुषे ।।उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यते ३४ १४
तत्सवितुः। तत्सवितुर्व्वरेण्यंम्भर्गोदेवस्यधीमहि। धियोयोनःप्प्रचोदया

त् ३५ शतम् १०० परितेदूडभोरथोस्माँ२॥ अश्नोतुविश्वतः। येनरक्षसिदा
शुषः ३६ भूर्भुवः। भूर्भुवःस्वः सुप्प्रजाः प्प्रजाभिः स्याᳬसुवीरोवीरैः
सुपोषःपोषैः॥ नर्य्यप्प्रजाम्मेपाहिशᳬस्यपशून्मेपाह्यथर्य्यपितुम्मेपाहि
३७ आगन्म विश्ववेदसमस्मभ्यंवसुवित्तमम्॥ अग्नेसम्म्राडभिद्युम्न
मभिसहऽआयच्छस्व ३८ अयमग्निः। अयमग्निर्गृहपतिर्गार्हपत्यःप्प्रजा
यावसुवित्तमः॥ अग्नेगृहपतेभिद्युम्नमभिसहऽआयच्छस्व ३९ अयमग्निः
।अयमग्निः पुरीष्योरयिमान्पुष्टिवर्द्धनः॥ अग्नेपुरीष्याभिद्युम्नम

संहि भिसहुऽआयच्छस्व ४० गृहामा । बिभीतमावेपद्ध्वमूर्ज्जंबिब्भ्रतुऽएमसि ॥ ऊ पू.अ.
१५ र्ज्जम्बिब्भ्रद्वः सुमनाः सुमेधागृहानैमिमनसामोदमानः ४१ येषामद्ध्ये ३
ति । प्प्रवसन्न्येषुसौमनसोबहुः ॥ गृहानुपह्वयामहेतेनोजानन्तुजानतः
४२ उपहूताऽइह गावुऽउपहूताऽअजावयः ॥ अथोऽअन्नस्यकीलालुऽउप
हूतोगृहेषुनः क्षेमायवः शान्त्यैप्रपद्येशिवंशग्मंशंय्योः शंय्योः ४३ प्र
घासिनोहवामहे । मरुतश्चरिशादसः ॥ करम्भेणसजोषसः ४४ यद्ग्रामे । य १५
द्ग्रामेयदरण्ण्येयत्सभायांय्यदिन्द्रिये ॥ यदेनश्चकृमावयमिदन्तदवयजा

महेस्वाहा ४५ मोषूणः। मोषूणऽइन्द्रात्रपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्न
वयाः॥महश्चिद्यस्यमीढुषोयव्याहविष्मतोमरुतोवन्दतेगीः ४६ अक्र
न्कर्म। अक्रन्कर्मकर्मकृतःसहवाचामयोभुवा॥देवेभ्यःकर्मकृत्वा
स्तम्प्रेतसचाभुवः ४७ अवभृथनिचुम्पुण। निचेरुरसिनिचुम्पुणः॥अव
देवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ४८
पूर्णादर्वि। पूर्णादर्विपरापतसुपूर्णापुनरापत॥वस्नेवविक्रीणावहाऽ
इषमूर्ज्जंशतक्रतो ४९ देहिमे। देहिमेददामितेनिमेधेहिनितेदधे॥नि

संहि॰ हारञ्चहरासिमेनिहारन्निहराणितेस्वाहा ५० अक्षन्नमीमदन्त।अक्षन्नमीम शु॰ अ॰
१६ दन्तह्यवप्रियाऽअधूषत॥अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विं ३
न्द्रतेहरी ५१ सुसन्दृशन्त्वा।सुसन्दृशन्त्वावयम्मघवन्वन्दिषीमहि॥प्रनूनम्पू
र्णवन्धुरस्तुतोयासिवशाँ२॥ऽअनुयोजान्विन्द्रतेहरी ५२ मनोन्वा।मनोन्वाह्वा
महेनाराशꣳसेनस्तोमेन।पितॄणाञ्चमन्मभिः ५३ आनः।आनऽएतुम
नःपुनःक्रत्वेदक्षायजीवसे॥ज्योक्चसूर्य्यन्दृशे ५४ पुनर्नः।पुनर्नःपित १६
रोमनोददातुदैव्योजनः॥जीवंव्रातꣳसचेमहि ५५ वयꣳसोमव्रतेतवम

नेस्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेमहि ५६ एषते। रुद्रभागःसहस्वस्रा
म्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ५७ अवरुद्रम्। अव
रुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानः श्श्रेयसस्क
रद्यथानोव्यवसाययात् ५८ भेषजमसि। भेषजङ्गवेऽश्वायपुरुषायभेषज
म् ॥ सुखम्मेषायमेष्ष्यै ५९ त्र्यंम्बकंय्यजामहे। सुगन्धिम्पुष्टिवर्द्धनम् ॥ उ
र्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकंय्यजामहेसुगन्धि
म्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ६० एतत्ते। रुद्राव

सन्तेनेपुरोमूजेवुतोतीहि॥ अवेततधन्वापिनाकावसुःकृत्तिवासाऽअहिं
ठसन्नःशिवोतीहि ६१ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम्॥यद्देवेषु
त्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ६२ शिवोनामे।शिवोनामासिस्वधितिस्ते
पितानमस्तेऽअस्तुमामाहिंठसीः॥निर्वर्त्तयाम्यायुषेन्नाद्यायप्रजननाय
रायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ६३॥१०॥ इतिसंहितायांतृतीयो-
ध्यायः३ एदम्। एदमगन्मदेवयजनम्पृथिव्यायत्रदेवासोऽअजुषन्त १७
विश्वे॥ऋक्सामाभ्याꣳसन्तरन्तोयजुर्भीरायस्पोषेणसमिषामदेम॥

इमाऽआपः शमुमेसन्तुदेवीरोषधेत्रायस्वस्वधितेमैनꣳहिꣳसीः १ आपोऽ
अस्मान्।आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः पुनन्तु ॥ वि-
श्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यः शुचिरापूतऽएमि ॥ दीक्षातपसो
स्तनूरसितान्त्वाशिवाꣳशग्माम्परीदधेभद्रंवर्णम्पुष्यन् २ महीनाम्पयः
।महीनाम्पयोसिवर्च्चोदाऽअसिवर्च्चोमेदेहि ॥ वृत्रस्यासिकनीनकश्चक्षुर्दा
ऽअसिचक्षुर्मेदेहि ॥ ३ चित्पतिर्म्मा। चित्पतिर्म्मापुनातुवाक्पतिर्म्मापुनातुदे
वोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्रप

संहि॰ तेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ४ आवः। आवोदेवासऽईमहेवामम्प्र पू॰अ॰
१८ यत्यध्वरे॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ५ स्वाहायज्ञम्। स्वाहा ४
यज्ञंमनसः स्वाहोरोरन्तरिक्षात्स्वाहाद्यावापृथिवीभ्याꣳ स्वाहावातादारभे
स्वाहा ६ आकूत्यैप्रयुजे। आकूत्यैप्रयुजेऽग्नयेस्वाहामेधायैमनसेऽग्नये
स्वाहादीक्षायैतपसेऽग्नयेस्वाहासरस्वत्यैपूष्णेऽग्नयेस्वाहा॥ आपोदेवीर्बृ
हतीर्विश्वशम्भुवोद्यावापृथिवीऽउरोऽअन्तरिक्ष॥ बृहस्पतयेहविषाविधेम १८
स्वाहा ७ विश्वोदेवस्य। विश्वोदेवस्यनेतुर्मर्त्तोवुरीतसख्यम्॥ विश्वोराय

ऽइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा ॥८॥ ऋक्सामयोःशिल्पे। ऋक्साम
योःशिल्पेस्थस्तेवामारभेतेमापातमास्ययज्ञस्योदृचः ॥ शर्म्मासिशर्म्म
मेयच्छनमस्तेऽअस्तुमामाहिꣳसीः ॥९॥ ऊर्गसि। ऊर्गस्याङ्गिरस्यूर्णम्रदा
ऽऊर्जंमयिधेहि ॥ सोमस्यनीविरसिविष्णोःशर्म्मासिशर्म्मयजमान
स्येन्द्रस्ययोनिरसिसुसस्याःकृषीस्कृधि। उच्छ्रयस्ववनस्पतऽऊर्ध्वोमा
पाह्यꣳहसऽआस्ययज्ञस्योदृचः ॥१०॥ व्रतङ्कृणुत। व्रतङ्कृणुताग्निर्ब्रह्मा
ग्निर्यज्ञोवनस्पतिर्यज्ञियः ॥ दैवीन्धियम्मनामहेसुमृडीकामभिष्टये

संहि व्वर्च्चोधांय्यज्ञवाहसꣳ सुतीर्थानो ऽअसद्वशे ॥ येदेवामनोजातामनोयुजोद पू.अ.
१९ क्षक्रतवस्तेनोवन्तुतेनः पान्तुतेब्भ्यः स्वाहा ११ श्वात्राः पीताः । श्वात्राः पीता ४
भवतयूयमापो ऽअस्माकमन्तरुदरेसुशेवाः ॥ ता ऽअस्मभ्यमयक्ष्मा
ऽअनमीवा ऽअनागसः स्वदन्तुदेवीरमृता ऽऋतावृधः १२ इयन्ते । यज्ञिया
तनूरपोमुञ्चामिनप्रजाम् ॥ अꣳहोमुचः स्वाहाकृताः पृथिवीमाविश
तपृथिव्यासम्भव १३ अग्नेत्वम् । अग्नेत्वꣳ सुजागृहिव्वयꣳ सुमन्दिषीम १९
हि ॥ रक्षाणो ऽअप्रयुच्छन्प्रबुधेनः पुनस्कृधि १४ पुनर्मनः । पुनर्मनः

पुनरायुर्म्मऽआगन्पुनः प्प्राणः पुनरात्मा मऽआगन्पुनश्चक्षुः पुनः श्श्रो
त्रम्मऽआगन्॥ वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्नः पातुदुरितादवद्या
त् १५ त्वमग्ने। व्रतपाऽअसिदेवऽआमर्त्त्येष्वा॥ त्वंयज्ञेष्वीड्यः॥ रास्वे
यत्सोमाभूयोभरदेवोनः सवितावसोर्दातावस्वदात् १६ एषातेशुक्रतनूरे
तद्वर्च्चस्तयासम्भवभ्राजङ्गच्छ॥ जूरसिधृतामनसाजुष्टाविष्ण्णवे १७ तस्या
स्ते। सत्यसवसः प्प्रसवे तन्न्वोयन्त्रमशीयस्वाहा॥ शुक्रमसिचन्द्रमस्यमृत
मसिवैश्वदेवमसि १८ चिदसि। मनासिधीरसिदक्षिणासिक्षत्रियासियज्ञ

सं॰हि॰ ज्ञियास्यदितिरस्युभयतःशीर्ष्णी॥ सानःसुप्राचीसुप्रतीच्येधिमित्रस्त्वा पू॰अ॰
२० पदिबध्नीतांपूषाध्वनस्पात्विन्द्रायाध्यक्षाय १९ अनुत्वा।मातामन्यताम ४
नुपितानुभ्रातासगर्भ्योनुसखासयूथ्यः॥ सादेविदेवमच्छेहीन्द्रायसोम
ꣳरुद्रस्त्वावर्त्तयतुस्वस्तिसोमसखापुनरेहि २० वस्व्यसि। वस्व्यस्यदिति
रस्यादित्यासिरुद्रासिचन्द्रासि॥ बृहस्पतिष्ट्वासुम्नेरम्णातुरुद्रोवसुभि
राचके २१ अदित्यास्त्वा।मूर्द्धन्नाजिघर्मिदेवयजनेपृथिव्याऽइडायास्पद २०
मसिघृतवत्स्वाहा अस्मेरमस्वास्मेतेबन्धुस्त्वेरायोमेरायोमावयꣳरायस्पो

षेणुद्वियौष्मुतोतुरायः २२ समख्ये । देव्याधियासन्दक्षिणयोरुचक्षसा ॥ मा
मुऽ आयुः प्रमोषीर्मोऽ अहन्तववीरंविदेयुतवदेविसन्दृशि २३ एषते । गा
यत्त्रोभागऽ इतिमेसोमायब्रूतादेषतेत्त्रैष्टुभोभागऽ इतिमेसोमायब्रूतादे
षतेजागतोभागऽ इतिमेसोमायब्रूताच्छन्दोनामानाꣳ साम्राज्यङ्गच्छेति
मेसोमायब्रूतादास्माकोसिशुक्रस्तेग्रह्योविचितस्त्वाविचिन्वन्तु २४
अभित्यम् । अभित्यन्देवꣳसवितारमोण्योः कविक्रतुमर्चामिसत्यसव
ꣳरत्नधामभिप्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामतिर्भाऽ अदिद्युतत्सवीमनि

 हिरण्ययपाणिरमिमीतसुक्रतुः कृपास्वः ॥ प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणन्तुप्र
 जास्त्वमनुप्राणिहि २५ शुक्रन्त्वा। शुक्रेण क्रीणामिचन्द्रञ्चन्द्रेणामृतममृते
न ॥ सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना
क्रीयसे सहस्रपोषम्पुषेयम् २६ मित्रो नः। मित्रो न ऽ एहि सुमित्रधः ऽ इन्द्रस्यो
रुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम् ॥ स्वान भ्राजाङ्घारे बम्भारे
हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वम्मा वो दभन् २७ परिमा
ऽग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज उदायुषा स्वायुषोदस्थाममृताँ२ ॥ ८

अनु २८ प्रतिपन्थाम् । प्रतिपन्थामपद्महिस्वस्तिगामनेहसम् ॥ येनविश्वाः प
रिद्विषोवृणक्तिविन्दतेवसु २९ अदित्यास्त्वक् । अदित्यास्त्वगस्यदित्यैसदऽ
आसीद ॥ अस्तभ्नाद्द्यांवृषभोऽअन्तरिक्षममिमीतवरिमाणम्पृथिव्याः ॥ आ
सीदद्विश्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि ३० वनेषुवि । वनेषुव्यन्त
रिक्षन्ततानवाजमर्वत्सुपयऽउस्रियासु ॥ हृत्सुक्रतुंवरुणोविक्ष्वग्निन्दि
विसूर्यमदधात्सोममद्रौ ३१ सूर्यस्यचक्षुः । सूर्यस्यचक्षुरारोहाग्नेरक्ष्णः
कनीनकम् ॥ यत्रैतशेभिरीयसेभ्राजमानोविपश्चिता ३२ उस्रावेतन्धूर्षाहौयु

संहि· ज्ज्येथामनुश्रूऽ अवीरहणौब्रह्मचोदनौ॥ स्वस्तियजमानस्यगृहान्गाछतम् ३३ पू·अ·
२२ भद्रोमे।सिप्रच्यवस्वभुवस्पतेविश्वान्यभिधामानि॥ मात्वापरिपरिणोविद ४
न्मात्वापरिपन्थिनोविदन्मात्वावृकाऽअघायवोविदन्॥ श्येनोभूत्वापरापतय
जमानस्यगृहान्गाछतन्नौसँस्कृतम् ३४ नमोमित्रस्य। नमोमित्रस्यवरुणस्यच
क्षसेमहोदेवायतदृतँसपर्य्यत॥ दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसू
र्य्यायशँसत ३५ वरुणस्योत्तम्भनम्। वरुणस्योत्तम्भनमसिवरुणस्यस्क- २२
म्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्य

ऽअस्तुसदनमासीद ३६ याते। यातेधामानिहविषायजन्तितातेविश्वापरि
भूरस्तुयज्ञम्॥ गयस्फानः प्रतरणः सुवीरोऽवीरहाप्रचरासोमदुर्य्यान् १०॥
३७ इतिसंहितापाठेचतुर्थोध्यायः ४॥१० अग्नेस्तनूः। अग्नेस्तनूरसिवि
ष्णवेत्वासोमस्यतनूरसिविष्णवेत्वातिथेरातिथ्यमसिविष्णवेत्वा
श्येनायत्वासोमभृतेविष्णवेत्वाग्नयेत्वारायस्पोषदेविष्णवेत्वा १
अग्नेर्ज्जनित्रम्। अग्नेर्ज्जनित्रमसिवृषणौस्थऽउर्वश्यस्यायुरसिपु
रूरवाऽअसि॥ गायत्रेणत्वाछन्दसामन्थामित्रैष्टुभेनत्वाछन्दसामन्था

 मि २ भवेतन्नः । भवेतन्नः समनसौ सचेतसावरेपसौ ॥ मा यज्ञꣳ हिꣳसिष्टं
 मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ३ अग्नावग्निः अग्नावग्नि
श्चरति प्रविष्टऽऋषीणां पुत्रोऽअभिशस्तिपावा ॥ स नः स्योनः सुयजा य
जेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ४ आपतये त्वा । आपतये त्वा परि
पतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय ॥ अनाधृष्टमस्यनाधृष्य
न्देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमञ्जसा सत्यमुपगेष
ꣳ स्विते मा धाः ५ अग्ने व्रतपाः ॥ अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियꣳ

सामयियोममतनूरेषासात्वयि॥सहनौव्रतपतेव्रतान्यनुमेदीक्षान्दीक्षाप
तिर्म्मन्न्यतामनुतपस्तपस्पतिः ६ अꣳशुरꣳशुष्टे। अꣳशुरꣳशुष्टेदेवसो
माप्प्यायतामिन्द्रायैकधनविदे॥आतुब्भ्यमिन्द्रः प्प्यायतामात्त्वमिन्द्राय
प्प्यायस्व॥आप्प्याययास्म्मान्त्सखीन्त्सन्न्यामेधयास्वस्तितेदेवसोमसु
त्यामशीय॥एष्टारायःप्प्रेषेभगाय ऽऋतमृतवादिब्भ्योनमोद्यावापृथिवी
ब्भ्याम् ७ याते। याते ऽअग्नेयःशयातनूर्वर्षिष्ठागह्वरेष्ठा॥उग्ग्रंवचो ऽअ
पावधीत्त्वेषंवचो ऽअपावधीत्स्वाहा॥याते ऽअग्नेरजःशयातनूर्वर्षिष्ठा

संहि॰ गह्वरेष्ठा ॥ उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वाहा ॥ याते ऽअग्नेह पू॰अ॰
२४ रिशयातनूर्वर्षिष्ठागह्वरेष्ठा ॥ उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वा ५
हा ॰ तप्तायनीमे । तप्तायनीमेसिवित्तायनीमेस्यवतान्मानाथितादवता
न्माव्यथितात् ॥ विदेदग्निर्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहियोऽस्यां
पृथिव्यामसियत्तेनाधृष्टन्नामयज्ञियन्तेनत्वादधेविदेदग्निर्नभोनामाग्ने
ऽअङ्गिरऽआयुनानाम्नेहियोद्वितीयस्यांपृथिव्यामसियत्तेनाधृष्टन्नाम २५
यज्ञियन्तेनत्वादधेविदेदग्निर्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहिय

स्तृतीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वादधे॥ अनु
त्वा देववीतये ९ सिꣳह्यसि। सपत्नसाही देवेभ्यः कल्पस्व सिꣳ
ह्यसि सपत्नसाही देवेभ्यः शुन्धस्व सिꣳह्यसि सपत्नसाही देवे
भ्यः शुम्भस्व १० इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः
पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यै
रुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा यज्ञान्निः सृजामि ११ सिꣳह्य
सि। सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा सिꣳह्यसि ब्र

ह्मुद्वनिः सन्नवनिः स्वाहा सिꣳहीरसि सुप्रजावनी रायस्पोषवनिः स्वाहा
सिꣳहीरस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा १२ ध्रुवोऽसि। पृथि
वीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेः पुरीष
मसि १३ युञ्जते मनः। युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो
विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः
स्वाहा १४ इदं विष्णुः। इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य २५
पाꣳसुरे स्वाहा १५ इरावती धेनुमती। इरावती धेनुमती हि भूतꣳ सूयवसिनी

मनवेदशस्या ॥ व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः
स्वाहा १६ देवश्रुतौदेवेषु। देवश्रुतौदेवेष्वाघोषतम्प्राचीप्रेतमध्वरङ्कल्प
यन्तीऽऊर्ध्वंयज्ञन्नयतम्माजिह्वरतम्। स्वङ्गोष्ठमावदतन्देवीदुर्य्येऽआ
युर्म्मानिर्व्वादिष्टम्प्रजाम्मानिर्व्वादिष्टमत्ररमेथांवर्ष्मन्पृथिव्याः १७ वि
ष्णोर्नुकंवीर्य्याणिप्रवोचंयःपार्थिवानिविममेरजाꣳसि ॥ योऽअ
स्कभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णवेत्वा १८ दि
वोवा। विष्णऽउतवापृथिव्यामहोवाविष्णऽउरोरन्तरिक्षात्। उभाहि

सहि॰ हस्तावसुनापृणस्वाप्रयच्छ दक्षिणादोतसव्याद्विष्णवेत्वा १९ प्रतत्। पू॰अ॰
२६ प्रतद्विष्णुस्तवते वीर्य्येण मृगोनभीमः कुचरोगिरिष्ठाः। यस्योरुषुत्रिषु ५
विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा २० विष्णो रराटम्। विष्णोरराट
मसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि॥ वैष्णवमसि
विष्णवेत्वा २१ देवस्यत्वा। सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ता
भ्याम्॥ आददेनार्य्यसीदमहꣳ रक्षसाङ्ग्रीवा अपिकृन्तामि बृहन्नसि २६
बृहद्रवा बृहतीमिन्द्राय वाचंवद २२ रक्षोहणंवलगहनम्। रक्षोहणंवलग

हनंवैष्णवीमिदमहन्तंवलगमुत्किरामियम्मेनिष्ट्योयममात्योनिचखानेदम
हन्तंवलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्तंवलगमुत्कि
रामियम्मेसबन्धुर्यमसबन्धुर्निचखानेदमहन्तंवलगमुत्किरामियम्मेसजा
तोयमसजातोनिचखानोत्कृत्याङ्किरामि २३ स्वराडसि। सपत्नहासत्रराड
स्यभिमातिहाजनराडसिरक्षोहासर्वराडस्यमित्रहा २४ रक्षोहणोवः। र
क्षोहणोवोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोवन
यामिवैष्णवान्रक्षोहणोवोवलगहनोवस्तृणामिवैष्णवान्रक्षोहणौवांव

 लगुहनाऽउपदधामिवैष्णवीरक्षोहणौवांवलगुहनौपर्य्यूहामिवैष्णवीवैं
 ष्णवमसिवैष्णवास्थ २५ देवस्यत्वा। सवितुःप्प्रसवेश्श्विनोर्ब्बाहुभ्याम्पू
ष्णोहस्ताभ्याम्॥ आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि॥
यवोसियवयास्मद्द्वेषोयवयारातीर्द्दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुन्ध
न्ताँल्लोकाः पितृषदनाः पितृषदनमसि २६ उद्दिवम्।उद्दिवꣳस्तभानान्तरि
क्षम्पृणदृꣳहस्वपृथिव्यान्द्युतानस्त्वामारुतोमिनोतुमित्रावरुणौ ध्रुवेण
धर्म्मणा॥ब्रह्मवनित्वाक्षत्रवनिरायस्पोषवनिपर्य्यूहामि॥ब्रह्मदृꣳहक्ष

त्रन्हदृंह॰ ह्मायुर्दृंह॰ ह प्प्रजान्दृंह॰ ह २७ ध्रुवासि। ध्रुवोयंय्यजमानोस्मिन्नायत
नेप्प्रजयापुशुभिर्ब्भूयात्। घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यछदिरसिवि
श्श्वजनस्यछाया २८ परित्वा। गिर्व्वणोगिरऽइमाभवन्तुविश्श्वतः॥ वृद्धायुम
नुवृद्धयोजुष्टाभवन्तुजुष्टयः २९ इन्द्रस्यस्यूः॥ इन्द्रस्यस्यूरसीन्द्रस्यध्रुवोसि
॥ ऐन्द्रमसिवैश्श्वदेवमसि ३० विभूरसि। प्प्रवाहणोवन्हिरसिहव्यवाहनः
श्वात्त्रोसिप्प्रचेतास्तुथोसिविश्श्ववेदाऽउशिगसि ३१ उशिगसि। कविरङ्घा
रिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः सम्म्राडसिकृशानुः

संहि· परिषद्योसिपवमानोनभोसिप्रतक्कामृष्टोसिहव्यसूदनऽऋतधामासिस्वर्ज्यो शु·अ·
२८ तिः समुद्रोसि ३२ समुद्रोसि। विश्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योवाग ५
स्यैन्द्रमसिसदोस्यृतस्यद्वारौमामासन्ताप्तमध्वनामध्वपतेप्रमातिरस्वस्तिमे
स्मिन्पथिदेवयानेभूयान्मित्रस्यमा ३३ मित्रस्यमा। चक्षुषेक्षन्तमग्नयः
सगराः सगरास्थसगरेणनाम्नारौद्रेणानीकेनपातमाग्नयः पिपृतमाग्न
योगोपायतनमानमोवोस्तुमामाहिंसीष्ट ३४ ज्योतिरसि। विश्वरूपंवि- २८
श्वेषान्देवानांसमित्॥ त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउ

रुयन्तासिवरूथꣳस्वाहा॥जुषाणोऽअप्तुराज्यस्यवेतुस्वाहा ३५ शतम् २००
अग्नेनय।सुपथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान्।युयोध्यस्म
ज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंविधेम ३६ अयन्नः अयन्नोऽअ
ग्निर्वरिवस्कृणोत्वयम्मृधः पुरऽएतुप्रभिन्दन्॥अयंवाजाञ्जयतुवाजसा
तावयꣳशत्रूञ्जयतुजर्हृषाणःस्वाहा ३७ उरुविष्णो।उरुविष्णोविक्रम
स्वोरुक्षयायनस्कृधि।घृतङ्घृतयोनेपिबप्रप्रयज्ञपतिन्तिरस्वाहा ३८ देवस
वितः।देवसवितरेषतेसोमस्तꣳरक्षस्वमात्वादभन्।एतत्वन्देवसोमदेवोदे

संहि वा ३ँ॥ उपांगा ऽ इदमहम्मनुष्यान्सहरायस्पोषेणस्वाहानिर्वरुणस्यपाशो पू.अ.
२९ न्मुच्ये ३९ अग्नेव्रतपाः। अग्नेव्रतपास्त्वेव्रतपायात्तवतनूर्म्म्युभ्यभूदेषा ५
सात्वयियोममतनूस्त्वय्यभूदियं ४०· सामयि॥ यथायथन्नौव्रतपतेव्रता
न्यनुमेदीक्षान्दीक्षापतिरमं ७ स्तानुतपस्तपस्पतिः ४१ उरुविष्णो। उरु
विष्णोविक्रमस्वोरुक्षयायनस्कृधि। घृतङ्घृतयोनेपिबप्रप्रयज्ञपतिं
तिरस्वाहा ४१ अत्यन्न्यान्। अत्यन्न्या ३ँ॥ ऽ अगान्नान्न्या ३ँ॥ ऽ उपांगामु २९
र्व्वात्त्वापरेभ्योविदम्परोवरेभ्यः॥ तन्त्वाजुषामहेदेववनस्पतेदेवयज्ज्या

यैदेवास्त्वादेवयुज्यायैजुषन्ताविष्णवेत्वा॥ ओषधेत्रायस्वस्वधितेमैनर्ठ॰
हिर्ठ॰सीः ४२ द्यामा। द्यांमालेखीरन्तरिक्षम्माहिर्ठ॰सीः पृथिव्यासम्भव॥
अयर्ठ॰हित्वास्वधितिस्तेतिजानः प्रणिनायमहतेसौभगाय॥ अतस्त्वंदे
ववनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयर्ठ॰रुहेम ४३॥१०॥ इ
तिसंहितायांपंचमोध्यायः ५ देवस्यत्वा।सवितुःप्रसवेश्विनोर्बा
हुभ्याम्पूष्णोहस्ताभ्याम्॥ आददेनार्य्यसीदमहर्ठ॰रक्षसाङ्ग्रीवाऽअ
पिकृन्तामि।यवोसियवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरिक्षायत्वापृ

संहि॰ थिव्यैत्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि १ अग्रेणीरसि।स्वा पू॰ अ॰
३० वेश ऽउन्नेतॄणामेतस्यवित्तादधित्वास्थास्यतिदेवस्त्वासवितामद्ध्वानक्तु ५
सुपिप्पलाभ्यस्त्वौषधीभ्यः॥ द्यामग्रेणास्पृक्ष ऽआन्तरिक्षम्मध्येनाप्राः
पृथिवीमुपरेणादृꣳहीः २ याते।यातेधामान्युश्मसिगमध्यैयत्रगावोभू
रिशृङ्गा ऽअयासः अत्राहतदुरुगायस्यविष्णोः परमम्पदमवभारिभूरि
।ब्रह्मवनित्वाक्षत्रवनिरायस्पोषवनिपर्यूहामि ॥ ब्रह्मदृꣳह क्षत्रन्दृꣳह ३०
आयुर्दृꣳह प्रजान्दृꣳह ३ विष्णोः कर्माणि। पश्यतयतोव्रतानिपस्पशे

॥इन्द्रस्य युज्यः सखा ४ तद्विष्णोः। परमम्पदꣳ सदा पश्यन्ति सूरयः। दिवीव च
क्षुराततम् ५ परिवीरसि। परिवीरसि परि त्वा दैवीर्विशो व्ययन्ताम्परीमं यज
मानꣳ रायो मनुष्याणाम्। दिवः सूनुरस्येष ते पृथिव्याँल्लोक ऽआरण्यस्ते
पशुः ६ उपावीरसि। उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमान्
॥देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ७ रेवती रमध्वम्। रेवती रमध्वम्बृहस्प
ते धारया वसूनि ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः
८ देवस्य त्वा। सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। अग्नी

सं·हि षोमाभ्याञ्जुष्टन्नियुनज्मि॥ अन्द्भ्यस्त्वौषधीभ्योनुत्वामातामन्न्यतामनु पू·अ·
३१ पितानुभ्भ्रातासगर्भ्योनुसखासयूत्थ्यः। अग्नीषोमाभ्यान्त्वाजुष्टम्प्रोक्षा ६
मि ९ अपाम्पेरुः। अपाम्पेरुरस्यापोदेवीः स्वदन्तुस्वात्तञ्चित्सद्देवहविः॥
सन्तेप्प्राणोव्वातेनगच्छताꣳ समङ्गानियजत्रैः संय्यज्ञपतिराशिषा १० घृते
नाक्तौ। पशूँस्त्रायेथाꣳ रेवतियजमानेप्प्रियन्धाऽआविश॥ उरोरन्तरिक्षा
त्सजूर्देवेनव्वातेनास्यहविषस्त्मनायजसमस्यतन्न्वाभव। व्वर्षोव्वर्षीयसि ३१
यज्ञेयज्ञपतिन्धाः स्वाहादेवेभ्योदेवेभ्यः स्वाहा ११ माहिर्भूः। माहिर्भूर्म्मा

पृदाकुर्न्नमस्त ऽ आतानानर्व्वा प्प्रेहि॥ घृतस्य कुल्या ऽ उप ऽ ऋतस्य पथ्या ऽ
अनु १२ देवीरापः। देवीरापः शुद्धा व्वोढ्ढँ सुपरिविष्टा देवेषु सुपरिविष्टा व्वु
यम्परिवेष्टारो भूयास्म १३ व्वाचन्ते। व्वाचन्ते शुन्धामि प्राणन्ते शुन्धामि च
क्षुस्ते शुन्धामि श्रोत्रन्ते शुन्धामि नाभिन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शु
न्धामि चरित्राँस्ते शुन्धामि १४ मनस्ते। मनस्त ऽ आप्प्यायतां व्वाक्त ऽ आ-
प्प्यायताम्प्राणस्त ऽ आप्प्यायताञ्चक्षुस्त ऽ आप्प्यायताँ श्रोत्रन्त ऽ आ
प्प्यायताम्। यत्ते क्रूरं यदास्थितन्तत्त ऽ आप्प्यायतान्निष्ट्यायतान्तत्ते शुद्ध्य

तुशमहोभ्य्यः॥ ऊषधेत्त्रायस्वस्वधितेमैनꣳहिꣳसीः १५ रक्षसाम्भागश्रे
रक्षसाम्भागोसिनिरस्तꣳरक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षो
वबाधाऽइदमहꣳरक्षोधमन्तमोनयामि॥ घृतेनद्यावापृथिवीप्रोर्णुवाथां
द्यायोवेरस्तोकानामग्निराज्ज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्द्ध्वनभसम्मारुत
ङ्गछतम् १६ इदमापः। इदमापः प्रवहतावद्यञ्चमलंचयत्॥ यच्चाभिदुद्रो
हानृतंयच्चशेपेऽअभीरुणम्॥ आपोमातस्मादेनसः पवमानश्चमुञ्चतु
१७ सन्ते। सन्तेमनोमनसासम्प्राणः प्राणेनगछताम्॥ रेडस्यग्निष्ट्वाश्री

णास्त्वापस्त्वासमरिणन्वातस्यत्वाध्राज्यैपूष्णोरꣳह्योऽऊष्मणोव्यथि
षत्प्रयुतन्द्वेषः १८ घृतङ्घृतपावानः। घृतङ्घृतपावानःपिबतवसांवसापावा-
नःपिबतान्तरिक्षस्यहविरसिस्वाहा॥ दिशःप्रदिशऽआदिशोविदिशऽउद्दि
शोदिग्भ्यःस्वाहा १९ ऐन्द्रःप्राणः। ऐन्द्रःप्राणोऽअङ्गेऽअङ्गेनिदीध्यदैन्द्र
ऽउदानोऽअङ्गेऽअङ्गेनिधीतः। देवत्वष्टर्भूरितेसꣳसमेतुसलक्ष्मायद्विषु
रूपम्भवाति। देवत्रायन्तमवसेसखायोनुत्वामातापितरोमदन्तु २० समु
द्रङ्गच्छ। समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्गच्छस्वाहामित्रा

वरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहा छन्दाꣳसिगच्छस्वाहा द्यावापृथिवीगच्छ
स्वाहा यज्ञङ्गच्छस्वाहा सोमङ्गच्छस्वाहा दिव्यन्नभोगच्छस्वाहाग्निंवैश्वानरङ्गच्छ
स्वाहा मनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवीम्भस्मनापृण
स्वाहा २१ माप२। मापोमौषधीर्हिꣳसीर्धाम्नोधाम्नोराजँस्ततोवरुणनोमु
ञ्च॥यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च॥सुमित्रियान
ऽआपऽओषधयः सन्तुदुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयन्द्विष्मः ३३
२२ हविष्मतीरिमा२।हविष्मतीरिमाऽआपोहविष्माँ२ऽआविवासति।हवि

ष्मान्देवोऽअंहुरोहुविष्माँ २॥ऽअस्तुसूर्य्यः २३ अग्नेर्व्वः। अग्नेर्व्वोपन्न
गृहस्युसदसिसादयामिन्द्राग्न्योर्भागधेयीस्थमित्रावरुणयोर्भागधेयी
स्थविश्वेषान्देवानाम्भागधेयीस्थ॥ अमूर्य्याऽउपसूर्य्येयाभिर्व्वासूर्य्यः
सह॥तानोहिन्वन्त्वध्वरम् २४ हृदेत्वा। हृदेत्वामनसेत्वादिवेत्वासूर्य्याय
त्वा॥ऊर्ध्वमिममध्वरन्दिविदेवेषुहोत्रायच्छ २५ सोमराजन्। सोमराजन्वि
श्वास्त्वम्प्रजाऽउपावरोहविश्वास्त्वाम्प्रजाऽउपावरोहन्तु॥ शृणोत्वग्निः
समिधाहवम्मेशृण्वन्त्वापोधिषणाश्चदेवीः। श्रोताग्रावाणोविदुषोनयज्ञ

संहि ई॰ शृणोतु देवः सविताहवं मे स्वाहा २६ देवीरापः। देवीरापो ऽ अपान्नपाद्यो पृ॰भ॰
३५ वऽऊर्म्मिर्हविष्य ऽ इन्द्रियावान्मदिन्तमः। तन्देवेभ्यो देवत्रा दत्त शुक्रपे- ६
भ्यो येषाम्भाग स्थ स्वाहा २७ कार्षिरसि। कार्षिरसि समुद्रस्य त्वाक्षित्या
ऽ उन्नयामि॥ समापो ऽ अद्भिरग्मत समोषधीभिरोषधीः २८ यमग्ने॥ य
मग्ने पृत्सु मर्त्यमवा वाजेषु यञ्जुनाः॥ स यन्ता शश्वतीरिषः स्वाहा २९ दे
वस्य त्वा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ३४
॥आददे रावासि गभीरमिमम ध्वरङ्कृधीन्द्राय सुषूतमम॥ उत्तमेन पविनोर्ज्जे-

स्वन्तम्मधुमन्तम्पयस्वन्तन्निग्ग्राभ्ब्यास्स्थदेवश्श्रुतस्तर्प्पयतमामनोमे ३० म
नोमे। तर्प्पयतवाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मेत
र्प्पयतात्मानम्मेतर्प्पयतप्प्रजाम्मेतपशून्मेतर्प्पयतगणान्मेतर्प्पयतगणामे
मावितृषन् ३१ इन्द्रायत्वा। इन्द्रायत्वावसुमतेरुद्द्रवतऽइन्द्रायत्वादित्यवतऽइ
न्द्रायत्वाभिमातिग्घ्ने॥ श्येनायत्वासोमभृतेग्ग्नयेत्वारायस्प्पोषदे ३२ यत्ते।
सोमदिविज्ज्योतिर्य्यत्पृथिव्यांय्यदुरावन्तरिक्षे॥ तेनास्मैयजमानायोरुरा
येकृद्ध्यधिदात्रेवोचः ३३ श्वात्रास्स्थ। श्वात्रास्स्थवृत्त्रतुरोराधोगूर्त्ताऽअमृ

संहि॰ नेस्युपत्नीः। तादेवीर्देवत्रेमंय्यज्ञन्नयन्तोपहूताः सोमस्यपिबत ३४ माभेः पू॰अ॰
३५ ।माभेर्म्मासंविक्थाऽऊर्ज्जन्धत्स्वधिषणेवीड्वीसतीवीडयेथामूर्ज्जन्दधाथाम्॥ ६
पाप्मााहतोनसोमः ३५ प्रागपागु। प्रागपागुदगधराक्सर्व्वतस्त्वादिशऽआ
धावन्तु। अम्बनिष्प्परसमरीर्विदाम् ३६ त्वमङ्ग॥ त्वमङ्गप्रशंॅसिषोदेवः
शविष्ठमर्त्यम्॥नत्वदन्न्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः ३७॥८॥
इतिसंहितायांषष्ठोध्यायः ६ वाचस्पतये। वाचस्पतयेपवस्ववृष्णोऽ ३५
अंॅशुभ्याङ्गभस्तिपूतः देवोदेवेभ्यःपवस्वयेषाम्भागोसि १ मधुमती

र्न्नः। मधुमतीर्न्न ऽ इषस्कृधि यत्ते सोमादाभ्यन्नाम जागृवि तस्मैते सोम सो
माय स्वाहा स्वाहोर्व्वन्तरिक्षमन्वेमि स्वाङ्कृतोसि २ स्वाङ्कृतोसि। विश्वेभ्य ऽ
इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्य्याय देवे
भ्यस्त्वा मरीचिपेभ्यो देवाꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतोसौ
फट्प्राणाय त्वा व्यानाय त्वा ३ उपयामगृहीतोसि। उपयामगृहीतोस्यन्तर्य्य
च्छ मघवन्पाहि सोमम्॥ उरुष्य राय ऽ एषो यजस्व ४ अन्तस्ते। अन्तस्ते द्या
वापृथिवी दधाम्यन्तर्द्दधाम्युर्व्वन्तरिक्षम्। सजूर्द्देवेभिरवरैः परैश्चान्तर्य्यामे

संहि॰ मेघवन्मादयस्व ५ स्वाङ्कृतोसि। स्वाङ्कृतोसि विश्वेभ्यऽ इन्द्रियेभ्यो दिव्येभ्यः शु॰अ॰
३६ पार्थिवेभ्योमनस्त्वाष्टु स्वाहात्वासुभवसूर्य्याय देवेभ्यस्त्वा मरीचिपेभ्यऽ उ ७
दानायत्वा ६ आवायोभूषशुचिपाऽ उपनः सहस्रन्ते नियुतो विश्ववार। उपो
तेऽ अन्धोमद्यमयामियस्य देवदधिषे पूर्वपेयं वायवेत्वा ७ इन्द्रवायूऽ इमे।
सुताऽ उपप्रयोभिरागतम्॥ इन्दवोवामुशन्तिहि। उपयामगृहीतोसि वाय
वऽ इन्द्रवायुभ्यान्त्वैषते योनिः सजोषोभ्यान्त्वा ८ अयंवाम्। अयंवाम्मित्रा ३६
वरुणासुतः सोमऽ ऋतावृधा॥ ममेदिह श्रुतं हवम्॥ उपयामगृहीतोसि

मित्रावरुणाभ्यान्त्वा ९ रायाव्वयम्। रायाव्वयᳫँससवाᳫँसोमदेमह

व्येनदेवायवसेनगावः॥ तान्धेनुम्मित्रावरुणायुवन्नोविश्वाहाधत्तम

नपस्फुरन्तीमेषतेयोनिर्ऋतायुभ्यान्त्वा १० याबाम्। याबाङ्कशामधु

मत्यश्विनासूनृतावती॥ तयायज्ञम्मिमिक्षतम्। उपयामगृहीतोस्य

श्विभ्यान्त्वैषतेयोनिर्म्माद्ध्वीभ्यान्त्वा ११ तम्प्रत्नथा। पूर्वथाविश्व

थेमथाज्ज्येष्ठतातिम्बर्हिषदᳫँस्वर्व्विदम्॥ प्रतीचीनंव्वृजनन्दोहसेधुनि

माशुञ्जयन्तमनुयासुवर्द्धसे॥ उपयामगृहीतोसिशण्डायत्वैषतेयोनि

संहि॰ र्वीरतोम्प्रात्व्यप मृष्टः शण्डो देवास्त्वा शुक्रपाः प्रणयन्त्वनाधृष्टासि १२ यू॰ अ॰
३७ सुवीरो वीरान्त् । सुवीरो वीरान्प्रजनयन्परीह्यभि रायस्पोषेण यजमा ७
नम् ॥ सञ्जग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः
शुक्रस्याधिष्ठानमसि १३ अच्छिन्नस्य ते । देव सोम सुवीर्यस्य रायस्पो
षस्य ददितारः स्याम ॥ सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरु-
णो मित्रो अग्निः १४ स प्रथमः । स प्रथमो बृहस्पतिश्चिकित्वांस्त ३७
स्मा इन्द्राय सुतमाजुहोत स्वाहा ॥ तृम्पन्तु होत्रा मध्वो याः स्विष्टाः

सुप्रीताःसुहुतायत्स्वाहाऽयाडग्नीत् १५ अयंवेन॰। अयंवेनश्चोदय
त्पृश्निगर्भाज्ज्योतिर्ज्जरायूरजसोविमाने॥इममपाꣳसङ्गमेसूर्य्यस्य
शिशुन्नविप्रामतिभीरिहन्ति॥उपयामगृहीतोसिमर्क्कायत्वा १६ मनोन
।येषुहवनेषुतिग्मंविपःशच्यावनुथोद्रवन्ता॥आयःशर्य्याभिस्तुविनृ
म्णोऽअस्याश्रीणीतादिशङ्गभस्तावेषतेयोनिः प्रजाःपाह्यपमृष्टो
मर्क्कोदेवास्त्वामन्थिपाःप्रणयन्त्वनाधृष्टासि १७ सुप्रजाःप्रजाःप्र
जनयन्परीह्यभिरायस्पोषेणयजमानम्॥सञ्जग्मानोदिवापृथिव्यास

संहि० न्थीमन्थिशोचिषानिरस्तोमर्कोमन्थिनोधिष्ठानमसि १८ येदेवासः। येदेवा पू०अ०
३८ सोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ॥ अप्सुक्षितोमहिनैकादश ७
स्थतेदेवासोयज्ञमिमञ्जुषध्वम् १९ उपयामगृहीतोस्याग्रयणोसिस्वा
ग्रयणः पाहियज्ञम्पाहियज्ञपतिंविष्णुस्त्वामिन्द्रियेणपातुविष्णुन्त्व
म्पाह्यभिसवनानिपाहि २० सोमः पवते। सोमः पवतेसोमः पवतेस्मै
ब्रह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेपवतेद्भ्यऽ ३८
ओषधीभ्यः पवतेद्यावापृथिवीभ्याम्पवतेसुभूतायपवतेविश्वेभ्यस्त्वादे

वेभ्यऽ एषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः २१ उपयामगृहीतोसि । उपयाम
गृहीतोसीन्द्रायत्वाबृहद्वतेवयस्वतऽउक्थाव्यङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वय
स्तस्मैत्वाविष्णवेत्वैषतेयोनिरुक्थेभ्यस्त्वादेवेभ्यस्त्वादेवाव्यंयज्ञस्या
युषेगृह्णामिमित्रावरुणाभ्यान्त्वा २२ मित्रावरुणाभ्यान्त्वा । देवाव्यंयज्ञस्या
युषेगृह्णामीन्द्रायत्वादेवाव्यंयज्ञस्यायुषेगृह्णामीन्द्राग्निभ्यान्त्वादेवाव्यं
यज्ञस्यायुषेगृह्णामीन्द्रावरुणाभ्यान्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामी
न्द्राबृहस्पतिभ्यान्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामीन्द्राविष्णुभ्यान्त्वादे

संहि॰ वाज्यं प्रयुक्तस्यायुषेगृह्णामि २३ मूर्द्धानन्दिवः। मूर्द्धानन्दिवोऽअरतिम्पृथि पू॰ अ॰
३९ व्याबैश्वानरमृतऽआजातमग्निम्॥कविर्ठ०सम्म्राजमतिथिञ्जनानामा ७
सन्नापात्रञ्जनयन्तदेवाः २४ उपयामगृहीतोसि। ध्रुवोसिध्रुवक्षितिर्ध्रु
वाणान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्वैश्वानरायत्वा।।ध्रुव
न्ध्रुवेणमनसावाचासोममवनयामि॥ अथानऽइन्द्रइद्विशोसपत्नाःस
मनसस्करत् २५ यस्ते। द्रप्सस्कन्दतियस्तेऽअर्ठ०शु ग्रावच्युतोधिषणयो ३९
रुपस्थात॥ अध्वर्य्योर्वापरिवायः पवित्रात्तन्तेजुहोमिमनसावषट्कृतर्ठ०

स्वाहा देवानामुत्क्रमणमसि २६ प्राणायमे । वर्च्चोदा वर्च्चसे पवस्व व्याना
यमे वर्च्चोदा वर्च्चसे पवस्वोदानाय मे वर्च्चोदा वर्च्चसे पवस्व वाचे मे वर्च्चोदा
वर्च्चसे पवस्व क्रतूदक्षाभ्यां मे वर्च्चोदा वर्च्चसे पवस्व श्रोत्राय मे वर्च्चो
दा वर्च्चसे पवस्व चक्षुर्भ्यां मे वर्च्चोदसौ वर्च्चसे पवेथामात्मने मे २७
आत्मने मे । वर्च्चोदा वर्च्चसे पवस्वौजसे मे वर्च्चोदा वर्च्चसे पवस्वायुषे
मे वर्च्चोदा वर्च्चसे पवस्व विश्वाभ्यो मे प्रजाभ्यो वर्च्चोदसौ वर्च्चसे पवे
थाम् २८ कोसि ॥ कतमोसि कस्यासि को नामासि ॥ यस्य ते नामामन्म

संहि· हिषन्त्वासोमेनातीतृपाम ॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याꣳ सु पू·अ·
५० वीरो वीरैः सुपोषः पोषैः २९ उपयामगृहीतोसि । उपयामगृहीतोसिमध ७
वेत्वोपयामगृहीतोसिमाधवायत्वोपयामगृहीतोसिशुक्रायत्वोपयाम
गृहीतोसिशुचयेत्वोपयामगृहीतोसिनभसेत्वोपयामगृहीतोसिनभस्या
यत्वोपयामगृहीतोसीषेत्वोपयामगृहीतोस्यूर्जेत्वोपयामगृहीतोसिसह
सेत्वोपयामगृहीतोसिसहस्यायत्वोपयामगृहीतोसितपसेत्वोपयामगृ ४०
हीतोसितपस्यायत्वोपयामगृहीतोस्यꣳहसस्पतयेत्वा ३० इन्द्राग्नीऽ

आगतम्॥इन्द्राग्नी ऽ आगतꣳसुतङ्गीर्भिर्न्नभोवरेण्यम्॥अस्यपात
न्धियेषिता॥उपयामगृहीतोसीन्द्राग्निभ्यान्त्वैषतेयोनिरिन्द्राग्निभ्या
न्त्वा ३१ आघ। आघाये ऽ अग्निमिन्धतेस्तृणन्तिबर्हिरानुषक्॥येषामि
न्द्रोयुवासखा॥उपयामगृहीतोस्यग्नीन्द्राभ्यान्त्वैषतेयोनिरग्नीन्द्रा
भ्यान्त्वा ३२ ओमासश्चर्षणीधृतः। ओमासश्चर्षणीधृतोविश्वेदेवास ऽ आ
गत॥दाश्वाꣳसोदाशुषः सुतम्। उपयामगृहीतोसिविश्वेभ्यस्त्वादेवे
भ्य ऽ एषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ३३ विश्वेदेवासः। विश्वेदेवा

सुऽआगतश्शृणुतामेऽइमꣳहवम्॥एदम्बर्हिर्न्निषीदत॥उपयामगृहीतो
 सिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ३४ इन्द्र
मरुत्वः॥इन्द्रमरुत्वऽइहपाहिसोमंय्यथाशार्य्यातेऽअपिबःसुतस्य॥
तवप्प्रणीतीतवशूरशर्म्मन्नाविवासन्तिकवयःसुयज्ञाः॥उपयामगृ
हीतोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ३५ मरुत्व
न्तंवृषभंवावृधानमकवारिन्दिव्यꣳशासमिन्द्रम्।विश्वासाहमवसेनू
तनायोग्रꣳसहोदामिहतꣳहुवेम॥उपयामगृहीतोसीन्द्रायत्वामरुत्व

तऽएषतेयोनिरिन्द्रायत्वामरुत्वते॥उपयामगृहीतोसिमरुतान्त्वौजसे ३६
सजोषाऽइन्द्र।सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्वान्॥
जहिशत्रूँ१रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः॥उपयामगृहीतोसी
न्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ३७ मरुत्वाँ२॥ऽइन्द्र॥
वृषभोरणायपिबासोमममनुष्वधम्मदाय।आसिञ्चस्वजठरेमद्ध्वऽऊर्म्मि
न्त्वꣳराजासिप्रतिपत्सुतानाम्॥उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽ
एषतेयोनिरिन्द्रायत्वामरुत्वते ३८ महाँ२॥ऽइन्द्रः॥महाँ२॥ऽइन्द्रोनृव

संहि॰ दाचेर्षणिप्रा ऽ उत हि बर्हा ऽ अमिनः सहोभिः ॥ अस्मद्र्यग्वावृधे वीर्य्या पू॰अ॰
४२ योरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ उपयामगृहीतोसि महेन्द्राय त्वैष ते यो ७
निर्म्महेन्द्राय त्वा ३९ महाँ२ ॥ ऽ इन्द्रः ॥ महाँ२ ॥ इन्द्रो य ऽ ओजसा पर्ज्जन्यो वृ
ष्टिमाँ२ ॥ ऽ इव ॥ स्तोमैर्वत्सस्य वावृधे ॥ उपयामगृहीतोसि महेन्द्राय त्वैष ते
योनिर्म्महेन्द्राय त्वा ४० उदु त्यम् । उदु त्यञ्जातवेदसन्देवं वहन्ति केतवः ॥
दृशे विश्वाय सूर्य्यं स्वाहा ४१ चित्रन्देवानाम् । चित्रन्देवानामुदगादन- ४२
नीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी ऽ अन्तरिक्षं

सूर्य्यऽआत्माजगतस्तस्थुषश्चस्वाहा ४२ अग्नेनय। सुपथाराये ऽअ
स्मान्विश्वानिदेववयुनानिविद्वान्॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठा
न्तेनमऽउक्तिंविधेमस्वाहा ४३ अयन्नः। अयन्नोऽअग्निर्वरिवस्कृणोत्वय
म्मृधः पुरऽएतुप्रभिन्दन्॥ अयंवाजाञ्जयतुवाजसातावयꣳशत्रूञ्ज
यतुजर्हृषाणःस्वाहा ४४ रूपेणवः। रूपेणवोरूपमभ्यागान्तुथोवोविश्व
वेदाविभजतु। ऋतस्यपथाप्रेतचन्द्रदक्षिणाविस्वःपश्यव्यन्तरिक्षंयत
स्वसदस्यैः ४५ ब्राह्मणमद्य। विदेयम्पितृमन्तम्पैतृमत्यमृषिमार्षेयꣳसु

संहि धातुर्दक्षिणाम् ॥ अस्माद्द्रातादेवत्त्रागच्छतप्प्रदातारमाविशत ४६ अग्ग्नये पू॰अ
४३ त्वा ॥ अग्ग्नयेत्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयायुर्द्दात्र ऽएधिमयो ७
मह्यम्प्प्रतिग्ग्रहीत्रेरुद्द्रायत्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयप्प्रा-
णोदात्र ऽएधिव्वयोमह्यम्प्प्रतिग्ग्रहीत्रेबृहस्प्पतयेत्त्वामह्यंव्वरुणोद
दातुसोमृतत्त्वमशीयत्त्वग्ग्दात्र ऽएधिमयोमह्यम्प्प्रतिग्ग्रहीत्रेयमाय
त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयहयोदात्र ऽएधिव्वयोमह्य ४३
म्प्प्रतिग्ग्रहीत्रे ४७ कोदात्। कोदात्कस्म्मा ऽअदात्कामोदात्कामायादा

त्॥ कामोदात्ताकामे÷प्प्रतिग्ग्रहीताकामैतत्ते ४८॥२५॥ इतिसंहितायां
सप्तमोध्याय: ७ उपयामगृहीतोसि। उपयामगृहीतोस्यादित्येभ्ब्यं
स्त्वा॥ विष्णी ऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्वादभन् १ कदाचन॥
स्तरीरसिनेन्द्रसश्च्चसिदाशुषे॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्य
पृच्यतऽआदित्येभ्ब्यंस्त्वा २ कदाचन। प्प्रयुच्छस्युभेनिपासिजन्मनी॥
तुरीयादित्यसवनन्तऽइन्द्रियमातस्थावमृतन्दिव्व्यादित्येभ्ब्यंस्त्वा ३ यु
ज्ञोदेवानाम्। यज्ञोदेवानाम्प्प्रत्यैतिसुम्म्नमादित्यासोभवतामृडयन्त÷॥

संहि॰ आवोर्वाचीसुमतिर्ववृत्यादꣳहोश्चिद्यावरिवोवित्तरासदादित्येभ्यस्त्वा पू॰अ॰
४४ ४ विवस्वन्नादित्य। विवस्वन्नादित्यैषतेसोमपीथस्तस्मिन्मत्स्व॥श्रद ८
स्मैनरोवचसेदधातनयदाशीर्दादम्पतीवाममश्नुतः॥पुमान्पुत्रोजा
यतेविन्दतेवस्वधाविश्वाहारपऽएधतेगृहे ५ वाममद्य॥सवितर्वाममु
श्वोदिवेदिवेवाममस्मभ्यꣳसावीः॥वामस्यहिक्षयस्यदेवभूरेरयाधि
यावामभाजः स्याम ६ उपयामगृहीतोसि। सावित्रोसिचनोधाश्चनोधा ४४
ऽअसिचनोमयिधेहि। जिन्वयज्ञञ्जिन्वयज्ञपतिम्भगायदेवायत्वास

विन्त्रे ७ शतम्॥ ३००॥ उपयामगृहीतोसि। सुशर्म्मासिसुप्प्रतिष्ठानो बृह
दुक्षायुनमः॥ विश्वेब्भ्यस्त्वादेवेब्भ्यः ऽएषते योनिर्व्विश्वेब्भ्यस्त्वादेवेब्भ्यः
८ उपयामगृहीतोसि। उपयामगृहीतोसि बृहस्पतिसुतस्यदेवसोमतऽ
इन्दोरिन्द्रियावतः पत्नीवतोग्रहाँ २॥ ऽ ऋध्यासम्। अहम्पुरस्तादहम
वस्तादन्तरिक्षन्तदुमेपितासूत्॥ अहर्ठ॰सूर्य्यमुभयतोददर्शाहन्देवानां
म्परमङ्गुहायत् ९ अग्ग्ना ३॥ ऽ इपत्नीवन्। अग्ग्ना ३॥ ऽ इपत्नीवन्सजूर्द्दे
वेनत्वष्ट्रासोमम्पिबस्वाहा॥ प्रजापतिर्व्वृषासिरेतोधारेतोमयिधेहिप्प्रजा

संहि॰ पतेस्त्वे वृष्णो रेतोधामशीय १० उपयामगृहीतोसि । उपयामगृहीतोसि हरि पू॰अ॰

४५ रसि हारियोजनो हरिभ्यान्त्वा ॥ हर्य्योर्द्धानास्त्थ सहसोमाऽ इन्द्राय ११ ८

यस्ते ॥ऽ अश्वसनिर्भक्षो यो गोसनिस्तस्य तऽ इष्टयजुषस्तुतस्तोमस्य

शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि १२ देवकृतस्यैनसः ॥ देवकृत

स्यैनसोवयजनमसि मनुष्यकृतस्यैनसोवयजनमसि पितृकृतस्यैनसो

वयजनमस्यात्मकृतस्यैनसोवयजनमस्यैनसऽ एनसोवयजनमसि ॥ ४५

यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोवयजनमसि १३

संघर्वःसा। संघर्वःसापयसासन्तनूभिरगन्महिमनसासठ शिवेन। त्व
ष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् १४ समिन्द्र। णोमन
सानेषिगोभिः सठ सूरिभिर्मघवन्त्स ७ स्वस्त्या॥ सम्ब्रह्मणादेवकृतं
यदस्तिसन्देवानां ७ सुमतौयज्ञियाना ७ स्वाहा १५ संघर्वःसा। संघ
र्वःसापयसासन्तनूभिरगन्महिमनसासठ शिवेन॥ त्वष्टासुदत्रोवि
दधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् १६ धातारातिः॥सवितेदञ्जुष
न्तांप्रजापतिर्निधिपादेवोऽअग्निः॥ त्वष्टाविष्णुःप्रजयासठ रराः

णा यजमानाय द्रविणन्दधातु स्वाहा १७ सुगावः । सुगा वो देवाः सदना ऽअ
कर्म्म य ऽआजग्मेदꣳ सवनञ्जुषाणाः ॥ भरमाणा वहमाना हवीꣳष्य
स्मे धत्त वसवो वसूनि स्वाहा १८ याँ२ ॥ ऽआवहः ॥ याँ२ ॥ आवह ऽउशतो
देव देवाँस्तान्प्रेरय स्वे ऽअग्ने सधस्थे ॥ जक्षिवाꣳसः पपिवाꣳसश्च वि
श्वे सुङ्घर्म्मꣳ स्वरातिष्ठतानु स्वाहा १९ वयꣳहि ॥ त्वा प्प्रयति यज्ञे ऽअ
स्मिन्नग्ने होतारमवृणीमहीह ॥ ऋधगया ऽऋधगुताशमिष्ठाः प्रजान
न्यज्ञमुपयाहि विद्वान्त्स्वाहा २० देवागातुविदः । देवा गातुविदो गातुं वित्त्वा

गातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः २१ य्यज्ञय्यज्ञम्।
य्यज्ञय्यज्ञङ्गच्छयज्ञपतिङ्गच्छस्वांय्योनिङ्गच्छस्वाहा ॥ एषतेय्यज्ञोय्यज्ञपते
सहसूक्तवाकः सर्ववीरस्तञ्जुषस्वस्वाहा २२ माहिर्भूः। माहिर्भूर्म्मापृ
दाकुः ॥ उरुꣳहिराजाव्वरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ ॥ अप
देपादाप्प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् ॥ नमोव्वरुणायाभि
ष्ठितोव्वरुणस्यपाशः २३ अग्नेरनीकम्। अग्नेरनीकमपऽआविवेशा
पान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेसमिधंय्यक्ष्यग्नेप्प्रतितेजिह्वाघृ

संहि॰ त मुञ्चेरण्यस्वाहा २४ समुद्रेते । समुद्रेतेहृदयमप्स्वन्तः सन्त्वाविशन्त्वोषधीरुतापः ॥ यज्ञस्यत्वा यज्ञपते सूक्तोक्तौ नमोवाकेविधेमयत्स्वाहा २५ देवीराप । देवीराप एषवोगर्भस्तꣳसुप्रीतꣳसुभृतम्बिभृत ॥ देवसोमैषतेलोकस्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व २६ अवभृथनिचुम्पुण । निचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि देवानाꣳसमिदसि २७ एजतुदशमास्यः । एजतुदशमास्योगर्भोजरायुणासह ॥ यथायंवायुरेजति यथास

४७ ४७

मुद्र ऽएजति ॥ एवायन्दशमास्यो ऽअस्रज्जरायुणासह २८ यस्यैते । यज्ञि
यो गर्भो यस्यै योनिर्हिरण्ययी ॥ अङ्गान्यह्रुता यस्य तम्मात्रा समजीगमᳪं
स्वाहा २९ पुरुदस्मो विषुरूपः । पुरुदस्मो विषुरूप ऽइन्दुरन्तर्महिमा
नमानञ्ज धीरः । एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानु
प्रथन्ताᳪं स्वाहा ३० मरुतो यस्य । मरुतो यस्य हि क्षये पाथा दिवो वि
महसः ॥ स सुगोपातमो जनः ३१ मही द्यौः । पृथिवी च न ऽइमं यज्ञ
म्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ आतिष्ठ वृत्रहन्रथं युक्ता ते

संहि॰ ब्रह्मणाहरी॥ अर्वाचीनꣳसुतेमनोग्रावाकृणोतुवग्नुना॥उपयामगृ पू॰अ॰
४८ हीतोसीन्द्रायत्वाषोडशिनऽएषतेयोनिरिन्द्रायत्वाषोडशिने ३३ युक्ष्वा ८
हि। केशिनाहरीवृषणाकक्ष्यप्रा॥ अथानऽइन्द्रसोमपागिरामुपश्रुति
ञ्चर॥उपयामगृहीतोसीन्द्रायत्वाषोडशिनऽएषतेयोनिरिन्द्रायत्वाषो
डशिने ३४ इन्द्रमित्। इन्द्रमिद्धरीवहतोप्रतिधृष्टशवसम्॥ ऋषीणा
ञ्चस्तुतीरुपयज्ञञ्चमानुषाणाम्॥उपयामगृहीतोसीन्द्रायत्वाषोडशि ४८
नेऽएषतेयोनिरिन्द्रायत्वाषोडशिने ३५ यस्मान्नजातःपरोऽअन्यो

ऽअस्तियऽआविवेशभुवनानिविश्वा ॥ प्रजापतिःप्रजयासठंरराणस्त्री
णिज्योतीᳬंषिसचतेसषोडशी ३६ इन्द्रश्च । सम्राड्वरुणश्चराजातौते
भक्षञ्चक्रतुरग्रऽएतम् ॥ तयोरहमनुभक्षम्भक्षयामिवाग्देवीजुषा
णासोमस्यतृप्यतुसहप्राणेनस्वाहा ३७ अग्नेपवस्व । अग्नेपव
स्वस्वपाऽअस्मेवर्च्चःसुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयाम
गृहीतोस्यग्नयेत्वावर्च्चसऽएषतेयोनिरग्नयेत्वावर्च्चसे ॥ अग्नेवर्च्च
स्विन्वर्च्चस्वाँस्त्वन्देवेष्वसिवर्च्चस्वानहम्मनुष्येषुभूयासम् ३८ उत्ति

संहि॰ ष्ठुन्नोजसा। उत्तिष्ठन्नोजसासहपीत्वीशिप्रेऽ अवेपयः॥ सोममिन्द्रचमू पू॰अ॰
४९ सुतम्॥ उपयामगृहीतोसीन्द्रायत्वौजसऽ एषतेयोनिरिन्द्रायत्वौज ८
से॥ इन्द्रौजिष्ठौजिष्ठस्त्वन्देवेष्वस्योजिष्ठोहम्मनुष्येषुभूयासम्॥ ३९
अदृश्रमस्य। अदृश्रमस्यकेतवोविरश्मयोजनाँ॥ऽअनु॥ भ्राजन्तो
ऽअग्नयोयथा। उपयामगृहीतोसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसू
र्य्यायत्वाभ्राजाय॥ सूर्य्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोह ४९
म्मनुष्येषुभूयासम् ४० उदुत्यम्। उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः

द्दशेविश्श्वायसूर्य्यम्॥उपयामगृहीतोसिसूर्य्यायत्वाभ्भ्राजायैषतेयोनिः
सूर्य्यायत्वाभ्भ्राजाय ४१ आजिघ्र। आजिघ्रकुलशम्मुत्त्वायात्वाविशन्त्वि
न्दवः॥पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्मा
विशताद्द्रयिः ४२ इडेरन्ते। इडेरन्तेहव्येकाम्म्येचन्द्रेज्ज्योतेदितिसरस्वति
महिविश्श्रुति॥एतातेऽअघ्न्येनामानिदेवेभ्भ्योमासुकृतम्ब्रूतात् ४३ वि
नः॥ऽइन्द्रमृधोजहिनीचायच्छपृतन्न्यतः॥योऽअस्म्माँ २॥ऽअभिदास
त्यधरङ्गमयातमः॥उपयामगृहीतोसीन्द्रायत्वाविमृधऽएषतेयोनिरि

 न्द्रायत्वाविमृधे ४४ वाचस्पतिं। विश्वकर्म्माणमूतयेमनोजुवंवाजे ऽअद्या
 हुवेम ॥ सनोविश्वानिहवनानिजोषद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ उपयाम
गृहीतोसीन्द्रायत्वाविश्वकर्म्मण ऽएषतेयोनिरिन्द्रायत्वाविश्वकर्म्मणे ४५
विश्वकर्म्मन्हविषा ॥ विश्वकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणोरवध्य
म् ॥ तस्मैविशःसमनमन्तपूर्व्वीरयमुग्रोविहव्योयथासत्। उपयामगृही
तोसीन्द्रायत्वाविश्वकर्म्मण ऽएषतेयोनिरिन्द्रायत्वाविश्वकर्म्मणे ४६ उ
पयामगृहीतोसि। उपयामगृहीतोस्यग्नयेत्वागायत्त्रछन्दसङ्गृह्णामीन्द्रा

यत्वात्रिष्टुप्छन्दसङ्गृह्णामिविश्वेभ्यस्त्वादेवेभ्योजगच्छन्दसङ्गृह्णाम्य
नुष्टुप्तेभिगरः ॥४७ व्रेशीनान्त्वा। व्रेशीनान्त्वापत्मन्नाधूनोमिकुकूनना
नान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्मन्नाधूनोमिमदिन्तमानान्त्वा
पत्मन्नाधूनोमिमधुन्तमानान्त्वापत्मन्नाधूनोमिशुक्रन्त्वाशुक्रआधू
नोम्यह्नोरूपेसूर्य्यस्यरश्मिषु ४८ ककुभꣳरूपम् ॥ वृषभस्यरोचते
बृहच्छुक्रः शुक्रस्यपुरोगाः सोमः सोमस्यपुरोगाः ॥ यत्तेसोमादाभ्य
नामजागृवितस्मैत्वागृह्णामितस्मैतेसोमसोमायस्वाहा ४९ उशिक्त्वम्।

उशिक्त्वन्देवसोमाग्नेः प्प्रियम्पाथोपीहि वशीत्त्वन्देवसोमेन्द्रस्यप्प्रियम्पा
थोपीह्यस्मत्सखात्त्वन्देवसोमविश्श्वेषान्देवानाम्प्रियम्पाथोपीहि ५० इ
यरतिः इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिःस्वाहा ॥ उपसृजन्धरुणम्मा
त्रेधरुणोमातरन्धयन् ॥ रायस्पोषमस्मासुदीधरत्स्वाहा ५१ सत्रस्यऽऋ
द्धिः। सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽ
अध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ५२ युवन्तम्। युवन्तमिन्द्रापर्वतापु ५१
रोयुधायोनः पृतन्यादपतन्तमिद्धतंवज्रेणतन्तमिद्धतम् ॥ दूरेचत्तायछ

न्सुद्धद्वनंघ्यदिनक्षत्॥ अस्म्माकुंठ्‌ःशत्त्रून्परि शूरविश्श्वतोदुम्मादेर्षीष्ट

विश्श्वतेः॥ भूर्भुवुःस्वुः सुप्प्रुजाः प्प्रजार्भिः स्यामसुवीरोवीरेः सुपोषाः

पोषैः ५३ पुरमेष्ट्ठ्यभिधीतः॥ प्प्रुजापतिर्व्वाचिव्याह्वतायामन्धोऽअछे

तः सविितासन्न्यांविश्श्वकर्म्मादीक्षायाम्पूषासोमुक्क्रयण्यामिन्द्रश्श्च ५४

इन्द्रश्श्च। मुरुतश्श्चक्क्रयायोपोत्थितोसुरः पंण्यमानोमित्त्रः क्रीतोवि

ष्णुः शिपिविष्ट्ऽऊरावासन्न्नोविष्णुर्न्नरन्धिषः प्प्रोह्यमाणः ५५ प्प्रो

ह्यमाणुःसोमुऽआगतोवरुणऽआसुन्द्यामासन्न्नोग्निराग्नीद्धुऽइन्द्रो

संहि. हविर्द्धानेर्थेर्व्वोपावह्रियमाणो विश्श्वेदेवाः ५६ विश्श्वेदेवाः विश्श्वेदेवाऽ पू.अ.
५२ ०ऽ अर्ठंशुषुन्न्युप्तो विष्ण्णुराप्प्रीतपाऽ आप्प्याय्यमानो युमः सूयमा ८
नो विष्ण्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीराश्श्री
र्म्मन्थी सक्तुश्श्रीर्विश्श्वेदेवाः ५७ विश्श्वेदेवाः विश्श्वेदेवाश्श्चमसेषून्नी
तोसुर्होमायोद्यतो रुद्रो हूयमानो वातोभ्यावृत्तो नृचक्षाः प्प्रतिख्या
तो भक्षो भक्ष्यमाणः पितरो नाराशर्ठंसाः ५८ सन्नः सिन्धुः सन्नः ५२
सिन्धुरवभृथायोद्यतः समुद्रोभ्यवह्रियमाणः सलिलः प्प्रप्लुतो ययो

रोजेसास्फभितारजाॅंसिद्धीर्यै्र्भिर्व्वीरन्तमाशाविष्ट्टा॥ यापत्येतुऽअ
प्प्रतीतासहोभिर्द्विष्य्णूऽअगुन्वरुणापूर्व्वहूतो ५९ देवान्दिवम्।देवा
न्दिवमगन्न्युज्ञस्ततोमाद्द्रविणमष्टुमनुष्य्यानन्तरिक्षमगन्न्युज्ञस्ततोमा
द्द्रविणमष्टुपितॄन्पृथिवीमगन्न्युज्ञस्ततोमाद्द्रविणमष्टुयङ्कञ्चलोकम
गन्न्युज्ञस्ततोमेभद्द्रमभूत् ६० चतुस्त्रिर्ठं॰शत्तन्तवः। चतुस्त्रिर्ठं॰शत्तन्त
वोयेविंतनिरेयऽइमंय्युज्ञॅंस्वधयाददन्ते॥तेषाञ्छिन्नर्ठं॰सम्ब्वे
तद्दधामिस्वाहाधर्म्मोऽअप्येतुदेवान् ६१ यज्ञस्यदोहः। यज्ञस्यदोहो

संहि॰ ध्वितेतः पुरुत्रासोऽ अष्टुधादिवमुन्वाततान ॥ सयज्ञ धुक्ष्वमहि मे प्रजा पू॰ अ॰
५३ यांरायस्पोषंविश्वमायुरशीयुस्वाहा ६२ आपवस्व। आपवस्वहिरण्यव ८
दश्ववत्सोमवीरवत्॥ वाजङ्गोमन्तुमाभरस्वाहा ६३॥ २३ इतिसंहिता
यां अष्टमोध्यायः ८ देवसवितः। देवसवितःप्रसुवयुज्ञम्प्रसुवयुज्ञप
तिम्भगाय॥ दिव्योगन्धुर्वःकेतपूःकेतन्नःपुनातुवाचस्पतिर्वाजन्नः
स्वदतुस्वाहा १ ध्रुवसदन्त्वा। नृषदम्मनःसदमुपयामगृहीतोसीन्द्राय ५३
त्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्। अप्सुषदन्त्वाघृत

सदंव्योमसदमुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रा
यत्वाजुष्टतमम्। पृथिवीसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकस
दमुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टत
मम् २ अपाꣳरसम्। अपांꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम्।
अपाꣳरसस्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्ट
ङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ३ ग्रहाऽऊर्ज्जाहुतयः। ग्रहाऽ
ऊर्ज्जाहुतयोव्यन्तोविप्प्रायमतिम्। तेषांविशिप्प्रियाणांवोहमिषमूर्ज्जꣳ

समग्रभमुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्राय त्वाजुष्टतमम् ॥ सम्पृचौस्थ्यः सम्माभद्रेणपृङ्क्तंविपृचौस्थोविमापाप्म नापृङ्क्तम् ॥ ४ ॥ इन्द्रस्यवज्रोसि । इन्द्रस्यवज्रोसिवाजसास्त्वयायंवा जं॑ऽसेत् वाजस्यनुप्रसवेमातरम्महीमदितिन्नामवचसाकरामहे ॥ यस्यामिदंविश्वम्भुवनमाविवेशतस्यान्नोदेवः सवितार्धर्मसाविषत् ५ अप्स्वन्तः । अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिष्वश्वाभ वतवाजिनः ॥ देवीरापोयोवऽऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेना

यंव्वाजर्ठ॑सेत्॒ ६ व्वातोवा। व्वातोवा॒मनोवागन्धर्व्वाः॑ सप्तविर्ठ॑शतिः॥ तेऽ
अग्ग्रेश्श्वमयुञ्जँस्ते ऽअस्मिञ्जवमादधुः ७ व्वातरर्ठ॑ह्याभव व्वाजिन्यु
ज्ज्यमान॒ऽ इन्द्रस्येवदक्षिणःश्श्रियेधि॥ युञ्जन्तुत्वामरुतोविश्श्ववेदस॒ऽ
आतेत्वष्टापत्सुजवन्दधातु ८ जवोयः॑। जवोयस्तेव्वाजिन्निहितोगुहायः॑
श्येनेपरीत्तो॒ऽ अचरच्चव्वाते॥ तेननोव्वाजिन्बलवान्बलेनव्वाजजिच्चभवस
मनेचपारयिष्णुः॥ व्वाजिनोव्वाजजितो व्वाजर्ठ॑सरिष्यन्तो बृहस्पतेर्भ्भा
गमवजिग्घ्रत ९ देवस्याहम्। देवस्याहर्ठ॑सवितुःसवेसत्यसवसोबृहस्प

संहि तैरुत्तमन्नाकर्ठं॰रुहेयम्॥ देवस्याहर्ठं॰ सवितुः सवे सुत्यसंवसु ऽइन्द्र पू॰अ॰
५५ स्योत्तुमन्नाकर्ठं॰रुहेयम्॥ देवस्याहर्ठं॰सवितुः सवेसत्यप्प्रसवसोबृ ९
हुस्प्पतेरुत्तमन्नाकमरुहम्॥ देवस्याहर्ठं॰सवितुः सवेसत्यप्प्रसवसः
इन्द्रस्योत्तमन्नाकमरुहम् १० बृहस्प्पतेवाजंम्। बृहस्प्पतेवाजञ्जय
बृहस्प्पतयेवाचंवदतबृहस्प्पतिंवाजञ्जापयत। इन्द्रवाजञ्जयेन्द्रा
यवाचंवदतेन्द्रंवाजञ्जापयत ११ एषावः।एषावःसासत्यासंवाग ५५
भूद्यायाबृहस्प्पतिंवाजमजीजपताजीजपतबृहस्प्पतिंवाजंवनस्प्प

लयोविमुञ्चध्वम् । एषावःसासत्यासंवागभूद्ययेन्द्रंवाजमजीजपताजी
जपतेन्द्रंवाजंवनस्पतयोविमुञ्चध्वम् १२ देवस्याहम् । देवस्याहꣳसवि
तुःसवेसत्यप्रसवसोबृहस्पतेर्वाजजितोवाजंजेषम् । वाजिनोवाज
जितोध्वनस्कभ्नुवन्तोयोजनामिमानाःकाष्ठाङ्गच्छत १३ एषस्यः । एषस्य
वाजीक्षिपणिन्तुरण्यतिग्रीवायाम्बद्धोऽअपिकक्षऽआसनि ॥ क्रतुन्दधि
क्राऽअनुसꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा १४ उत
स्मा । उतस्मास्यद्रवतस्तुरण्यतःपर्णन्नवेरनुवातिप्रगर्धिनः ॥ श्येनस्ये

संहि· ध्रजतोऽ अङ्कसम्परिदधिक्राव्णः सहोर्जातरित्रतः स्वाहा १५ ग्रा पू·अ·
५६ म्ने॑ः। शन्नोभवन्तुवाजिनोहवेषुदेवतातामितद्रवः स्वर्काः॥ जम्भयन्तोहिं ९
वृकं रक्षांसिसनेम्यस्मद्युयवन्नमीवाः १६ तेनः। तेनोऽ अर्वन्तो
हवनश्रुतोहवंविश्वेशृण्वन्तुवाजिनोमितद्रवः। सहस्रसामेधसाता
सनिष्यवोमहोयेधनंसमिथेषुजभ्रिरे १७ वाजेवाजेवत। वाजिनो
नोधनेषुविप्राऽ अमृताऽ ऋतज्ञाः॥ अस्यमध्वः पिबतमादयध्वन्तृप्ता ५६
यातपथिभिर्देवयानैः १८ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृ

थिवीव्विश्श्वरूपे॥ आमागन्ताम्पितरामातराचामासोमो ऽ अमृतत्त्वेन
गम्म्यात्॥ व्वाजिनोव्वाजजितोव्वाजᳬ सस्सृवाᳬ सोबृहस्प्पतेर्भ्भागमव
जिग्घ्रतनिमृजानाः १९ आपयेस्वाहा। स्वापयेस्वाहापिजायस्वाहाक्क
त्तवेस्वाहावसवेस्वाहाहर्प्पतयेस्वाहाह्नेमुग्ग्धायस्वाहामुग्ग्धायवैनᳬ
शिनायस्वाहाव्विनᳬशिने ऽ आन्त्यायनायस्वाहान्त्यायभौवनायस्वाहा
भुवनस्यपतयेस्वाहाधिपतयेस्वाहा २० आयुर्य्यज्ञेन। कल्प्पताम्प्राणो
यज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेनकल्प्पताᳬ श्श्रोत्रंय्यज्ञेनकल्प्पताम्पृ

ष्ठंय्य॒ज्ञेनकल्पतांय्य॒ज्ञोय॒ज्ञेनकल्पताम्॥प्र॒जाप॑तेः प्र॒जाऽअ॑भूम॒स्व॒
र्द्देवाऽअगन्मा॒मृताऽअभूम २१ अ॒स्म्मेवः। अ॒स्म्मेवोऽअस्त्विन्द्रि॒यम॒स्म्मेनृ॒
म्म्णम॒तक्क्रतु॑र॒स्म्मेव॒र्च्चा॑ᳬसिसन्तुवः। नमो॑मा॒त्रेपृ॑थि॒व्यैनमो॑मा॒त्रेपृ॑थि॒
व्याऽइ॒यन्तेराड्य॒न्तासि॒यम॑नोध्रु॒वो॑सिध॒रुणः॥ कृ॒ष्यैत्वा॒क्षेमा॑यत्वार॒य्यै
त्वा॒पोषा॑यत्वा २२ व्वाज॑स्ये॒मम्। व्वाज॑स्ये॒मम्प्र॑स॒वः सु॑षु॒वेग्ग्रे॒सोम॒ᳬराजा॑न॒
मोष॑धीष्व॒प्सु॥ ताऽअ॒स्मभ्य॒म्मधु॑मतीर्भवन्तुव॒यᳬराष्ट्रेजा॑गृयामपु॒रो
हि॑ताः स्वाहा॑ २३ व्वाज॑स्ये॒माम्॥ व्वाज॑स्ये॒माम्प्र॑स॒वः शि॑श्श्रियेदि॒वमि॒माच॒वि॒

श्श्वा भुवनानि सुम्म्राट्। अदित्सन्तन्दापयतिप्प्रजानन्त्सनो रयिꣳ
सर्व्ववीरन्नियच्छतु स्वाहा २४ वाजस्यनु। प्प्रसव ऽ आबभूवेमाञ्च
विश्श्वा भुवनानि सर्व्वतः॥ सनेमिराजा परियाति विद्द्वान्प्प्रजाम्पुष्टिंव
र्द्धयमानो ऽ अस्म्मे स्वाहा २५ सोमꣳ राजानम्। सोमꣳ राजानमवसे
ग्निमन्वारभामहे॥ आदित्यान्विष्ण्णुꣳ सूर्य्यम्ब्रह्माणञ्च बृहस्प
तिꣳ स्वाहा २६ अर्य्यमणम्बृहस्प्पतिम्। अर्य्यमणम्बृहस्प्पतिमि
न्द्रन्दानाय चोदय॥ वाचंविष्ण्णुꣳ सरस्वतीꣳ सवितारञ्च वाजिनꣳ

स्वाहा २७ अग्ग्नेअच्छ। अग्ग्नेऽअच्छावदेहनः प्प्रतिनःसुमनाभव॥प्र
नोयच्छसहस्रजित्त्वꣳहिधनदाऽअसिस्वाहा २८ प्रनः। प्रनोयच्छत्व
र्य्यमाप्प्रपूषाप्प्रबृहस्प्पतिः। प्रवाग्गदेवीददातुनःस्वाहा २९ देवस्य
त्वासवितुःप्प्रसवेश्श्विनोर्बाहुभ्याम्पूष्ष्णोहस्ताभ्याम्। सरस्व
त्यैवाचोयन्तुर्य्यन्त्रियेदधामिबृहस्प्पतेस्त्वासाम्म्राज्ज्येनाभिषिञ्चा
म्यसौ ३० अग्ग्निरेकाक्षरेण। प्प्राणमुदजयत्तमुज्जेषमश्श्विनौद्व्य
क्षरेणद्विपदोमनुष्ष्यानुदजयतान्तानुज्जेषंविष्ष्णुस्त्र्यक्षरेणत्त्री

ल्लोकानुदजयत्तानुज्जेषर्ठ॑ंसोमश्चतुरक्षरेणचतुष्पदः पशूनुदजय
त्तानुज्जेषम्पूषापञ्चाक्षरेण ३१ पूषापञ्चाक्षरेणपञ्चदिशऽउदज
यत्ताऽउज्जेषर्ठ॑ंसविताषडक्षरेणषडृतूनुदजयत्तानुज्जेषम्मरुतः स
प्ताक्षरेणसप्तग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्ष
रेणगायत्रीमुदजयत्तामुज्जेषम्मित्रोनवाक्षरेण ३२ मित्रोनवाक्षरेण
त्रिवृतँ स्तोममुदजयत्तमुज्जेषंवरुणोदशाक्षरेणविराजमुदजयत्ता
मुज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदजयत्तामुज्जेषंविश्वेदेवाद्वा

संहि॰ दशाक्षरेणजगतीमुदजयँस्तामुज्जेषंवसवस्त्रयोदशाक्षरेण ३३ वस पू॰ अ॰
५९ वस्त्रयोदशाक्षरेण। त्रयोदशँस्तोममुदजयँस्तमुज्जेषᳪं रुद्राश्चतु ९
र्दशाक्षरेणचतुर्दशँस्तोममुदजयँस्तमुज्जेषमादित्याः पञ्चदशाक्ष
रेणपञ्चदशँस्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्षरेणषोडश
ँस्तोममुदजयत्तमुज्जेषम्प्रजापतिः सप्तदशाक्षरेणसप्तदशँस्तो
ममुदजयत्तमुज्जेषम् ३४ एषते। निर्ऋतेभागस्तञ्जुषस्वस्वाहाग्निनेत्रे ५९
भ्योदेवेभ्यः पुरःसद्भ्यःस्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणास

द्भ्यःस्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यःपश्चात्सद्भ्यःस्वाहामित्रावरुणने
त्रेभ्योवामरुन्नेत्रेभ्योवादेवेभ्यऽउत्तरासद्भ्यःस्वाहासोमनेत्रेभ्योदे
वेभ्यऽउपरिसद्भ्योदुवस्वद्भ्यःस्वाहा ३५ येदेवाऽअग्निनेत्राःपुरःसद
स्तेभ्यःस्वाहायेदेवायमनेत्रादक्षिणासदस्तेभ्यःस्वाहायेदेवाविश्व
देवनेत्राःपश्चात्सदस्तेभ्यःस्वाहायेदेवामित्रावरुणनेत्रावामरुन्नेत्रा
वोत्तरासदस्तेभ्यःस्वाहायेदेवाःसोमनेत्राऽउपरिसदोदुवस्वन्तस्ते
भ्यःस्वाहा ३६ अग्नेसहस्व। अग्नेसहस्वपृतनाऽअभिमातीरपास्य

॥दुष्टरस्तरन्नरातीर्व्वर्च्चोधायुज्ञवाहसि ३७ देवस्यत्वा।सवितुःप्प्रसुवे
श्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम्।उपाꣳशोर्व्वीर्य्येणजुहोमिहुत
ꣳरक्षुःस्वाहारक्षसान्त्वावुधायावधिष्म्मरक्षोवधिष्मामुमुसौहुतः
३८ सुवितात्वासवानाꣳसुवतामुग्निर्ग्गृहपतीनाꣳसोमोवनुस्प्पती
नाम्॥बृहुस्प्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रःपशुभ्भ्योमित्त्रःसुत्योव
रुणोधर्म्मपतीनाम् ३९ इमन्देवाः।इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महुते
क्षुत्त्रायमहुतेज्ज्यैष्ठ्यायमहुतेजानराज्ज्यायेन्द्रस्येन्द्रियाय॥इममुमुष्य

पुत्रममुष्यैपुत्रमुस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणाना

ᳫ्राजा ४०॥८॥ इतिश्रीसंहितायांनवमोऽध्यायः ९ अपोदेवाः१।

अपोदेवामधुमतीरगृभ्णंन्नूर्ज्जस्वतीराजस्वश्चितानाः॥याभिर्म्मि

त्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः १ वृष्ण्णोऽऊ

र्मिः२वृष्ण्णोऽऊर्म्मिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहावृष्ण्णोऽऊर्म्मिरसिराष्ट्रदा

राष्ट्रममुष्मैदेहिवृषसेनोसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहावृषसेनोसि

राष्ट्रदाराष्ट्रममुष्मैदेह्यर्थेतस्स्थ २ अर्थेतस्स्थराष्ट्रदाराष्ट्रम्मेदत्त

संहि स्वाहार्थेतस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तौजस्वतीस्स्थराष्ट्रदाराष्ट्रम्मेद पू.अ.
६१ त्तस्वाहौजस्वतीस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तापः परिवाहिणीस्स्थराष्ट्रदा १०
राष्ट्रम्मेदत्तस्वाहापः परिवाहिणीस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तापाम्प
तिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममुष्मैदेह्य
पाङ्गर्भोसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाङ्गर्भोसिराष्ट्रदाराष्ट्रममुष्मैदे
हिसूर्य्यत्वचस्स्थ ३ सूर्य्यत्वचसस्थ। राष्ट्रदाराष्ट्रम्मेदत्तस्वाहासू ६१
र्य्यत्वचसस्थराष्ट्रदाराष्ट्रममुष्मैदत्तसूर्य्यवर्चसस्थराष्ट्रदाराष्ट्रम्मे

दत्तस्वाहासूर्य्यवर्च्चसस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तमान्दास्त्थराष्ट्रदाराष्ट्र
म्मैदत्तस्वाहामान्दास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्रजक्षितस्त्थराष्ट्रदारा
ष्ट्रम्मैदत्तस्वाहाव्रजक्षितस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तवाशास्त्थराष्ट्रदा
राष्ट्रम्मैदत्तस्वाहावाशास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तशविष्ठास्त्थराष्ट्रदारा
ष्ट्रम्मैदत्तस्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तशक्करीस्त्थराष्ट्रदारा
ष्ट्रम्मैदत्तस्वाहाशक्करीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदा
राष्ट्रम्मैदत्तस्वाहाजनभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्त्थरा

 ष्ट्रदाराष्ट्रम्मेदत्तस्वाहाविश्वभृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःस्व
 राजस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥ मधुमतीर्म्मधुमतीभिःपृच्यन्ताम्म
हिक्षत्रंक्षत्रियायवन्वानाऽअनाधृष्टाःसीदतसहौजसोमहिक्षत्रंक्षत्रि
यायदधतीः ४ शतम् ४०० ॥ सोमस्यत्विषिः। सोमस्यत्विषिरसितवे
वमेत्विषिर्भूयात्॥ अग्नयेस्वाहासोमायस्वाहासवित्रेस्वाहासरस्व
त्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्लो
कायस्वाहांशायस्वाहाभगायस्वाहार्यम्णेस्वाहा ५ पवित्रेस्थः

।पवित्रेस्त्थोवैष्णव्यौसवितुर्व्वःप्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेणपवित्त्रे
णसूर्य्यस्यरश्मिभिः॥अनिभृष्टमसिवाचोबन्धुस्तपोजाःसोमस्य
दात्रमसिस्वाहाराजस्वः६ सधमादोद्युम्निनीः।सधमादोद्युम्नि
नीरापऽएताऽअनाधृष्टाऽअपस्योवसानाः॥पस्त्यासुचक्क्रेवरुणःस
धस्थमपाᳬशिशुर्म्मातृतमास्वन्तः७ क्षत्रस्योल्बम्।क्षत्रस्योल्ब
मसिक्षत्रस्यजराय्वसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्यवा
र्त्रघ्नमसिमित्रस्यासिवरुणस्यासित्वयायंवृत्रंबधेत्॥दृवासिरुजा

संहि· सिक्षुमासि ।। पात्यैनम्प्राञ्चम्पात्यैनम्प्रत्यञ्चम्पात्यैनन्तिर्य्यञ्चन्दिग्भ्यः पू·अ·
६३ पात ८ आविर्म्मर्य्याहः। आविर्म्मर्य्या ऽआवित्तो ऽअग्निर्गृहपतिरावित्त ऽ १०
इन्द्रोवृद्धश्श्रवा ऽआवित्तौमित्रावरुणौधृतव्व्रतावावित्तः पूषाविश्श्ववे
दा ऽआवित्तेद्यावापृथिवीविश्श्वशम्भुवावावित्तादितिरुरुशर्म्मा ९ अवे
ष्ट्रादन्दशूकोहः। अवेष्ट्रादन्दशूकाः प्प्राचीमारोहगायत्त्रीत्वावतुरथन्त
रꣳसामत्रिवृत्स्तोमोवसन्तऽऋतुर्ब्रह्मद्रविणन्दक्षिणामारोह १० द ६३
क्षिणामारोह। त्रिष्टुप्त्वावतुबृहत्सामपञ्चदशस्तोमोग्ग्रीष्मऽऋतुः

संहि षसोऽविरोक ऽ उभाविन्द्रा ऽ उदिथः सूर्य्यश्च ॥ आरोहतंवरुणमित्रगर्त्तन्त शु·अ·
६४ तंश्चक्षाथामदितिन्दितिञ्चमित्रोसिवरुणोसि १६ सोमस्यत्वाद्युम्नेना १०
भिषिञ्चाम्यग्नेर्भ्राजसासूर्य्यस्यवर्च्चसेन्द्रस्येन्द्रियेण। क्षत्राणा
ङ्क्षत्रपतिरेध्यतिदिद्यून्पाहि १७ इमन्देवाः। इमन्देवा ऽ असपत्नꣳसु
वद्ध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रिया
य॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविश ऽ एषवोमीराजासोमो- ६४
स्माकंब्राह्मणानाꣳराजा १८ प्रपर्वतस्य। वृषभस्यपृष्ठान्नावश्च

रन्तिस्वासिचेऽइयानाः॥ नाऽआवेष्टन्नघुरागुदक्काऽऽअहिर्म्बुध्न्य
मनुरीयमाणाः॥ विष्णोर्विक्रमणमसिविष्णोर्विक्रान्तमसिवि
ष्णोः क्रान्तमसि १९ प्रजापतेन। त्वदेतान्यन्यो विश्वारूपाणिप
रिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्यपितासाव
स्यपितावयꣳ स्यामपतयोरयीणाꣳ स्वाहा॥ रुद्रयत्तेक्रिविपर
न्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा २० इन्द्रस्यवज्रोऽसि। इन्द्रस्यव
ज्रोऽसिमित्रावरुणयोस्त्वाप्रशास्त्रोः प्रशिषायुनज्मि॥ अव्यथा

यैत्वास्वधायैत्वारिष्टोऽअर्ज्जुनोमरुताम्प्रसवेनजयापाममनसासमिन्द्रि-
येण २१ माते। मातऽइन्द्रतेव्वयन्तुराषाडयुक्तासोऽअब्ब्रह्मताव्विदसा-
म॥ निष्टारथमधियंव्वज्ज्रहस्तारश्मीन्देवयमसेस्वश्वान् २२ अग्नये
गृहपतये। अग्नयेगृहपतयेस्वाहासोमायव्वनस्प्पतयेस्वाहामरुता
मोजसेस्वाहेन्द्रस्येन्द्रियायस्वाहा। पृथिविमातर्म्मामाहिꣳसीर्म्मोऽ
अहन्त्वाम् २३ हꣳसः शुचिषत्। हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता
व्वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजा

ऽअद्रिजाऽऋतम्बृहत् २४ इयदसि। इयदस्यायुरस्यायुर्म्मयिधेहि
युङ्ङसिवर्च्चोसिवर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि॥ इन्द्रस्यवांवी
र्य्यकृतोबाहूऽअभ्युपावहरामि २५ स्योनासि। सुषदासिक्षत्रस्ययो
निरसि॥ स्योनामासीदसुषदामासीदक्षत्रस्ययोनिमासीद २६ निषसा
द। धृतव्रतोवरुणः पस्त्यास्वा। साम्म्राज्ज्यायसुक्रतुः २७ अभिभूर
सि। अभिभूरस्येतास्तेपञ्चदिशः॥ कल्प्यन्ताम्ब्रह्मँस्त्वम्ब्रह्मासिस
वितासिसत्यप्रसवोवरुणोसिसत्यौजाऽइन्द्रोसिविशौजारुद्रोसिसुशे

संहि॰ वः॥ बहुकारश्रेयस्करभूयस्करेन्द्रस्यवज्ज्रोसितेनमेरध्य २८ अग्निः पू॰अ॰
६६ पृथुः। अग्निःपृथुर्द्धर्म्मणस्प्यतिर्ज्जुषाणो ऽ अग्निःपृथुधर्म्मणस्प्य १०
तिराज्ज्यस्यवेतुस्वाहास्वाहाकृताः। सूर्य्यस्यरश्मिभिर्य्यतद्ध्वꣳसजा
तानाम्मद्ध्यमेष्ठ्याय २९ सवित्राप्प्रसवित्रा। सरस्वत्यावाचात्वष्ट्रारूपैः
पूष्णापशुभिरिन्द्रेणास्मेबृहस्प्यतिनाब्रह्मणावरुणेनौजसाग्निना
तेजसासोमेनराज्ञाविष्णुनादशम्म्यादेवतयाप्प्रसूतःप्प्रसर्प्पामि ३० ६६
अश्विभ्याम्प्पच्यस्व। अश्विभ्याम्प्पच्यस्वसरस्वत्यैपच्यस्वेन्द्रायसुत्रा

म्मोपभक्षयस्व ॥ वायुः पूतः पवित्रेण प्रत्यङ्सोमो ऽअतिस्रुतः ॥ इन्द्रस्य
युज्यः सखा ३१ कुविदङ्ग । यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इ
हेहैषां कृणुहि भोजनानि ये बर्हिषो नम ऽउक्तिं यजन्ति । उपयामगृहीतो
ऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ३२ युवꣳ सुरामम् । युव
ꣳ सुराममश्विना नमुचावासुरे सचा ॥ विपिपाना शुभस्पती ऽइन्द्रं कर्म
स्वावतम् ३३ पुत्रमिव पितरौ । पुत्रमिव पितरावश्विनोभेन्द्रावथुः का
व्यैर्दꣳसनाभिः ॥ यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभि-

संहि॰ ष्ष्याक्क ३४॥८॥ इतिश्रीसंहितायांदशमोऽध्यायः१० युञ्जानःप्प्रथम पू॰अ॰

६७ म्। युञ्जानःप्प्रथमम्मनस्तत्त्वायसविताधियः। अग्ग्नेर्ज्ज्योतिर्न्निचाय्य्य ११

पृथिव्याऽअध्याभरत्१ युक्क्तेनमनसा। वयन्देवस्यसवितुःसवे।स्वर्ग्ग्याय

शक्क्त्या२ युक्त्वायसविता।देवान्त्स्वर्य्यतोधियादिवम्।बृहज्ज्योतिःकरि

ष्यतःसविताप्प्रसुवातितान्३ युञ्जतेमनः युञ्जतेमनऽउतयुञ्जतेधि

योव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः॥ व्विहोत्र्त्रादधेवयुनाविदेकऽइन्म्मही ६७

देवस्यसवितुःपरिष्टुतिः४ युजेवाम्।युजेवाम्ब्रह्मपूर्व्यन्नमोभिर्व्विश्लोके

ऽएतुपथ्येवसूरेः। शृण्वन्तुविश्वेऽअमृतस्यपुत्राऽआयेधामानिदिव्यानि
तस्थुः ५ यस्यप्रयाणम्। यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहि
मानमोजसा। यःपार्थिवानिविममेसऽएतशोरजांꣳसिदेवःसवितामहित्व
ना ६ देवसवितः। देवसवितःप्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय॥दिव्योगं
धर्वःकेतपूःकेतन्नःपुनातुवाचस्पतिर्वाचन्नःस्वदतु ७ इमन्नः इमन्नो
देवसवितर्यज्ञम्प्रणयदेवाव्यꣳसखिविदꣳसत्राजितन्धनजितꣳस्वर्जि
तम्। ऋचास्तोमꣳसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्तनिस्वाहा ८

संहि· देवस्यत्वा। सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ आददे पू·भ·
६८ गायत्रेणछन्दसाङ्गिरस्वत्पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्व ११
दाभरत्रैष्टुभेनछन्दसाङ्गिरस्वत् ९ अभ्रिरसि। नार्य्यसित्वयावयमग्नि
ठं शकेमखनितुठं सधस्थऽआ। जागतेनछन्दसाङ्गिरस्वत् १० हस्तऽ
आधायसविताबिभ्रदभ्रिठं हिरण्ययीम्॥ अग्नेर्ज्योतिर्निचाय्य
पृथिव्याऽअध्याभरदानुष्टुभेनछन्दसाङ्गिरस्वत् ११ प्रतूर्त्तंवाजिन्। ६८
प्रतूर्त्तंवाजिन्नाद्रववरिष्ठामनुसंवतम्॥ दिवितेजन्मपरममन्तरिक्षे

तवनाभिः पृथिव्यामधियोनिरित् १२ युञ्जाथाᳩ रासभम्। युञ्जा
थाᳩ रासभंय्युवमुस्मिन्न्यामेवृषण्वसू। अग्निम्भरन्तमस्म्मयुम्
१३ योगेयोगेतवस्तरम्। योगेयोगेतवस्तरंवाजेवाजेहवामहे॥ सखा
यऽइन्द्रमूतये १४ प्रतूर्वन्नेहि। प्रतूर्वन्नेह्यवक्रामन्नशस्तीरुद्रस्य
गाणपत्यम्मयोभूरेहि॥ उर्वन्तरिक्षंवीहिस्वस्तिगव्यूतिरभयाकृण्व
न्पूष्णासयुजासह १५ पृथिव्याः सधस्थात्। पृथिव्याः सधस्था
दग्निम्पुरीष्यमङ्गिरस्वदाभराग्निम्पुरीष्यमङ्गिरस्वदच्छेमोऽग्निम्पु

संहि॰ रीष्ष्यमङ्गिरस्वद्भरिष्ष्यामः १६ अन्वग्निः। अन्वग्निरुषसामग्र पू॰अ॰
६९ मख्ख्यदन्वह्नानिप्प्रथमोजातवेदाः। अनुसूर्य्यस्यपुरुत्राचरश्म्मीन ११
नुद्यावापृथिवीऽआततंथ १७ आगत्त्यवाजी। आगत्त्यवाज्ज्यद्ध्वानꣳ
सर्व्वाम्मृधोविधूनुते ॥ अग्निꣳसधस्थेमहतिचक्षुषानिचिकीषते १८
आक्रम्म्यवाजिन्। आक्रम्म्यवाजिन्पृथिवीमग्निमिच्छरुचात्त्वम ॥
भूम्म्याव्वृत्त्वायनोब्रूहियतःखनेमतंव्वयम् १९ द्यौस्ते। पृष्ठम्पृथिवीस ६९
धस्थमात्मान्तरिक्षꣳसमुद्रोयोनिः ॥ व्विख्यायचक्षुषात्त्वमभिति

ष्ठ पृतन्न्युतः २० उत्क्क्राम। महुते सौभगायास्म्मादास्त्थानाद्द्रविणोदा व्वा
जिन्॥ व्वयꣳ स्यामसुमतौ पृथिव्व्याऽ अग्निङ्खनन्तऽउपस्त्थेऽअस्याः २१
उदक्क्रमीत्। उदक्क्रमीद्द्रविणोदा व्वाज्ज्यर्व्वाकः सुलोकꣳ सुकृतम्पृथिव्व्या
म्॥ ततः खनेमसुप्प्रतीकमग्निꣳ स्वोरुहाणाऽ अधिनाकमुत्तमम् २२ आ
त्वा। जिघर्म्मिमनसाघृतेनप्प्रतिक्षियन्तम्भुवनानिव्विश्श्वा॥ पृथुन्तिरश्श्चा
व्वयसाबृहन्तंव्व्यचिष्ठमन्नैरभसन्दृशानम् २३ आविश्श्वतः। प्प्रत्यञ्च
ञ्जिघर्म्म्यरक्षसामनसातज्जुषेत॥ मर्य्यश्श्रीस्पृहयद्वर्णोऽ अग्निर्न्ना

संहि· भिमृशीतन्त्वाजर्भुराणः २४ परिवाजपतिः। परिवाजपतिः कविरग्निर्ह पू·अ·
७० व्यान्न्यक्रमीत्॥ दधद्रत्नानि दाशुषे २५ परि त्वाग्ने पुरं वयं विप्रं सहस ११
हस्य धीमहि॥ धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् २६ त्वमग्ने। द्यु
भिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥ त्वं वनेभ्यस्त्वमोषधी

भ्यस्त्वन्नृणान्नृपते जायसे शुचिः २७ देवस्य त्वा। सवितुः प्रसवेऽश्वि
नोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥ पृथिव्याः सधस्थादग्निम्पुरीष्य म ७०
ङ्गिरस्वत्खनामि॥ ज्योतिष्मन्तन्त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्य

नम्॥ शिवम्प्रजाभ्योऽहिंसन्तम्पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्वत्त्वनामः २८ अपाम्पृष्ठम्। अपाम्पृष्ठमसि योनिरग्नेःसमुद्रमभितःपिन्वमानम्॥ वर्द्धमानो महाँ२॥ऽ आचपुष्करेदिवो मात्रया वरिम्णा प्रथस्व
२९ शर्म्मच। शर्म्मचस्थो वर्म्मचस्थोऽच्छिद्रेबहुलेऽउभे॥ व्यचस्वतीसंवसाथाभृतमग्निम्पुरीष्यम्
३० संवसाथाम्। संवसाथाᳬस्वर्विदासमीचीऽउरसात्त्मना॥ अग्निमन्तर्भरिष्यन्तीज्ज्योतिष्मन्तमजस्रमित्
३१ पुरीष्यो सिविश्वभराऽअथर्वात्त्वाप्प्रथमोनिरमन्थदग्ने॥त्वामे

ग्नेपुष्कराादध्यथर्वाुानिरमन्थत ॥ मूर्ध्नोविश्वस्यवाघतः ३२ तमुत्वा।द

ध्यङ्ङृषिःपुत्रऽईधेऽ अथर्वणः।वृत्रहणम्पुरन्दरम् ३३ तमुत्वा।पाथ्यो

वृषासमीधेदस्युहन्तमम् ॥ धनञ्जयर्ठ॰रणेरणे ३४ सीदहोतःस्वऽउलो

केचिकित्वान्सादयायज्ञर्ठ॰सुकृतस्ययोनौ ॥ देवावीर्देवाहविषायजा

स्यग्नेबृहद्यजमानेवयोधाः ३५ निहोता।होतृषदनेविदानस्त्वेषोदीदि

वाꣳऽअसदत्सुदक्षः ॥ अदब्धव्रतप्रमतिर्वसिष्ठःसहस्रम्भरःशुचिजि

ह्वोऽअग्निः ३६ सर्ठ॰सीदस्व। सर्ठ॰सीदस्वमहाꣳऽअसिशोचस्वदेववी

नमः ॥ विधुममग्ग्नेऽअरुषम्मियेध्यसृजप्प्रशस्तदर्शतम् ३७ अपोदेवीः
। अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्प्रजाभ्भ्यः ॥ तासामास्थानादुज्जि
हतामोषधयःसुपिप्पलाः । ३८ सन्ते। वायुर्म्मातरिश्श्वादधातूत्तानाया
हृदयंय्यद्विकस्तम् ॥ योदेवानाञ्चरसिप्प्राणथेनकस्मैदेववषडस्तुतु
भ्भ्यम् ३९ सुजातोज्ज्योतिषा। सहशर्म्मवरूथमासदत्स्वः ॥ वासोऽ
अग्ग्नेविश्श्वरूपꣳसव्व्ययस्वविभावसो ४० उदुतिष्ठ। स्वध्वरावानो
देव्व्याधिया ॥ दृशेचभासाबृहतासुशुक्क्वनिराग्ग्नेयाहिसुशस्तिभिः

४१ ऊर्द्ध्व ऽऊषुणः। ऊर्द्ध्व ऽऊषुण ऽऊतयेतिष्ठादेवोनसविता।। ऊर्द्ध्वोवा-
जस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे ४२ सजातः। सजातोगर्ब्भो
असिरोदस्योरग्नेचारुर्विभृतऽओषधीषु।। चित्रः शिशुः परितमाᳬस्य
क्तून्प्रमातृभ्योऽअधिकनिक्रदद्गाः ४३ स्थिरोभव। वीड्वङ्गऽआशुर्भ
ववाज्यर्वन्।। पृथुर्भववसुषदस्त्वमग्नेः पुरीषवाहणः ४४ शिवोभव
प्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः।। माद्यावापृथिवीऽअभिशोचीर्म्मान्तरि ७२
क्षम्मावनस्प्पतीन् ४५ प्रैतु। वाजीकनिक्रदन्नानदद्रासभःपत्वा।। भर

न्नग्निम्पुरीष्य्यम्माप्पाद्द्याप्सुषह्पुरा ॥ वृषाग्निंवृषणम्भरन्नपाङ्गर्ब्भर्ठ समुद्रि
येम् ॥ अग्न ऽ आयाहिवीतये ४६ ऋतर्ठ सत्यमृतर्ठ सत्यमग्निम्पुरीष्य्यमङ्ग
ङ्गिरस्वद्भरामः ॥ ओषधयः प्रतिमोदद्ध्वमग्निमेतर्ठ शिवमायन्तमब्भ्यत्रयु
ष्म्माः ॥ व्यस्यन्विश्वा ऽ अनिरा ऽ अमीवानिषीदन्नो ऽ अपदुर्म्मतिञ्जहि
४७ ओषधयः प्रति । ओषधयः प्रतिगृभ्णीतपुष्प्यवतीः सुपिप्पलाः ॥ अ
यंवोगर्ब्भ ऽ ऋत्वियः प्रत्नर्ठ सधस्थमासदत् ४८ विपाजसा । पृथुना
शोशुचानोबाधस्वद्विषोरक्षसो ऽ अमीवाः ॥ सुशर्म्मणोबृहतः शर्म्मणि

स्याम्ग्नेरहर्ठ॰सुहवंस्यप्रणीतौ ४९ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे
दधातन। महेरणायचक्षसे ५० योवः॥शिवतमोरसस्तस्यभाजयतेह
हनः॥उशतीरिवमातरः ५१ तस्माऽअरम्।तस्माऽअरङ्गमामवो
यस्यक्षयायजिन्वथ। आपोजनयथाचनः ५२ मित्रःसर्ठ॰सृज्य
॥पृथिवीम्भूमिञ्चज्ज्योतिषासह॥सुजातञ्जातवेदसमयक्ष्मायत्वा
सर्ठ॰सृजामिप्रजाभ्यः ५३ रुद्राःसर्ठ॰सृज्य।पृथिवीम्बृहज्ज्योतिः
समीधिरे॥तेषाम्भानुरजस्रऽइच्छुक्रोदेवेषुरोचते ५४ सर्ठ॰सृष्टांवसु

भीरुद्धैद्धीरैः कर्म्मण्ण्याम्मृदम॥ हस्ताब्भ्याम्मृद्दीकृत्त्वासिनीवालीकृणो
तुताम् ५५ सिनीवालीसुकपर्द्दा॥सुकुरीरास्वौपशा॥सातुभ्भ्यमदिते
मुत्ख्योरवान्दधातुहस्तयोः ५६ उषाङ्कृणोतु। शक्त्याबाहुब्भ्यामदितिर्द्धि
या॥मातापुत्त्रं ष्यथोपस्थेसाग्ग्निम्बिभर्त्तुगर्ब्भऽआ॥मखस्यशिरोसि
५७ घसेवस्वा॥कृण्वन्तुगायत्त्रेणछन्दसाङ्गिरस्वद्ध्रुवासिपृथिव्व्यसि
धारयामयिप्प्रजां७ रायस्प्पोषङ्गौपत्यं सुवीर्य्यं सजातान्न्यज
मानायरुद्द्रास्त्वाकृण्वन्तुत्त्रैष्टुभेनछन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमन

संहि॰ सिधारयामयिप्रजाꣳरायस्पोषङ्गौपत्यꣳसुवीर्य्यꣳसजातान्यज पू॰अ॰
७४ मानायादित्यास्त्वाकृण्वन्तुजागतेनछन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसि ११
धारयामयिप्रजाꣳरायस्पोषङ्गौपत्यꣳसुवीर्य्यꣳसजातान्यजे-
मानायविश्वेत्त्वादेवावैश्वानराꣳकृण्वन्त्वानुष्टुभेनछन्दसाङ्गिर
स्वद्ध्रुवासिदिशोसिधारयामयिप्रजाꣳरायस्पोषङ्गौपत्यꣳसुवीर्य्यꣳ
सजातान्यजेमानाय ५८ अदित्यैरास्न्ना।अदित्यैरास्न्नास्यदितिष्टेबि ७४
लंङ्गृभ्णातु॥कृत्वायसामहीमुखाम्मृन्मयींय्योनिमग्नये॥पुत्रेभ्यः

प्प्रायच्छददितिः श्रपयानिति ५९ वसवस्त्वा॥ धूपयन्तुगायत्रेणछन्दसा
ङ्गिरस्वद्रुद्रास्त्वाधूपयन्तुत्रैष्टुभेनछन्दसाङ्गिरस्वदादित्यास्त्वाधूपयन्तु
जागतेनछन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराधूपयन्त्वानुष्टुभेनछन्द
साङ्गिरस्वदिन्द्रस्त्वाधूपयतुवरुणस्त्वाधूपयतुविष्णुस्त्वाधूपयतु ६०
अदितिष्ट्वा॥ देवीविश्वदेव्यावतीपृथिव्याःसधस्थेऽअङ्गिरस्वत्खन
त्ववटदेवानान्त्वापत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याःसधस्थेऽअं
ङ्गिरस्वद्दधतूखेधिषणास्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याःसधस्थे

संहि ऽअङ्गिरस्वदु भीन्धनामुखेघरुश्चीक्ष्यादेवीर्विश्वदेव्यावती॑ःपृथिव्या॑ऽस पू॰अ॰
७५ धस्थे॑ऽअङ्गिरस्वच्छुपयन्तूखे॑ऽग्गनास्त्वादेवीर्विश्वदेव्यावती॑ःपृथिव्या॑ऽ ११
सधस्थे॑ऽअङ्गिरस्वत्खनन्तूखेजनयस्त्वाछिन्नपत्न्नादेवीर्विश्वदेव्याव-
ती॑ःपृथिव्या॑ऽसधस्थे॑ऽअङ्गिरस्वत्संचन्तूखे६१ मित्रस्यचर्षणीधृत॑ः॥मित्र
स्यचर्षणीधृतोवोदेवस्यसानसि॥द्युम्नञ्चित्रश्रवस्तमम् ६२ देव
स्त्वा॥सवितोद्वपतुसुपाणि॑ःस्वङ्गुरि॑ःसुबाहुरुतशक्त्या॥अव्यथमा ७५
नापृथिव्यामाशादिशऽआपृण ६३ उत्थायबृहती॥भवोदुत्तिष्ठध्रुवात्त्व

त्त्वम्॥ मित्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽ एषामाभेदि ६४ वसवस्त्वा
। छृन्दन्तु गायत्त्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वाछृन्दन्तु त्त्रैष्टुभेन छन्दसाङ्गि
रस्वदादित्यास्त्वा छृन्दन्तु जागतेन छन्दसाङ्गिरस्वद्विश्श्वेत्त्वा देवा वैश्श्वान
राऽ आछृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत ६५ आकूतिमग्ग्निम्प्रयुजꣳ
स्वाहा मनो मेधामग्ग्निम्प्रयुजꣳ स्वाहा चित्त्तं विज्ञातमग्ग्निम्प्रयुजꣳ स्वाहा
वाचो विधृतिमग्ग्निम्प्रयुजꣳ स्वाहा प्प्रजापतये मनवे स्वाहाग्ग्नये वैश्श्वान
राय स्वाहा ६६ विश्श्वो देवस्य॥ नेतुर्म्मर्त्तो वुरीत सक्ख्यम्॥ विश्श्वो रायऽइ

संहि· षुष्यतिद्युम्नंवृणीतपुष्यसेस्वाहा ६७ मासु। भित्थामासुरिषोम्बधृष्णु पू·अ·
७६ वीरयस्वसु॥ अग्निश्चेदङ्करिष्यथः ६८ दृꣳहस्वदेवि। पृथिविस्वस्तयऽआ ११
सुरीमायास्वधयाकृतासि॥ जुष्टंदेवेभ्यऽइदमस्तुहव्यमरिष्टात्वमुदिहि
यज्ञेऽअस्मिन् ६९ द्रुवन्नःसर्पिरासुतिः प्रत्नोहोतावरेण्यः॥ सहसस्पु
त्रोऽअद्भुतः ७० शतम् ५००॥ परस्याऽअधि॥ संवतोवराँ२ऽअभ्यातर॥
यत्राहमस्मिताँ२ऽअव ७१ परमस्याः परावतः॥ परमस्याः परावतो ७६
रोहिदश्वऽइहागहि॥ पुरीष्यः पुरुप्रियोग्नेत्वन्तरामृधः ७२ यदग्ने। य

दग्ग्नेकानिकानिचिदातेदारूणिदध्मसि॥सर्व्वन्तदस्तुतेघृतन्तज्जुषस्वयवि
ष्ठ्य ७३ यदत्ति॥यदत्त्युपजिह्विकायद्वम्म्रोऽअतिसर्प्पति॥सर्व्वन्तदस्तुतेघृ
तन्तज्जुषस्वयविष्ठ्य ७४ अहरहरप्प्रयावम्॥ अहरहरप्प्रयावम्भरन्तोश्श्वा
येवतिष्ठतेघासमस्मै॥रायस्प्पोषेणसमिषामदन्तोग्ग्नेमातेप्प्रतिवेशारिषा
म ७५ नाभापृथिव्व्याः॥समिधानेऽअग्ग्नौरायस्प्पोषायबृहतेहवामहे॥इ
रम्मदम्बृहदुक्थँय्यजत्त्रञ्जेतारमग्ग्निम्पृतनासुसासहिम् ७६ याः सेनाः
॥याः सेनाःऽअभीत्त्वरीराव्व्याधिनीरुगणाऽउत॥येस्तेनायेचतस्कारास्ताँ

स्तेऽ अग्ग्नेपिदधाम्म्यास्ये ७७ दꣳष्ट्राब्भ्याम्मलिम्म्लून्॥दꣳष्ट्राब्भ्याम्मलि
म्म्लून्जम्भ्यैस्तस्कराँ२।ऽउत॥हनुब्भ्याꣳस्तेनान्भगवस्ताँस्त्वङ्खादसुखादि
तान् ७८ येजनेषु।मलिम्म्लवस्तेनासस्तस्करावने॥येकक्षेष्वघायवस्ताँ
स्तेदधामिजम्भयोः ७९ योऽअस्म्मब्भ्यम्।योअस्म्मब्भ्यमरातीयाद्यश्चनो
द्वेषतेजनः॥निन्दाद्योऽअस्म्मान्धिप्प्साच्चसर्व्वन्तम्मस्म्मसाकुरु ८० सꣳ
शितम्मे॥सꣳशितम्मेब्रह्मसꣳशितंव्वीर्य्यम्बलम्॥सꣳशितङ्क्षत्रञ्जि-
ष्णुयस्याहमस्म्मिपुरोहितः ८१ उदेषाम्॥उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअ

थोबलम् ॥ क्षिएगोमि ब्रह्मणामिन्नानुन्नयामिस्वा रँ।ऽ अहम् ८३ अन्न
पतेन्नस्य ॥ नोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषुऽऊर्ज्ज-
न्नोधेहिद्विपदेचतुष्पदे ८३ इतिसंहितायांएकादशोऽध्यायः ११ दृशा
नोरुक्मः। दृशानोरुक्मऽउर्व्याव्यद्यौद्युर्म्मर्षमायुः श्रियेरुचानः अग्नि
रमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः १ नक्कोषासासमन
सा ॥ विरूपेधापयेतेशिशुमेकंसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्विभा
तिदेवाऽअग्निन्धारयन्द्रविणोदाः २ विश्वारूपाणि ॥ विश्वारूपाणिप्रति

मुञ्चतेकृधिः प्रासावीद्भद्रंद्विपदेचतुष्पदे ॥ विनाकमख्यत्सवितावरे-
ण्योनुप्रयाणमुषसोविराजति ३ सुपर्णोसि ॥ गुरुत्मांस्त्रिवृत्तेशिरोगाय-
त्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमऽआत्माछन्दांस्यङ्गानियजूंषिना-
म ॥ सामतेतनूर्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः सुपर्णोसि
गुरुत्मान्दिवङ्गच्छस्वःपत ४ विष्णोः क्रमः ॥ विष्णोः क्रमोसिसपत्नहा
गायत्रञ्छन्दऽआरोहपृथिवीमनुविक्रमस्वविष्णोः क्रमोस्यभिमाति-
हात्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनुविक्रमस्वविष्णोः क्रमोस्यरातीयतो

हृन्ताजागतञ्छन्दऽआरोहदिवमनुविक्क्रमस्वविष्णोः क्क्रमोसिश
त्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनुविक्क्रमस्व ५ अक्क्रन्ददु
ग्निः॥ अक्क्रन्ददग्निस्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः समञ्ज
न्॥ सद्योजज्ज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनाभात्यन्तः
६ अग्नेभ्यावर्त्तिन्॥ अग्नेभ्यावर्त्तिन्नभिमानिवर्त्तस्वायुषावर्च्चसा
प्रजयाधनेन॥ सन्न्यामेधयारय्यापोषेण ७ अग्नेऽअङ्गिरः॥ श
तन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः॥ अधापोषस्यपोषेणपुनर्न्नो

नुष्टमार्कृधिपुनर्न्नोरयिमार्कृधि ८ पुनरूर्ज्जा॥न्निवर्त्तस्वपुनरग्नऽइ
षायुषा॥पुनर्न्नःपाह्यꣳहसः॥९॥सहरय्या॥निवर्त्तस्वाग्नेपिन्वस्व
धारया॥विश्वप्प्स्न्याविश्वतस्प्परि १० आत्वा॥हार्षमन्तरभूर्द्ध्रुवस्ति
ष्ठाविचाचलिः॥विशस्त्वासर्व्वावाञ्छन्तुमात्वद्राष्ट्रमधिभ्रशत् ११ उदुत्त
मम्॥उदुत्तमंवरुणपाशमस्म्मदवाधमंविमध्यमꣳश्रथाय॥अथाव
यमादित्यव्रतेतवानागसोऽअदितयेस्याम १२ अग्नेबृहन्॥अग्नेबृह
न्नुषसामूर्द्ध्वोऽअस्थान्निर्ज्जगन्वान्तमसोज्ज्योतिषागात्॥अग्नि-

र्भानुना रुशता स्वङ्ग ऽ आजातो विश्वा सद्मान्यप्राः १३ हꣳसः शुचि
षत् ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऽ ऋतजा ऽ अद्रिजा ऽ ऋतं बृहत्
१४ सीद त्वम् । सीद त्वम्मातुरस्या ऽ उपस्थे विश्वान्यग्ने वयुनानि वि
द्वान् । मैनान्तपसा मार्चिषाभिशोचीरन्तरस्याꣳ शुक्रज्ज्योतिर्विभाहि
१५ अन्तरग्ने ॥ रुचा त्वमुखायाः सदने स्वे ॥ तस्यास्त्वꣳ हरसा तपञ्जा
तवेदः शिवो भव १६ शिवो भूत्वा ॥ मह्यमग्ने ऽ अथो सीद शिवस्त्वम्

॥शिवाः कृत्वादिशः सर्वाः स्वंख्योनिमिहासदः १७ दिवस्परि॥प्रथ
मञ्जज्ञेऽअग्निरस्मद्द्वितीयम्परिजातवेदाः॥तृतीयमप्सुनृमणा
ऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः १८ विद्माते॥अग्नेत्रेधात्रया
णिविद्मातेधामविभृतापुरुत्रा॥विद्मातेनामपरमङ्गुहायद्विद्मातमु
त्संयतऽआजगन्थ १९ समुद्रेत्वा॥नृमणाऽअप्स्वन्तर्नृचक्षाऽईधेदि
वोऽअग्नऊधन्॥तृतीयेत्वारजसितस्थिवांसमपामुपस्थेमहिषाऽ
अवर्द्धन् २० अक्रन्ददग्निः॥अक्रन्ददग्निस्तनयन्निवद्यौः क्षामारे

रिहद्वीरुध॑÷ समञ्जन् ॥ सुद्योजज्ञानो विहीमिद्धो ऽ अख्यदारोदसी-
भानुनाभात्यन्त॑ः १२ श्रीणामुदार॑ः ॥ श्रीणामुदारोधरुणोरयीणा
म्मनीषाणाम्प्रार्प्पण॑ः सोमगोपा॑ः ॥ वसु॑÷ सूनु॑ः सहसो ऽ अप्सुराजा
विभात्यग्ग्र ऽ उषसामिधान॑ः २२ विश्वस्यकेतु॑ः ॥ विश्वस्यकेतुर्ब्भुव
नस्यगर्ब्भ ऽ आरोदसी ऽ अपृणाज्जायमान॑ः । वीडुञ्चिदद्रिमभिनत्परा
यञ्जनायदग्निमयजन्तपञ्च २३ उशिक्पावक॑ः ॥ उशिक्पावको ऽ अ
रति॑ः सुमेधामर्त्तेष्व्वग्निरमृतोनिधायि ॥ इयर्त्तिधूममरुषम्भरिब्भ्रदु

संहि॰ छुक्रेणशोचिषाद्यामिनक्षन् २४ दृशानोरुक्मऽ॥ दृशानोरुक्मऽउर्व्या पू॰अ॰
८१ व्यद्यौद्दुर्मर्षमायुः श्रियेरुचानः॥ अग्निरमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौ १२
रजनयत्सुरेताः २५ यस्ते॥ अद्यकृणवद्भद्रशोचेपूपन्देवघृतवन्तमग्ने॥
प्रतन्नयप्प्रतरंवस्योऽअच्छाभिसुम्नन्देवभक्तंयविष्ठ २६ आतम्॥ आ
तम्भजसौश्रवसेष्वग्नऽउक्थऽउक्थऽआभजशस्यमाने॥ प्रियःसू
र्य्ये प्रियोऽअग्नाभवात्युज्जातेनभिनदद्उज्जनित्वैः २७ त्वामग्ने॥ ८१
त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्य्याणि॥ त्वयासह

द्रविणमिच्छमानाव्व्रजङ्गोमन्तमुशिजोव्विवव्रुः २८ अस्त्ताव्यग्निर्न्नराᳬं
स्रुशेवोव्वैश्श्वानरऽ ऋषिभिः सोमगोपाः ॥ अद्वेषे द्यावापृथिवीहुवेम
देवाधत्तरयिमस्म्मेसुवीरम् २९ समिधाग्निम् ॥ समिधाग्निन्दुवस्यत
घृतैर्व्वोधयतातिथिम् ॥ आस्मिन्न्हव्याजुहोतन ३० उदुत्त्वा ॥ उदुत्त्वा
व्विश्श्वेदेवाऽ अग्नेभरन्तुचित्तिभिः ॥ सनोभवशिवस्त्वᳬं सुप्प्रतीकोव्वि
भावसुः ३१ प्रेत् ॥ प्रेदग्नेज्ज्योतिष्म्मान्याहिशिवेभिरर्च्चिभिष्ट्वम् ॥ बृ
हद्भिर्भानुभिर्ब्भासन्न्माहिᳬंसीस्तन्न्वाप्प्रजाः ३२ अक्रन्ददग्निः ॥ अ

क्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन्।।सद्योजज्ञा
नोविहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्यन्तः ३३ प्रप्प्रायम्।।प्रप्प्रा
यमग्निर्ब्भरतस्यशृण्वेविर्यत्सूर्य्येनरोचतेबृहद्भाः।।अभियःपुरुम्पृतना
सुतस्थौदीदायदैव्व्योऽअतिथिःशिवोनः ३४ आपोदेवीः।।आपोदेवीःप्र
तिगृब्भ्णीतभस्मैतत्स्योनेकृणुद्ध्वंसुरभाऽउलोके।।तस्मैनमन्ताञ्जनयः
सुपत्नीर्म्मातेवपुत्रम्बिभृताप्स्वेनत् ३५ अप्प्स्वग्ने।।अप्प्स्वग्नेसधि
ष्टवसौषधीरनुरुध्यसे।।गर्भेसञ्जायसेपुनः ३६ गर्ब्भोऽअसि।।गर्ब्भोअस्यो

षधीनाङ्गर्ब्भो वनस्प्पतीनाम्॥ गर्ब्भो विश्श्वस्य भूतस्याग्ग्नेगर्ब्भोऽअपामसि ३७
प्रसद्य भस्म्मना॥ प्रसद्य भस्म्मना योनिमपश्श्च पृथिवीमग्ग्ने॥ सर्ठं॰सृज्ज्य मा
तृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ३८ पुनरासद्य। पुनरासद्य सदनमपश्श्च पृ
थिवीमग्ग्ने॥ शेषे मातुर्य्यथोपस्थेन्तरस्याᳬ शिवतमः ३९ पुनरूर्ज्जा॥ नि
वर्त्तस्व पुनरग्ग्नऽइषायुषा॥ पुनर्न्नः पाह्यर्ठं॰हसः ४०॥ सहरय्या निवर्त्तस्वाग्ग्ने पि
न्वस्व धारया॥ विश्श्वप्स्न्या विश्श्वतस्परि ४१ बोधा मे॥ ऽअस्य वर्च्चसो य
विष्ठ मर्ठं॰हिष्ठस्य प्रभृतस्य स्वधावः॥ पीयति त्वोऽअनु त्वो गृणाति वन्दारुष्टे

तुन्न्वं॑वन्दे॒ऽअग्ग्ने ४२ सबोधि॥सूरिर्म्मघवावसुपतेवसुदावन्॥युयो
द्ध्यस्म्मद्द्वेषा॑ᳪसिविश्श्वकर्म्मणेस्वाहा ४३ पुनस्त्वा॥दित्यारुद्द्रावसवः॑स
मिन्धताम्पुनर्ब्ब्रह्माणोवसुनीथयज्ञैः॥घृतेनत्त्वन्तन्न्वंवर्द्धयस्वसत्याः॑
सन्तुयजमानस्यकामाः॑ ४४ अपेत॥अपेतवीतविचसर्प्पतातोयेत्र्रस्थपु
राणायेचनूतनाः॑॥अदाद्यमो॒वसानम्पृथिव्या॒ऽअक्रन्निमम्पितरोलोकम
स्म्मै ४५ सञ्ज्ञानमसि॥कामधरणम्मयितेकामधरणम्भूयात्॥अग्ग्नेर्ब्भ-
स्म्मास्यग्ग्ने॑ःपुरीषमसिचितस्त्थपरिचित॒ऽऊर्द्ध्वचितः॑श्श्रयद्ध्वम् ४६ अय

ठꣳसोऽअग्निर्यस्मिन्त्सोममिन्द्रः सुतन्दधेजठरेवावशानः॥सहस्रि
यम्बाजमत्यन्नसप्तिꣳसस्वान्त्सन्त्स्तूयसेजातवेदः ४७ अग्नेयत्॥
अग्नेयत्तेदिविवर्चः पृथिव्यांयदोषधीष्वप्स्वायजत्र॥येनान्तरिक्ष
मुर्व्वाततन्थत्त्वेषः सभानुरर्णवोनृचक्षाः ४८ अग्नेदिवः॥अग्नेदिवोऽ
अर्णमच्छाजिगास्यच्छादेवाँ२॥ऽऊचिषेधिष्ण्याये॥यारोचनेपरस्तात्सू
र्य्यस्ययाश्चावस्तादुपतिष्ठन्तऽआपः ४९ पुरीष्यासोऽअग्नयः॥प्रा
वणेभिः सजोषसः॥जुषन्तांयज्ञमद्रुहोनमीवाऽइषोमहीः ५० इडाम

ग्ग्ने॥पुरुदꣳसꣳसनिङ्गोः शश्वत्तमꣳ हवमानायसाध॥स्यान्नः सूनुस्त
नयोविजावाग्ग्नेसातेसुमतिर्ब्भूत्त्वस्म्मे ५१ अयन्ते॥अयन्तेयोनिर्ऋत्त्वि
योयतोजातो ऽअरोचथाः॥तञ्जानन्नग्ग्नऽआरोहाथानोवर्द्धयारयिम्
॥५२॥चिदसि॥चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेव
तयाङ्गिरस्वद्ध्रुवासीद ५३ लोकम्पृण॥छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम्॥इ
न्द्राग्ग्निस्त्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ५४ ताऽअस्य॥सूददोहसः
सोमꣳश्रीणन्तिपृश्नयः॥जन्मन्देवानांविशस्त्रिष्ष्वारोचनेदिवः ५५

इन्द्रं॑ विश्वा॑ ॥ इन्द्रं॒ विश्वा॑ऽ अवीवृधन्त्समु॒द्रव्य॑चस॒ङ्गिर॑ः ॥ र॒थी
त॑मर्ठ᳘ रथी॒नां वाजा॑ना॒ᳫं सत्प॑तिम्पतिम् ५६ समितम् ॥ समित
ठ᳘ सङ्क॑ल्पेथा॒ᳫं सम्प्रि॑यौरोचि॒ष्णू सु॑मन॒स्यमा॑नौ ॥ इष॒मूर्ज्ज॑म॒भि
सं॒वसा॑नौ ५७ संवाम् ॥ सं वा॒म्मनाᳫं॑सि॒ सं व्र॒तास॒मु चि॒त्तान्याक॑र
म् ॥ अग्ग्ने॑पुरीष्याधि॒पा भ॑वा॒ त्वन्न॒ऽ इष॒मूर्ज्ज॒ य्यज॑मानाय धेहि ५८
अग्ग्ने॒ त्वम् ॥ अग्ग्ने॒ त्वम्पु॑रा॒ष्यो॑ रयि॒मान्पु॑ष्टि॒मा ॥ᳫं॑ऽ असि ॥ शि॒वाः
कृ॒त्त्वा दिश॒ः सर्वा॒ः स्वं य्योनि॑मि॒हास॑दः ५९ भवतन्न॒ः सम॑नसौ स

चैतसावेरेपसौ॥मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसोशिवो
भवतमद्यनः ६० मातेवपुत्रम्॥मातेवपुत्रम्पृथिवीपुरीष्यमग्निꣳ
स्वेयोनावभारुखा॥तांविश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्वि
श्वकर्म्माविमुञ्चतु ६१ असुन्वन्तमयजमानम्॥असुन्वन्तमयज
मानमिच्छस्तेनस्येत्यामन्विहितस्करस्य॥अन्यमस्मदिच्छसातऽइ
त्यानमोदेविनिर्ऋतेतुभ्यमस्तु ६२ नमःसुतेनिर्ऋतेतिग्मतेजोयस्म
यंविचृताबन्धमेतम्॥यमेनत्वंयम्यासंविदानोत्तमेनाकेऽअधि

रोहयैनम् ६३ यस्यास्ते ॥ घोरऽ आसञ्जुहोम्येषाम्बन्धानामवसर्ज्जनाय ॥ यान्त्वाजनो भूमिरितिप्प्रमन्दन्तेनिर्ऋतिन्त्वाहम्परिवेदविश्श्वतः ६४ यन्तेदेवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतः ॥ नमोभूत्त्यैयेदञ्चकार ६५ निवेशनः सङ्गमनः ॥ निवेशनः सङ्गमनोवसूनांविश्श्वारूपाभिचष्टेशचीभिः ॥ देवऽ इवसवितासत्त्यधर्म्मेन्द्रोनतस्थौसमरेपथीनाम् ६६ सीरायुञ्जन्ति ॥ कवयोयुगाविवतन्न्वतेपृथक् ॥ धीरादेवेषुसुम्न्नया ६७ यु

संहि॰ नक्तुसीरा॥शुनक्तुसीराद्वियुगातेनुहूङ्क्तेयोनौद्वपतेहबीजम्॥गिरा पू॰अ॰
८६ चश्रुष्टिः॰सभराऽअसन्नोनेदीयुऽइत्सृण्यः॑पक्कमेयात् ६८ शुनर्ठ॰ १२
सफालाद्विकृषन्तुभूमिर्ठ॰शुनङ्कीनाशाऽअभियन्तुद्वाहैः॰॥शुनासी
राहविषानोशेमानास्फपिप्पलाऽओषधीः॰कर्त्तनास्मे ६९ घृतेनसीता
॥घृतेनसीतामधुनासमञ्ज्यतांद्विश्वैर्देवैरनुमतामुरुद्भिः॑॥ऊर्ज्जस्व
तीपयसापिन्वमानास्मान्त्सीतेपयसाभ्याववृत्स्व ७० लाङ्गलम्पवी ८६
रवत्॥लाङ्गलम्पवीरवत्सुशेवर्ठ॰सोमपित्सरु॥तदुद्वपतिगामविम्प्रफ

र्व्वृषञ्च्चपीवरीम्प्रस्त्थावद्रथवाहणम् ७१ कामङ्कामदुघे ॥ धुक्ष्वमित्रा
यवरुणायच ॥ इन्द्रायाश्श्विभ्याम्पूष्णेप्प्रजाब्भ्य ऽओषधीब्भ्यः ७२
विमुच्च्यध्वम् ॥ विमुच्च्यध्वमघ्न्यादेवयानाः ऽअगन्म्मतमसस्पारमु-
स्य ॥ ज्ज्योतिरापाम ७३ सजूरब्द ÷ । सजूरब्दो ऽअयवोभिः सजूरु
षा ऽअरुणीभिः ॥ सजोषसावश्श्विनादꣳसोभिः सजूः सूर ऽएत
शेनसजूर्व्वैश्श्वानर ऽइडयाघृतेनस्वाहा ७४ याः ऽओषधीः ॥ याऽओ
षधीः पूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा ॥ मनैनुबब्भ्रूणामहꣳ शतन्धा

संहि॰ मोनिसप्तच॥७५ शतंवः॥ शतंवोऽअम्बधामानिसहस्रमुतवोरुहः॥ यू॰अ॰
८७ ॥ अधाशतक्रत्वोयूयमिमम्मेऽअगदङ्कृत ७६ ओषधीःप्रति॥ १२
मोदध्वम्पुष्पवतीःप्रसूवरीः॥ अश्वाऽइवसजित्वरीर्वीरुधःपारयि
ष्णवः ७७ ओषधीरिति॥ मातरस्तद्वोदेवीरुपब्रुवे॥ सनेयमश्वङ्गां-
वासऽआत्मानन्तवपूरुष ७८ अश्वत्थेवः॥ अश्वत्थेवोनिषदनम्प
र्णेवोवसतिष्कृता॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम्॥७९ य ८७
त्रौषधीः॥ समग्मतराजानःसमिताविव॥ विप्रःसऽउच्यतेभिषग्-

क्षोहामीवचातनः ८० अश्वावती ँ सोमावतीम् ॥ अश्वावती ँ सो
मावतीमूर्ज्जयन्तीमुदोजसम् ॥ आवित्सि सर्व्वाऽ ओषधीरस्मा
ऽ अरिष्टतातये ८१ उच्छुष्माऽ ओषधीनाङ्गावो गोष्ठादिवेरते ॥ धन
ँ सनिष्यन्तीनामात्मानन्तव पूरुष ८२ इष्कृतिर्नाम ॥ वो मा
ता थो यूय ँ स्थनिष्कृतीः ॥ सीराः पतत्रिणीस्थन यदामयति नि
ष्कृथ ८३ अतिविश्वाः परिष्ठास्तेनऽ इव व्रजमक्रमुः ॥ ओषधीः
प्राचुच्यवुर्यत्किञ्चतन्वोरपः ८४ यदिमाः ॥ यदिमावाजयन्न

संहि॰ हमोषधीर्हस्तऽआदधे॥आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोय पू॰अ॰
८८ था ८५ यस्यौषधीः॥प्रसर्प्पथाङ्गमङ्गम्परुष्परुः॥ततोयक्ष्मंविबा १२
धद्ध्वऽउग्रोमध्यमशीरिव ८६ साकंयक्ष्म॥साकंयक्ष्मप्रपतचाषे
णकिकिदीविना॥साकंवातस्यध्राज्यासाकन्नश्यनिहाकया ८७
अन्न्यावः॥अन्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत॥ताः स
र्वाः संविदानाऽइदम्मेप्रावतावचः ८८ याः फलिनीः॥याः फलि ८८
नीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥बृहस्पतिप्रसूतास्ता

नोमुञ्चन्त्वꣳहसः ८९ मुञ्चन्तुमा शपथ्यादथोवरुण्यादुत ॥ अथो
यमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात् ९० अवपतन्तीरवदन् ॥ अवप
तन्तीरवदन्दिवऽओषधयस्परि । यञ्जीवमश्नवामहैनसरिष्यातिपू
रुषः ९१ याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्बह्वीः शतविचक्षणाः
॥ तासामसित्त्वमुत्तमारङ्कामायशꣳहृदे ९२ याऽओषधीः ॥ याऽओ
षधीःसोमराज्ञीर्विष्ठिताः पृथिवीमनु ॥ बृहस्पतिप्रसूताऽअस्यैस-
न्दत्तवीर्यम् ९३ याश्चेदम् ॥ याश्चेदमुपशृण्वन्तियाश्चदूरम्परागताः ॥

संहि॰ ॥सर्व्वाः÷सुङ्गत्त्यंवीरुधोस्यैसन्दत्तवीर्य्यम् ९४ मावः॥मावोरिषत्ख पू॰अ॰
८९ निताय स्मैचाहङ्खनामिवः॥द्विपाच्चतुष्प्पादस्माकꣳ सर्व्वमस्त्वना १२
तुरम् ९५ ओषधयःसम्॥ओषधयःसमवदन्तसोमेनसहराज्ञा॥य
स्मैकृणोतिब्राह्मणस्तꣳराजन्पारयामसि ९६ नाशयित्त्रीबलासस्
स्यार्शसऽउपचितामसि॥अथोशतस्ययक्ष्माणाम्पाकारोरसिनाशनी
९७ त्वाङ्गन्धर्व्वाः॥त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥त्वा ८९
मोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ९८ सहस्वमे॥सहस्वमेऽअ

रा॑ती॒ः सह॑स्वपृतनाय॒त ९९ ॥ सह॑स्व॒ सर्वी॑ पा॒प्मान॒ꣳ सह॑मानास्योषधे
९९ दी॒र्घायु॑स्त्ते ॥ दी॒र्घायु॑स्त्त ऽ ओषधेखनि॒तायस्मैं च त्वा॒ खनाम्म्य॒हम्
॥ अथो॒ त्वन्दी॒र्घायुर्भूत्वा श॒तव॑ल्शा॒ व्विरो॑हतात् १०० त्वमु॑त्त॒मा ॥ स्योषधे॒
तवं व्वृक्षा ऽ उप॑स्त्तयः ॥ उप॑स्त्तिरस्तु॒ सोस्म्माकं॒ यो ऽ अ॒स्म्माँ २ ऽ अभि॒दास
ति १०१ मा मा॑ हिꣳसीज्जनि॒ता यः पृ॑थि॒व्या यो वा॒ दिवꣳ स॒त्यधर्म्मा॒ व्व्यान
ट् ॥ यश्च्चा॒पश्च्च॒न्द्राः प्प्रथ॒मो ज॒जान॒ कस्मैं दे॒वाय॑ ह॒विषा॑ व्विधेम १०२ अ॒भ्या
वर्त्तस्व ॥ पृथिवि य॒ज्ञेन॒ पय॑सा स॒ह ॥ व्व॒पान्ते॑ ऽ अ॒ग्निरि॑षि॒तो ऽ अरोहत् ॥ १०३

संहि॰ अग्नेषत् ॥ अग्नेयत्तेशुक्रंयच्चन्द्रंयत्पूतंयच्चयज्ञियम् ॥ तद्देवेभ्यो पू॰अ॰
१० भरामसि १०४ इषमूर्ज्जम् ॥ इषमूर्ज्जमहमितऽआदमृतस्ययोनिम्महि १२
षस्यधाराम् ॥ आमागोषुविशत्वातनूषुजहामिसेदिमानिराममीवाम् १०५
अग्नेतव ॥ अग्नेतवश्रवोवयोमहिभ्राजन्तेऽअर्च्चयोविभावसो ॥ बृह
द्भानोशवसावाजमुक्थ्यन्दधासिदाशुषेकवे १०६ पावकवर्च्चाः ॥ पावक
वर्च्चाःशुक्रवर्च्चाऽअनूनवर्च्चाऽउदियर्षिभानुना ॥ पुत्रोमातराविचर १०
न्नुपावसिपृणक्षिरोदसीऽउभे १०७ ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जातवे

दः सुशस्तिभिर्म्मन्दस्वधीतिभिर्हितः ॥ त्वेऽइषुः सन्दधुर्ब्भूरिवर्प्प
सश्चित्रोत्तयो वामजाताः १०८ इरज्ज्यन्नग्ने ॥ प्प्रथयस्वजन्तुभि
रस्म्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यवपुषोविराजसिपृणक्षिसानसि
क्क्रतुम् १०९ इष्कर्त्तारमद्ध्वरस्य ॥ इष्कर्त्तारमद्ध्वरस्यप्प्रचेतसङ्क्षयन्तꣳ
राधसोमहः ॥ रातिंवामस्यसुभगाम्महीमिषन्दधासिसानसिꣳरयि
म् ११० ऋतावानम्महिषं ॥ विश्वदर्शतमग्निꣳसुम्नायदधिरेपुरोज
नाः ॥ श्रुत्कर्णꣳसप्प्रथस्तमन्त्वागिरादैव्व्यम्मानुषायुगा ॥१११॥ आ

संहि॰ प्प्यायस्व॥समेतुतेव्विश्श्वतःसोमवृष्ण्यम्॥भवावाजस्यसङ्गथे ११२ पू॰अ॰
९१ सन्ते॥सन्तेपयाꣳसिसमुयन्तुव्वाजाःसंव्वृष्ण्यान्यभिमातिषाहः॥ १२
आप्प्यायमानोऽअमृतायसोमदिविश्श्रवाꣳस्युत्तमानिधिष्व ११३
आप्प्यायस्व॥मदिन्तमसोमविश्श्वेभिरꣳशुभिः॥भवानःसप्प्रथस्त
मःसखावृधे ११४ आते॥वत्सोमनोयमत्यरमाच्चित्सधस्थात्॥अग्ने
त्वाङ्कामयागिरा ११५ तुब्भ्यन्ताऽ॥तुब्भ्यन्ताऽअङ्गिरस्तमविश्श्वाःसुक्षि ९१
तयःपृथक्॥अग्नेकामाययेमिरे ११६ अग्निःप्प्रियेषु॥अग्निःप्प्रि

येषुधामसुकामोभूतस्युभव्यस्य॥ सम्म्राडेकोविराजति ११७ इ
तिसंहितापाठेद्वादशोऽध्यायः १२ मयिगृह्णामि॥ मयिगृह्णाम्म्य
ग्ग्नेऽअग्निर्ठंरायस्प्योषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ मामुदेव
ताःसचन्ताम् १ अपाम्पृष्ठम्॥ अपाम्पृष्ठमसियोनिरग्ग्नेः समुद्र
मभितःपिन्वमानम्॥ वर्द्धमानोमहाँ२ऽआचपुष्करेदिवोमात्रया
वरिम्णाप्प्रथस्व २ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो
वेनऽआवः॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसत

 श्च्चविवंः ÷ ३ हिरण्यगर्ब्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआ
९२ सीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ४ द्र १३
प्सश्च्चस्कन्द । पृथिवीमनुद्यामिमञ्चयोनिमनुयश्च्चपूर्व्वः ÷ ॥ समा
नंय्योनिमनुसञ्चरन्तन्द्रप्सञ्जुहोम्म्यनुसप्तहोत्त्राः ५ नमोस्तु
॥ सर्प्पेब्भ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः ÷ सर्प्पे-
ब्भ्योनमः ÷ ॥६॥ याऽइषवः ॥ याऽइषवोयातुधानानांय्येवावनस्प
तीँ२ रनु ॥ येवावटेषुशेरतेतेब्भ्यः ÷ सर्प्पेब्भ्योनमः ÷ ७ येवा । मीरोचनेदि

वोयेवासूर्य्यस्यरश्मिषु॥ येषामप्सुसदस्कृतन्तेब्भ्यः सर्प्पेब्भ्योनमः
८ कृणुष्ष्वपाजः॥ कृणुष्ष्वपाजः प्प्रसितिन्नपृथ्वीय्याहिराजेवाम
वाँ॥ इभेन॥ तृष्ष्वीमनुप्प्रसितिन्द्रूणानोस्तासिविद्ध्यरक्षसस्त
पिष्ठैः॥९॥ तवब्भ्रमासः॥ तवब्भ्रमासऽआशुयापतन्त्यनुस्पृशधृ
षताशोशुचानः॥ तपूꣳष्ष्यग्नेजुह्वापतङ्गानसन्दितोविसृजविष्
ष्वगुल्काः १० प्रतिस्प्पशः॥ प्रतिस्प्पशोविसृजतूर्णितमोभवापा
युर्व्विशोऽअस्याऽअदब्धः॥ योनोदूरेऽअघशꣳसोयोऽअन्त्यग्ने

संहि· माकिष्टे॑ व्यथि॒रा द॑धर्षीत् ११ उद॑ग्ने ॥ तिष्ठ॒ प्रत्यात॑नुष्व॒न्न्य॒मित्राँ२ँ यू·अ·
९३ ॥ऽ ओष॑तात्तिग्महेते ॥ यो नो॒ ऽ अरा॑तिर्ठ·समिधान च॒क्रे नी॒चा तन्धं १३
क्ष्य॒त॒सन्न शु॒ष्कम् १२ ऊ॒र्द्ध्वो भ॑व ॥ ऊ॒र्द्ध्वो भ॑व॒ प्रति॑ वि॒द्ध्याद्ध्य॒स्मम॒दा॒वि॒ष्कृ॑
णुष्व॒ दै॒व्यान्य॑ग्ने ॥ अव॑ स्थि॒रा त॑नुहि यातु॒जूनां॒ जा॒मिमजा॑मि॒म्प्रमृ॑
णी॒हि॒ शत्रू॑न् ॥ अ॒ग्नेष्ट्वा॒ तेज॑सा सादयामि १३ अ॒ग्निर्म्मू॒र्द्धा ॥ दि॒वः
कु॒कुत्पति॑ः पृथि॒व्या अ॒यम् ॥ अ॒पा ᳪ रेता॑ᳪसि जिन्वति ॥ इन्द्र॑स्य ९३
त्वौज॑सा सादयामि १४ भुवो॑ य॒ज्ञस्य॑ ॥ भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता य

ज्योतियुद्भिः सचेशेशिवाभिः ॥ दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्नेच
कृषेहव्यवाहम् १५ ध्रुवासि ॥ धरुणास्तृताविश्वकर्म्मणा ॥ मात्वासमुद्र
उद्वधीन्मासुपर्णोव्यथमानापृथिवीन्दृꣳह १६ प्रजापतिष्ट्वा ॥ सादयत्वपा
म्पृष्ठेसमुद्रस्येमन् ॥ व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्यसि १७ भूरसि ॥
भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्त्री ॥ पृथिवीं
यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः १८ विश्वस्मैप्राणाय ॥ विश्व
स्मैप्राणायापानायव्यानायोदानायप्रतिष्ठायैचरित्राय ॥ अग्निष्ट्वाभि

संहि॰ पीतुमुत्थ्यास्वस्त्याच्छर्द्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीद १९ का पू॰अ॰
९४ ण्डात्काण्डात्प्ररोहन्ती ॥ परुषःपरुषस्प्परि ॥ एवानोदूर्व्वेप्प्रतनुसहस्रेणश १३
तेनच २० याशतेन ॥ प्प्रतनोषिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधे
मह्हविषाव्वयम् २१ यास्ते ॥ ऽअग्नेसूर्य्येरुचोदिवमातन्न्वन्तिरश्मिभिः
॥ ताभिर्न्नोऽअद्द्यसर्व्वाभीरुचेजनायनस्कृधि २२ यार्व्वः ॥ यावोदेवाःसूर्य्ये
रुचोगोष्ष्वश्श्वेषुयारुचः ॥ इन्द्राग्ग्नीताभिःसर्व्वाभीरुचन्नोधत्तबृहस्प्प ९४
ते २३ विराड्ज्ज्योतिः ॥ विराड्ज्ज्योतिरधारयत्स्वराड्ज्ज्योतिरधारयत् ॥ प्र

ज्ञापतिष्ट्वासादयतु पृष्ठे पृथिव्याज्ज्योतिष्मतीम् ॥ विश्वस्मै प्राणायापानाय व्यानायु विश्वञ्ज्योतिर्यच्छ ॥ अग्निष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवासीद २४ मधुश्च ॥ मधुश्च माधवश्च वासन्तिकावृतूऽ अग्नेरन्तः श्लेषोऽसि कल्पेतान्द्यावापृथिवी कल्पन्तामापुऽ ओषधयुः कल्पन्ताम् ग्नयुः पृथङ्मम ज्यैष्ठ्याय सव्रताः ॥ येऽ अग्नयुः समनसोन्तरा द्यावापृथिवीऽ इमे ॥ वासन्तिकावृतूऽ अभिकल्पमानाऽ इन्द्रमिव देवाऽ अभिसंविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् २५ अषाढासि ॥ अषाढासि स

संहि॰ हमानासहस्वारातीःसहस्वपृतनायतः॥सहस्रवीर्य्यासिसामाजिन्व पू॰अ॰
९५ २६ मधुवाताः॥मधुवाताऽऋतायुतेमधुक्षरन्तिसिन्धवः॥माध्वीर्न्नःसु- १३
न्त्वोषधीः २७ मधुनक्तम्॥मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः॥म
धुद्यौरस्तुनःपिता २८ मधुमान्नः॥मधुमान्नोवनस्पतिर्म्मधुमाꣳ२॥ऽअ
स्तुसूर्य्यः॥माध्वीर्गावोभवन्तुनः २९ अपाङ्गम्भन्॥अपाङ्गम्भन्त्सीदमा
त्वासूर्य्योभितापसीन्माग्निर्वैश्वानरः॥अच्छिन्नपत्राःप्रजाऽअनु ९५
वीक्षस्वानुत्वादिव्यावृष्टिःसचताम् ३० त्रीन्त्समुद्रान्॥त्रीन्त्समुद्रान्त्स

मंस्यपत्स्वर्गानुपाम्पतिर्वृषभऽइष्टकानाम्॥पुरीषंवसानःसुकृतस्य
लोकेतत्रगच्छयत्रपूर्वेपरेताः ३१ महीद्यौःपृथिवीचनऽइमंयज्ञ
म्मिमिक्षताम्॥पिपृतान्नोभरीमभिः॥३२॥विष्णोःकर्माणि॥प
श्यतयतोव्रतानिपस्पशे॥इन्द्रस्ययुज्यःसखा ३३ ध्रुवासि॥धरु
णेतोजज्ञेप्रथममेभ्योयोनिभ्योऽअधिजातवेदाः॥सगायत्र्यात्रि
ष्टुभानुष्टुभाचदेवेभ्योहव्यंवहतुप्रजानन् ३४ इषेराये॥रमस्वसहसे
द्युम्नऽऊर्ज्जेऽअपत्याय॥सम्राडसिस्वराडसिसारस्वतौत्वोत्सौप्रा

संहि: वेताम् ३५ अग्नेयुक्ष्व ॥ अग्नेयुक्ष्वाहियेतवाश्श्वासोदेवसाधवः ॥ अ पू॰अ॰
९६ रंबहंन्तिमन्यवे ३६ युक्ष्वाहि ॥ देवहूतमाँ२ ॥ ऽअश्वाँ२ ॥ ऽअग्नेरथी १३
रिव ॥ निहोतापूर्व्यःसदः ३७ सम्यकस्रवन्ति ॥ सरितोनधेनाऽअ
न्तर्हृदामनसापूयमानाः ॥ घृतस्यधाराऽअभिचाकशीमिहिरण्ययो
वेतसोमद्ध्येऽअग्ने ॥ ३८ रुचेत्वा ॥ रुचेत्वोभासेत्वाज्ज्योतिषेत्वा
॥ अभूदिदंविश्श्वस्यभुवनस्यवाजिनमग्नेर्वैश्श्वानरस्यच ३९ अग्नि ९६
ज्ज्योतिषा ॥ अग्निर्ज्ज्योतिषाज्ज्योतिष्मान्रुक्मोवर्च्चसावर्च्चस्वान् ॥

सहस्रदाऽअसिसहस्रायत्वा ४० आदित्यङ्गर्भम् ॥ आदित्यङ्गर्भम्पयं
सासमङ्क्तिसहस्रस्यप्रतिमांविश्वरूपम् ॥ परिवृङ्ग्धिहरसामाभिमं
स्थाः शतायुषङ्कृणुहिचीयमानः ४१ वातस्यजूतिं ॥ वरुणस्यनाभिम
श्वञ्जज्ञानꣳसरिरस्यमध्ये ॥ शिशुन्नदीनांꣳहरिमद्रिबुध्नमग्ने
माहिꣳसीः परमेव्योमन् ४२ अजस्रमिन्दुम् ॥ अजस्रमिन्दुमरुषम्भु
रण्युमग्निमीडेपूर्वचित्तिन्नमोभिः ॥ सपर्वभिर्ऋतुशः कल्पमानोगा
म्माहिꣳसीरदितिंविराजम् ४३ वरूत्रीन्त्वष्टुः ॥ वरूत्रीन्त्वष्टुर्वरुणस्य

संहि॰ नाभिमविञ्ज्ञानाँरजसःपरस्मात्॥मुहीँसाहस्रीमसुरस्यमाया पू॰अ॰
९७ मग्नेमाहिँसीःपरमेव्योमन् ४४ योऽअग्निः॥योऽअग्निरग्नेरध्य १३
जायतशोकात्पृथिव्याऽउतवादिवस्परि॥येनप्रजाविश्वकर्म्माजजा
नतमग्नेहेडःपरितेवृणक्तु ४५ चित्रन्देवानाम्॥चित्रन्देवानामुदगा
दनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः॥आप्प्राद्यावापृथिवीऽअन्तरि
क्षँसूर्य्यआत्माजगतस्तस्थुषश्च ४६ इमम्मा॥हिँसीर्द्विपादम्प ९७
शुँसहस्राक्षोमेधायचीयमानः॥मयुम्पशुम्मेधमग्नेजुषस्वतेनचि

न्वानस्तन्वोनिषीद॥मयुन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ४७ इ
मम्मा॥र्हिंसीरेकशफम्पशुङ्कनिक्रदंवाजिनंवाजिनेषु॥गौरमारण्य
मनुतेदिशामितेनचिन्वानस्तन्वोनिषीद॥गौरन्तेशुगृच्छतुयन्द्विष्मस्त
न्तेशुगृच्छतु ४८ इमर्ठ सास्रम॥इमर्ठ साहस्त्रर्ठ शतधारमुत्संव्यच्य
मानर्ठ सरिरस्यमध्ये॥घृतन्दुहानामदितिञ्जनायाग्नेमाहिर्ठ सीःप
रमेव्योमन्॥गवयमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद॥ग
वयन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ४९ इममूर्णायुं॥वरुणस्यनाभि

संहि· न्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम्॥त्वष्टुः प्रजानाम्प्रथमञ्जनित्रमग्ने सू·अ·
९८ माहिंसीःपरमेव्योमन्॥उष्ट्रमारण्यमनुतेदिशामितेनचिन्वानस्तन्वो १३
निषीद॥उष्ट्रन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ५० अजोह्यि॥अजोह्य
ग्नेरजनिष्टशोकात्सोऽअपश्यज्जनितारमग्ने॥तेनदेवादेवतामग्रमायँ
स्तेनरोहमायन्नुपमेध्यासः॥शरभमारण्यमनुतेदिशामितेनचिन्वानस्त
न्वोनिषीद॥शरभन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ५१ त्वय्यविष्ठ॥ ९८
दाशुषोनॄँः पाहिशृणुधीगिरः॥रक्षातोकमुतत्मना ५२ अपान्त्वा॥अ

पान्त्वेमन्त्सादयाम्म्यु पान्त्वोद्मन्त्सादयाम्म्यु पान्त्वा भस्म्मन्त्सादयाम्म्यु
पान्त्वाज्ज्योतिषिसादयाम्म्यु पान्त्वायनेसादयाम्म्यर्ण्णवेत्त्वासदनेसाद
यामिसमुद्रेत्त्वासदनेसादयामिसरिरेत्त्वासदनेसादयाम्म्यु पान्त्वाक्षये-
सादयाम्म्यु पान्त्वासधिषिसादयाम्म्यु पान्त्वासदनेसादयाम्म्यु पान्त्वास
धस्थेसादयाम्म्यु पांन्त्वा योनौसादयाम्म्यु पान्त्वापुरीषेसादयाम्म्यु पान्त्वा
पाथसिसादयामिगायत्त्रेणत्त्वाछन्दसासादयामित्त्रैष्टुभेनत्त्वाछन्दसा
सादयामिजागतेनत्त्वाछन्दसासादयाम्म्यानुष्टुभेनत्त्वाछन्दसासादया

संहि· ॥ मि पाङ्क्तेन त्वा छन्दसा सादयामि ५३ अयम्पुरः ॥ अयम्पुरो भुवस्तस्य प्राणो ॥ पू· अ·
९९ ॥ भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रङ्गायत्रादुपा ॥ १३
ᳫंशुरुपाᳫंशोस्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठ ऽ ऋषिः प्रजापतिगृहीतया त्वया प्रा-
णङ्गृह्णामि प्रजाभ्यः ५४ अयन्दक्षिणा ॥ विश्वकर्म्मा तस्य मनो वैश्वक
र्म्मणङ्ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारᳫं स्वारादन्तर्य्यामो न्त
र्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहद्भरद्वाज ऽ ऋषिः प्रजापतिगृहीतया त्व ॥ ९९
या मनो गृह्णामि प्रजाभ्यः ५५ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वव्यचा

स्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऽऋक्सम
मृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः
प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ५६ इदमुत्तरात् ॥ इद
मुत्तरात्स्वस्तस्य श्रोत्रं सौवं शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभ ऽऐडमैडा
न्मन्थी मन्थिन ऽएकविंश ऽएकविंशाद्वैराजं विश्वामित्र ऽऋषिः प्रजा
पतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ५७ इयमुपरि मतिस्तस्यै वा
ङ्माती वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत ऽआग्रयण

संहि॰ ऽआग्ग्रयणात्त्रिणवत्त्रयस्त्रिꣳशौ॰ त्रिणवत्त्रयस्त्रिꣳशौ॰ शाब्भ्याꣳ शाक्वररैवु पृ॰अ॰
१०० तेविश्वकर्म्मुऽऋषिः प्प्रजापतिगृहीतयात्त्वयावाचङ्गृह्णामिप्प्रजाब्भ्योलोक १३
न्त्वाऽइन्द्रम् ५८ इतिश्रीवाजसनेयसंहितायांत्रयोदशोऽध्यायः १३
ध्रुवक्षितिर्ध्रुवयोनिः॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंय्योनिमासीदसा
ध्रुया॥उक्खस्यकेतुम्प्प्रथमञ्जुषाणाश्श्विनाद्ध्वर्यूसादयतामिहत्त्वा १
कुलायिनीघृतवती॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथि १००
व्याः॥अभित्त्वारुद्द्रावसवोगृणन्त्विमाब्ब्रह्मपीपिहिसौभगायाश्श्विना

ध्वर्य्यूसादयतामिहत्वा २ स्वैर्द्दक्षैः॥ स्वैर्द्दक्षैर्द्दक्षपितेहसीददेवानाᳪंसुम्ने
बृहतेरणाय॥ पितेवैधिसूनवऽआसुशेवास्वावेशातन्न्वासंविशस्वाश्विना
ध्वर्य्यूसादयतामिहत्वा ३ पृथिव्व्याः पुरीषम्॥ पृथिव्व्याः पुरीषमस्यप्सो
नामतान्त्वाविश्श्वेऽअभिगृणन्तुदेवाः॥ स्तोमपृष्ठाघृतवतीहसीदप्प्रजावद
स्मेद्द्रविणायजस्वाश्विनाध्वर्य्यूसादयतामिहत्वा ४ अदित्यास्त्वा॥ पृष्ठेसा
दयाम्म्यन्तरिक्षस्यधर्त्त्रीँविष्टम्भनीन्दिशामधिपत्क्लीम्भुवनानाम्॥ ऊर्म्मिर्द्र
प्सोऽअपामसिविश्श्वकर्म्मातऽऋषिरश्विनाध्वर्य्यूसादयतामिहत्वा ५ शुक्र

संहि॰ श्च॥शुक्रश्चशुचिश्चग्रैष्म्मावृतूऽअग्नेरन्तःश्लेषोसिकल्प्पेतान्द्यावा शु॰अ॰
१०१ पृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्नयःपृथङ्ममज्ज्यैष्ठ्या १४
यसव्रताः॥येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽइमे॥ग्रैष्म्मावृ
तूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिर
स्वद्ध्रुवेसीदतम्॥६॥सजूर्ऋतुभिः॥सजूर्विधाभिःसजूर्देवैःसजूर्दे
वैर्वयोनाधैरग्नयेत्वावैश्वानरायाश्विनाध्वर्यूसादयतामिहत्वासजू १०१
र्ऋतुभिःसजूर्विधाभिःसजूर्वसुभिःसजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वा

नरायाश्विनाध्वर्य्यूसादयतामिहत्वासजूर्ऋतुभिःसजूर्विधाभिःस
जूरुद्रैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनाध्वर्य्यूसादय
तामिहत्त्वासजूर्ऋतुभिःसजूर्विधाभिःसजूरादित्यैःसजूर्देवैर्वयो
नाधैरग्नयेत्वावैश्वानरायाश्विनाध्वर्य्यूसादयतामिहत्वासजूर्ऋतु
भिःसजूर्विधाभिःसजूर्विश्वैर्देवैःसजूर्देवैर्वयोनाधैरग्नयेत्वावै
श्वानरायाश्विनाध्वर्य्यूसादयतामिहत्वा ७ प्राणम्मे॥पाह्यपान
म्मेपाहिव्यानम्मेपाहिचक्षुर्म्मऽउर्व्याविभाहिश्रोत्रम्मेश्लोकय॥अपः

संहि॰ पिन्वौषधीर्ज्जिन्वद्विपादवचतुष्प्पात्पाहिदिवोवृष्टिमेरय ८ मूर्द्धावयः पू॰अ॰
१०२ प्रजापतिश्छन्दः क्षत्त्रंवयोमयन्दञ्छन्दोविष्टम्भोवयोधिपतिश्छन्दोवि १४
श्वकर्म्मावयः परमेष्ठीछन्दोबस्तोवयोविवलञ्छन्दोवृष्णिर्वयोविशा
लञ्छन्दः पुरुषोवयस्तन्द्रञ्छन्दोव्याघ्रोवयोनाधृष्टञ्छन्दः सिंहोव
यश्छदिश्छन्दः पष्ठवाड्वयोबृहतीछन्दऽउक्षावयः ककुप्छन्दऽऋष
भोवयः सतोबृहतीछन्दोनड्वान्वयः ९ अनड्वान्वयः ॥पङ्क्तिश्छन्दो १०२
धेनुर्वयोजगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयोविराट्छन्दः प

त्र्यविर्व्वयोगायत्रीछन्दस्त्रिवत्सोव्वयऽउष्णिक्छन्दस्तुर्य्यवाड्वयो
नुष्टुप्छन्दोलोकन्ताऽइन्द्रम् १० इन्द्राग्नीऽअव्यथमानाम्॥ इन्द्रा
ग्नीऽअव्यथमानामिष्टकान्दृंहतंय्युवम्॥ पृष्ठेनद्यावापृथिवी
ऽअन्तरिक्षञ्चविबाधसे ११ विश्वकर्म्मात्वा॥ सादयत्वन्तरिक्षस्य
पृष्ठेव्यचस्वतीम्प्रथस्वतीमन्तरिक्षंय्यच्छान्तरिक्षन्दृंहान्तरिक्षम्मा
हिंसीः॥ विश्वस्मैप्राणायापानायव्यानायोदानायप्रतिष्ठायै
चरित्राय॥ वायुष्ट्वाभिपातुमह्यास्वस्त्याछर्दिषाशन्तमेनतयादेव

तेयाङ्गिरस्वद्ध्रुवासीद १२ शतम् ७०० ॥ राज्ञ्यसिप्प्राचीदिग्विराडसि
दक्षिणादिक्सम्म्राडसिप्प्रतीचीदिक्स्वराडस्युदीचीदिगधिपत्न्य
सिबृहतीदिक् १३ विश्श्वकर्म्मात्त्वा ॥ सादत्वन्तरिक्षस्यपृष्ठेज्ज्योति
ष्मतीम् ॥ विश्श्वस्म्मैप्प्राणायापानायव्व्यानायविश्श्वञ्ज्योतिर्य्यच्छ
॥ वायुष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद १४ नभश्च । नभस्य
श्चवार्षिकावृतू ऽ अग्नेरन्तः श्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्ता
माप ऽ ओषधयः कल्प्पन्तामग्नयः पृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः ॥

ये ऽ अग्नयः समनसोन्तराद्यावापृथिवीऽइमे ॥ वार्षिकावृतूऽअ-
भिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रु
वेसीदतम् १५ इषश्च ॥ इषश्चोर्ज्जश्चशारदावृतू ऽ अग्नेरन्तः श्ले
षोसिकल्पेतान्द्यावापृथिवीकल्पन्तामाप ऽ ओषधयःकल्पन्ता
मग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसोन्तरा
द्यावापृथिवीइमे ॥ शारदावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअ
भिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् १६ आयुर्मे ॥ पाहिप्रा

संहि॰ णम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मेपाहिश्श्रोत्रम्मेपाहि शु॰अ॰
१०४ वाचम्मेपिन्वमनोमेजिन्वात्मानम्मेपाहिज्ज्योतिर्म्मेयच्छ १७ माछ १४
न्दः॥प्रमाछन्दःप्रतिमाछन्दोऽअस्त्रिवयश्छन्दःपङ्क्तिश्छन्दऽउ
ष्णिक्छन्दोबृहतीछन्दोनुष्टुप्छन्दोविराट्छन्दोगायत्रीछन्दस्त्रिष्टुप्छ
न्दोजगतीछन्दःपृथिवीछन्दः १८ पृथिवीछन्दोन्तरिक्षञ्छन्दोद्यौश्छ
न्दःसमाश्छन्दोनक्षत्राणिछन्दोवाक्छन्दोमनश्छन्दःकृषिश्छन्दोहिर १०४
ण्यञ्छन्दोगौश्छन्दोजाछन्दोश्वश्छन्दः १९ अग्निर्देवता॥अग्निर्दे

वता॥अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदे
वतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवतावृहस्पति
र्द्देवतेन्द्रोदेवतावरुणोदेवता २० मूर्द्धासि॥मूर्द्धासिराड्ध्रुवासिधरुणा
धर्त्र्यसिधरणी॥आयुषेत्त्वावर्च्चसेत्त्वाकृष्यैत्त्वाक्षेमायत्त्वा॥२१ य
न्त्रीराट्॥यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री॥इषेत्त्वोर्ज्जेत्त्वार
य्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् २२ आशुस्त्रिवृत्॥आशुस्त्रिवृ
द्भान्तःपञ्चदशोव्योमासप्तदशोधरुणऽएकविंशःप्रतूर्त्तिरष्टा

संहि दशस्तपोनवदशोभीवर्त्तः सविꣳशोवर्च्चोद्वाविꣳशशः सम्भरणस्त्रयो पू.अ.
१०५ विꣳशोयोनिश्चतुर्विꣳशोगर्ब्भाःपञ्चविꣳशशओजस्त्रिणवः क्रतुरेक १४
त्रिꣳशःप्रतिष्ठात्रयस्त्रिꣳशोब्रध्नस्यविष्टपञ्चतुस्त्रिꣳशोनाकः
षट्त्रिꣳशोविवर्त्तोष्टाचत्वारिꣳशोधर्त्त्रञ्चतुष्टोमः २३ अग्नेर्ब्भागः॥
अग्नेर्ब्भागोसिदीक्षायाऽआधिपत्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्य
भागोसिविष्णोराधिपत्यङ्क्षत्रꣳस्पृतम्पञ्चदशस्तोमोनृचक्षसाम्भा १०५
गोसिधातुराधिपत्यञ्जनित्रꣳस्पृतꣳसप्तदशस्तोमोमित्रस्यभागो

सिव्वरुणस्याधिपत्यन्दिवोवृष्टिर्व्वातस्पृतऽएकविꣳशस्तोमोवसूनाम्भा
गः २४ वसूनाम्भागोसिरुद्राणामाधिपत्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳ
शस्तोमः आदित्यानाम्भागोसिमरुतामाधिपत्यङ्गर्ब्भास्पृताः पञ्चवि
ꣳशस्तोमोदित्यैभागोसिपूष्णऽआधिपत्यमोजस्पृतन्त्रिणवस्तोमोदेव
स्यसवितुर्ब्भागोसिबृहस्पतेराधिपत्यꣳसमीचीर्दिशस्पृताश्चतुष्टोम
स्तोमोयवानाम्भागः २५ यवानाम्भागोस्ययवानामाधिपत्यम्प्रजा-
स्पृताश्चतुश्चत्वारिꣳशस्तोमः ऋभूणाम्भागोसिविश्वेषान्देवानामा

धिपत्यम्भूतꣳस्पृतन्नोयस्मिन्त्रिꣳशस्तोमः सहश्च २६ सहश्च ॥ सहस्य
श्चहैमन्तिकावृतूऽअग्नेरन्तः श्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्प
न्तामापऽओषधयः कल्प्पन्तामग्नयः पृथङ्ममज्ज्यैष्ठ्यायसव्रताः ॥
येऽअग्नयः समनसोन्तराद्यावापृथिवीऽइमे ॥ हैमन्तिकावृतूऽअभि
कल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसी
दतम् २७ एकयास्तुवत ॥ प्प्रजाऽअधीयन्तप्प्रजापतिरधिपतिरासीत्ति
सृभिरस्तुवतब्ब्रह्मासृज्यतब्ब्रह्मणस्प्पतिरधिपतिरासीत्पञ्चभिर

स्तुवतभूतान्न्यसृज्ज्यन्तभूतानाम्पतिरधिपतिरासीत्सप्तभिरस्तुवत
सप्तऽऋषयोऽसृज्ज्यन्तधाताधिपतिरासीन्नवभिरस्तुवत २८ नवभि
रस्तुवत॥पितरोऽसृज्ज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतऽ
ऋतवोऽसृज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवतमासाऽ
असृज्ज्यन्तसंव्वत्सरोधिपतिरासीत्पञ्चदशभिरस्तुवतक्षत्त्रमसृज्ज्य
तेन्द्रोधिपतिरासीत्सप्तदशभिरस्तुवतग्ग्राम्म्याःपशवोऽसृज्ज्यन्तबृह-
स्पतिरधिपतिरासीन्नवदशभिरस्तुवत २९ नवदशभिरस्तुवत॥शूद्रार्य्यौ

संहि॰ वैसृज्ज्येतामहोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैकेश पू॰अ॰
१०७ फाःपशवोसृज्ज्यन्तव्वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षुद्राः १४
पशवोसृज्ज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतारण्याःपश
वोसृज्ज्यन्तव्वायुरधिपतिरासीत्सप्तविꣳशत्यास्तुवतद्यावापृथिवीव्व्यै
तांव्वसवोरुद्राऽआदित्याऽअनुव्व्यायँस्तऽएवाधिपतयऽआसन्नवविꣳ
शत्यास्तुवत ३० नवविꣳशत्यास्तुवत॥ व्वनस्प्पतयोसृज्ज्यन्तसोमोधिप १०७
तिरासीदेकत्रिꣳशतास्तुवतप्प्रजाऽअसृज्ज्यन्तयवाश्चायवाश्चाधिपत

यऽ आसुँस्त्रयस्त्रिꣳशतास्तुवतभूतान्यशाम्यन्प्रजापतिः परमेष्ठ्य
धिपतिरासील्लोकन्त्वाऽइन्द्रम् ३१ इतिसंहितायांचतुर्दशोध्यायः १४
अग्नेजातान् ॥ अग्नेजातान्प्रणुदानः सपत्नान्प्रत्यजातान्नुदजा
तवेदः ॥ अधिनोब्रूहिसुमनाऽअहेडँस्तवस्यामशर्म्मँस्त्रिवरूथऽउद्भौ ॥
१॥ सहसाजातान् ॥ सहसाजातान्प्रणुदानः सपत्नान्प्रत्यजातान्जा
तवेदोनुदस्व ॥ अधिनोब्रूहिसुमनस्यमानोवयꣳस्यामप्रणुदानः सप
त्नान् २ षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्वारिꣳ

संहि॰ शस्तोमोवर्च्चोद्द्रविणम् ॥ अग्ग्नेः पुरीष्यमस्यप्सोनामतान्त्वाविश्श्वेऽ अ मू॰ अ॰
१०८ भिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्रजावदस्मेद्द्रविणायजस्व १५
३ एवश्छन्दः ॥ एवश्छन्दोवरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽ आ
छच्छन्दोमनश्छन्दोव्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरञ्छ
न्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यञ्छन्दोऽ अङ्कुपञ्छन्दोक्षरपङ्क्ति
श्छन्दः पदपङ्क्तिश्छन्दोविष्टारपङ्क्तिश्छन्दः क्षुरोभ्भ्राजश्छन्दऽ आच्छच्छन्दः १०८
प्रच्छच्छन्दः ४ आच्छच्छन्दः प्रच्छच्छन्दः ॥ संयच्छन्दोवियच्छन्दोबृहच्छन्दो

रथन्तरञ्छन्दोनिकायश्छन्दोविविधश्छन्दोगिरश्छन्दोभ्रजश्छन्दःसंष्टु
स्तुप्छन्दोनुष्टुप्छन्दऽएवश्छन्दोवरिवश्छन्दोवयश्छन्दोवयस्कृच्छन्दोवि
ष्पर्द्धाश्छन्दोविशालञ्छन्दश्छदिश्छन्दोदूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअ
ङ्काङ्कञ्छन्दः ५ रश्मिनासत्याय॥सत्यञ्जिन्वप्रेतिनाधर्म्मणाधर्म्म-
ञ्जिन्वान्वित्यादिवादिवञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्र
तिधिनापृथिव्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्यावृष्टिञ्जिन्वप्रवयाह्ना
हर्जिन्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुभ्योवसूञ्जिन्वप्रकेतेना

संहि॰ दित्येभ्यऽआदित्याञ्जिन्वतन्तुनारायः ६ तन्तुनारायस्पोषेणरायस्पो पू॰अ॰
१०९ षञ्जिन्वसꣳसर्प्पेणश्श्रुतायश्श्रुतञ्जिन्वैडेनोषधीभिरोषधीर्ज्जिन्वोत्त १५
मेनतनूभिस्तनूर्ज्जिन्ववयोधसाधितेनाधीतञ्जिन्वाभिजितातेजसा
तेजोजिन्व ७ प्रतिपदसि॥ प्प्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसिसम्प
देत्वातेजोसितेजसेत्वात्रिवृदसि ८ त्रिवृदसि॥ त्रिवृतेत्वाप्प्रवृदसिप्प्र
वृतेत्वाविवृदसिविवृतेत्वासवृदसिसवृतेत्वाक्रमोस्याक्रमायत्वासङ्- १०९
क्रमोसिसङ्क्रमायत्वोत्क्रमोस्युत्क्रमायत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्वाधिपति

नोर्ज्जोर्ज्जञ्जिन्व ९ राज्ञ्यसि॥राज्ञ्यसिप्प्राचीदिग्ग्वसवस्तेदेवाऽअधि
पतयोग्निर्हेतीनाम्प्रतिधर्त्तात्रिवृत्त्वास्तोमः पृथिव्याᳪँश्रयत्वाज्ज्यमु
क्थमव्यथायैस्तभ्नातुरथन्तरᳪँसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वा
प्प्रथमजादेवेषुदिवोमात्रयावरिम्म्णाप्प्रथन्तुविधर्त्ताचायमधिपतिश्च
तेत्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु १० विरा
डसि॥विराडसिदक्षिणादिग्ग्रुद्द्रास्तेदेवाऽअधिपतयऽइन्द्रोहेतीनाम्प्रति
धर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याᳪँश्रयतुप्प्रऽउगमुक्थमव्यथायैस्त-

ज्ज्ञातुबृहत्सामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमा
 त्र्येयावरिम्णाप्प्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्य
पृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ११ सम्म्राडसि॥ प्प्रतीचीदिगादित्यास्ते
देवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वास्तोमः पृथिव्याᳪ
श्रयतुमरुत्वतीयमुक्थमव्यथायैस्तभ्नातुव्वैरूपᳪसामप्प्रतिष्ठित्याऽअ
न्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्र्याव्वरिम्णाप्प्रथन्तुविधर्त्ताचा
यमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादय

न्तु १२ स्वराडसि॥स्वराडस्युदीचीदिङ्मरुतस्तेदेवाऽअधिपतयः सोमोहे
तीनाम्प्रतिधर्त्तैकविंशस्त्वास्तोमः पृथिव्याꣳ श्रयतुनिष्केवल्यमुक्थम
व्यथायैस्तभ्नातुवैराजꣳ सामप्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्र
थमजादेवेषुदिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चते
त्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु १३ अधिप
त्न्यसि॥बृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृहस्पतिर्हेतीनाम्प्रतिधर्त्ता
त्रिणवत्रयस्त्रिंशौत्वास्तोमौपृथिव्याꣳ श्रयतांवैश्वदेवाग्निमारुतेऽउ

संहि क्के ऽअव्यथायैस्तभ्नीताᳶशाक्करैवतेसामनीप्रतिष्ठित्याऽअन्तरिक्षऋ यू॰अ॰
१११ षयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिप १५
तिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु १४
अयम्पुरः॥अयम्पुरोहरिकेशःसूर्य्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्च
सेनानीग्ग्रामण्यौ॥पुञ्जिकस्थलाचक्रतुस्थलाचाप्सरसौदङ्क्ष्णवःप
शवोहेतिःपौरुषेयोवधःप्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तु १११
तेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः १५ अयन्दक्षिणा॥विश्वक

र्म्मातस्यरथस्वनश्चरथेचित्रश्चसेनानीग्ग्रामण्यौ ॥ मेनकाचसह
जन्याचाप्सरसौयातुधानाहेतीरक्षाꣳसिप्प्रहेतिस्तेभ्योनमोऽअस्तु
तेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः
१६ अयम्पश्चात् ॥ अयंपश्चाद्विश्वव्यचास्तस्यरथप्प्रोतश्चासमरथ
श्चसेनानीग्ग्रामण्यौ ॥ प्प्रम्लोचन्तीचानुम्म्लोचन्तीचाप्सरसौव्या
ग्घ्राहेतिः सर्प्पाः प्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते
यन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः १७ अयमुत्तरात् ॥ अय

संहि मुत्तरात्संयद्द्वसुस्तस्यताक्षर्यश्चारिष्टनेमिश्चसेनानीग्ग्रामण्ण्यौ ॥ व्वि यू०अ०
११२ श्वाचीचघृताचीचाप्सुरसावापोहेतिर्व्वातःप्प्रहेतिस्तेभ्योनमोऽअस्तु १५
तेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः
१८ अयमुपरि ॥ अयमुपर्य्यर्व्वाग्ग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानी
ग्ग्रामण्ण्यौ ॥ उर्व्वशीचपूर्व्वचित्तिश्चाप्सुरसाववस्फूर्ज्जन्हेतिर्व्विद्युत्प्र
हेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वे- ११२
ष्टितमेषाञ्जम्भेदध्मः १९ अग्निर्म्मूर्द्धा ॥ दिवःककुत्पतिःपृथिव्या

ऽअयम्॥अपाꣳरेताꣳसिजिन्वति २० अयमग्निः॥सहस्रिणोवाजे
स्यशतिनस्पतिः॥मूर्द्धाकवीरयीणाम् २१ त्वामग्नेपुष्करादध्यथर्वा
निरमन्थत॥मूर्ध्नोविश्वस्यवाघतः २२ भुवोयज्ञस्यरजसश्चनेताय
त्रानियुद्भिःसचसेशिवाभिः॥दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्नेच
कृषेहव्यवाहम् २३ अबोध्यग्निः॥समिधाजनानाम्प्रतिधेनुमिवायती
मुषासम्॥यह्वाऽइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ
२४ अवोचामकवये॥अवोचामकवयेमेध्यायवचोवन्दारुवृषभायवृष्णे

संहि ॥गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममुरुव्यञ्चमश्रेत् २५ अयमि पू.अ.
११३ ह॥प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः॥यमप्नवानोभृ १५
गवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे २६ जनस्यगोपाः॥जनस्यगो-
पाऽअजनिष्टजागृविरग्निःसुदक्षःसुवितायनव्यसे॥घृतप्रतीकोबृहु-
तादिविस्पृशाद्युमद्विभातिभरतेभ्यःशुचिः २७ त्वामग्ने॥त्वामग्नेऽअ
ङ्गीरसोगुहाहितमन्वविन्दञ्छिश्रियाणंवनेवने॥सजायसेमथ्यमानःस ११३
होमहत्वामाहुःसहसस्पुत्रमङ्गिरः २८ सखायःसम्॥सखायःसंवः

सुम्म्यन्त्वमिषुꣳस्तोमन्त्वाग्नये॥ व्वर्षिष्ठायक्षितीनामुर्ज्जोनप्त्रेसहस्वते
२९ सꣳ·सुमित्॥ सꣳसुमिद्युवसेवृषन्नग्नेविश्वान्न्यर्य्यऽआ॥ इडस्प
देसमिद्ध्यसेसनोव्वसून्न्याभर ३० त्वाञ्चित्रश्रवस्तमम्॥ हवन्तेव्विक्षुजन्त
वः॥ शोचिष्केशम्पुरुप्प्रियाग्नेहव्व्यायवोढवे ३१ एनावः॥ एनावोऽअग्नि
न्नमसोर्ज्जोनपातमाहुवे॥ प्प्रियञ्चेतिष्ठमरतिꣳस्वद्ध्वरंव्विश्वस्यदूतमम्मृ
तम् ३२ व्विश्वस्यदूतम्॥ व्विश्वस्यदूतममृतंव्विश्वस्यदूतममृतम्॥ सयो
जतेऽअरुषाव्विश्वभोजसासदुद्द्रवत्स्वाऽहुतः ३३ सद्द्रवत्॥ सदुद्द्रवत्स्वा

संहि ऽहुतुः सद्दुद्धवु स्वा हुतुः ॥ सुब्रह्मायुज्ञः सुशमीवसूनान्देवꣳराधोजन- पू॰अ॰
११४ नानाम् ३४ अग्नेवाजस्य ॥ अग्नेवाजस्यगोमतुऽईशानःसहसोयहो ॥ १५
अस्मेधेहिजातवेदोमहिश्रवः ३५ सऽइधानः ॥ सऽइधानोवसुष्कविर्
ग्निरीडेन्योगिरा ॥ रेवदस्मभ्यम्पुर्वणीकदीदिहि ३६ क्षपोराजन् ॥ क्षपोरा
जन्नुतत्मनाग्नेवस्तोरुतोषसः ॥ सतिग्मजम्भरक्षसोदहप्रति ३७ भ
द्रोनः ॥ भद्रोनोऽअग्निराहुतोभद्रारातिःसुभगभद्रोऽअध्वरः ॥ भद्राऽ ११४
उतप्रशस्तयः ३८ भद्राऽउत ॥ प्रशस्तयोभद्रम्मनःकृणुष्ववृत्रतूर्य्ये ॥

॥ येनोसुमत्सुसासहः ३९ येनोसुमत्सु ॥ सासहोवेस्थिरातन्तुहिभूरि
शर्द्धताम् ॥ वुनेमातेऽअभिष्टिभिः ४० अग्निन्तम् ॥ अग्निन्तम्मन्न्येयो
वसुरस्तंय्यंयन्तिधेनवः ॥ अस्तमर्वन्तऽआशवोस्तन्नित्यासोवाजि
नऽइषंस्तोतृब्भ्यऽआभर ४२ सोऽअग्निः ॥ सोऽअग्निर्य्योर्वसुर्गृ
णोसंय्यमायन्तिधेनवः ॥ समर्वन्तोरघुद्रवः सर्ठंसुजातासः सूरय
ऽइषंस्तोतृब्भ्यऽआभर ४२ उभेसुश्चन्द्र ॥ सर्प्पिषोदर्व्वीश्श्रीणीषऽ
आसनि ॥ उतोनुऽउत्पुपूर्य्याऽउक्थेषुशवसस्पतऽइषंस्तोतृब्भ्यऽआ

संहि भीर ४३ अग्नेतमम् ॥ अग्नेतमद्याश्वन्न स्तोमैः क्रतुन्न भद्रꣳ हृदिस्पृ पू॰अ॰
११५ शम् ॥ ऋध्यामातओहैः ४४ अधाहि ॥ अधाह्यग्ने क्रतोर्भद्रस्य दक्ष १५
स्य साधोः ॥ रथीर्ऋतस्य बृहतो बभूथ ४५ एभिर्न्नैः ॥ एभिर्नोऽअर्कै
र्भवानोऽअर्वाङ्स्वर्ण्णज्ज्योतिः ॥ अग्ने विश्वेभिः सुमनाऽअनीकैः ४६ अ
ग्निꣳ होतारम् ॥ अग्निꣳ होतारम्मन्न्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो
जातवेदसं विप्प्रन्न जातवेदसम् ॥ यऽऊर्द्ध्वया स्वध्वरो देवो देवाच्या कृपा ११५
॥ घृतस्य विभ्राष्टिमनुवष्टि शोचिषाजुह्वानस्य सर्प्पिषः ४७ अग्ने त्वम्

॥अग्ग्नेत्वन्नो ऽअन्तम ऽउतत्त्राताशिवोभवावरूत्थ्यः॥ वसुरग्ग्निर्व्वसु
श्श्रवा ऽअच्छानक्षिद्युमत्तमꣳरयिन्दाः॥ तन्त्वाशोचिष्ठदीदिवः सुम्म्नाय
नूनमीमहेसखिब्भ्यः ४८ येन ऽऋषयः॥ येन ऽऋषयस्तपसासत्रमा
यन्निन्धाना ऽअग्निꣳस्वराभरन्तः॥ तस्मिन्नहन्निदधेनाके ऽअग्नि
य्यमाहुर्म्मनवस्तीर्णबर्हिषम् ४९ तम्पत्नीभिः॥ तम्पत्नीभिरनुगच्छेम
देवाः पुत्रैर्भ्भ्रातृभिरुतवाहिरण्यैः॥ नाकङ्गृब्भ्णानाः सुकृतस्यलोकेतृ
तीयेपृष्ठे ऽअधिरोचनेदिवः ५० आवाचः॥ आवाचोमद्ध्यमरुहद्भुरण्युरय

संहि॰ मुग्निः सत्पतिश्चेकितानः॥ पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणु शु॰अ॰

११६ तां ये पृतन्यवः ५१ अयमग्निः॥ अयमग्निर्वीरतमो वयोधाः सहस्रि १५

यो द्योततामप्रयुच्छन्॥ विभ्राजमानः सरिरस्य मध्यऽउप प्रयाहि दिव्या

निधाम ५२ सम्प्रच्यवध्वमुप॥ सम्प्रयाताग्ने पथो देवयानान्कृणुध्वम्॥

पुनः कृण्वाना पितरा युवानान्वाताꣳसीत्त्वयि तन्तुमेतम् ५३ उद्बुध्य

स्व॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयञ्च॥ अ- ११६

स्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ५४ येन

वर्हसि॥ सहस्रं य्येनाग्ग्नेसर्व्ववेदसम्॥ तेनेमे य्यज्ञन्नोनयस्स्वर्द्देवेषु ग
न्तवे ५५ अयन्ते॥ अयन्ते योनिर्ऋत्वियो यतोजातोऽअरोचथाः तञ्जा
नन्नग्नऽआरोहाथानोवर्द्धयारयिम् ५६ तपश्च॥ तपश्चतपस्यश्च
शैशिरावृतूऽअग्ग्नेरन्तःश्लेषोसिकल्प्येतान्द्यावापृथिवीकल्प्यन्तामा
पऽओषधयःकल्प्यन्तामग्ग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्रताः॥ येऽअ
ग्नयःसमनसोन्तराद्यावापृथिवीऽइमे॥ शैशिरावृतूऽअभिकल्प्यमा
नाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ५७

संहि परमेष्ठीत्त्वा॥सादयतुदिवस्पृष्ठेज्ज्योतिष्मतीम्॥विश्वस्मैप्प्राणाया शु.अ.
११७ पानायव्व्यानायविश्वञ्ज्योतिर्य्यच्छ॥सूर्य्यस्तेधिपतिस्तयादेवतया- १५
ङ्गिरस्वद्ध्रुवासीद ५८ लोकम्पृण॥छिद्रम्पृणाथोसीदद्ध्रुवात्वम्॥इन्द्रा-
ग्नीत्वाबृहस्पतिरस्मिन्योनावसीषदन् ५९ ताऽअस्य॥सूददोहसः
सोमꣳश्रीणन्तिपृश्नयः॥जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ६०
इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः॥रथीतमꣳरथीनांवाजा ११७
नांꣳसत्पतिम्पतिम् ६१ प्रोथदश्वः॥प्रोथदश्वोनयवसेविष्ष्यन्यु

न्त्यदामह२ः संवरेणाद्यस्थात्॥ आदस्यव्वातोऽअनुवातिशोचिरधे-
स्मतेव्व्रजेनकृष्णमस्ति॥ ६२ आयोष्ट्वा॥ आयोष्ट्वासदनेसादयाम्म्यवत
श्छायायाꣳ समुद्रस्यहृदये॥ रश्मीवतीम्भास्वतीमायाद्याम्भास्यापृ
थिवीमोर्व्वन्तरिक्षम् ६३ परमेष्ठीत्वा॥ सादयतुदिवस्पृष्ठेव्यचस्वतीम्प्र
थस्वतीन्दिवंय्यच्छदिवन्दृꣳह दिवम्माहिꣳसीः॥ विश्श्वस्मैप्प्राणाया
पानायव्यानायोदानायप्प्रतिष्ठायैचरित्राय॥ सूर्य्यस्त्वाभिपातुमह्या
स्वस्त्याछर्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ६४ सहस्रस्य

संहि॰ प्प्रमा॥सिसहस्त्रस्यप्प्रतिमासिसहस्त्रस्योन्न्मासिसाहस्त्रोसिसहस्त्राय पू॰अ॰

११८ त्वा ६५ इतिसंहितापाठेपंचदशोध्यायः॥१५॥ नमस्ते॥नमस्तेरुद्रमन्न्य १६

वऽउतोतऽइषवेनमः॥बाहुभ्यामुततेनमः १ याते॥रुद्रशिवातनूरघो

रापापकाशिनी॥तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि २ या

मिषुम्॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे॥शिवाङ्गिरित्रताङ्कुरुमाहिंᳲ

सीःपुरुषञ्जगत् ३ शिवेनवचसा॥त्वागिरिशाच्छावदामसि॥यथानःस ११८

र्व्वमिज्जगदयक्ष्मᳲसुमनाऽअसत् ४ अद्ध्यवोचत्॥अद्ध्यवोचदधिव

क्काप्प्रथमोदैव्योभिषक्॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्यो

धराचीः परासुव ५ असौयः॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुम

ङ्गलः॥ येचैनंरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोवैषांहेडऽईमहे ६

असौयः॥ असौयोवसर्प्पतिनीलग्रीवोविलोहितः॥ उतैनंगोपाऽअदृ

श्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ७ नमोस्तु॥ नमोस्तुनीलग्री

वायसहस्राक्षायमीढुषे॥ अथोयेऽअस्यसत्वानोहंतेभ्योकरन्नमः॥ ८

॥ प्रमुंच॥ प्रमुंचधन्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम्॥ याश्चतेहस्तऽइष-

वुः परातांभगवोवप ९ विज्ज्यन्धनुः॥ कपर्दिनोविशल्ल्योबाणवाँ२॥उ
त॥ अनेशन्नस्यया ऽ इषव ऽ आभुरस्यनिषङ्गधिः १० याते॥ हेतिर्म्मीढुष्ट
मुहस्तेबभूवतेधनुः॥ तयास्म्मान्विश्श्वतस्त्वमयक्ष्ममयापरिभुज ११
परिते॥ परितेधन्न्वनोहेतिरस्म्मान्न्वृणक्तुविश्श्वतः॥ अथोय ऽ इषु
धिस्तवारे ऽ अस्म्मन्निधेहितम् १२ अवतत्यधनुः॥ अवतत्यधनुष्ट्वं
सहस्राक्षशतेषुधे॥ निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव १३
नमस्ते॥ नमस्त ऽ आयुधायानाततायधृष्ष्णवे॥ उभाब्भ्यामुततेनमोबा

हुब्भ्यान्तवुधन्वने १४ मानः॥ मानोमुहान्तमुतमानोऽ अर्ब्भकम्मानुऽउक्ष
न्तमुतमानऽउक्षितम्॥ मानोव्वधीः पितरुम्मोतमातरुम्मानः प्प्रियास्तन्न्वो
रुद्द्ररीरिषः १५ मानस्तोके॥ तनयेमानुऽआयुषिमानोगोषुमानोऽअश्श्वे
षुरीरिषः॥ मानोव्वीरान्रुद्द्र भामिनोव्वधीर्हविष्म्मन्तः सदुमित्त्वाहवामहे

१६ शतम्॥ ८००॥ नमोहिरण्ण्यबाहवे॥ सेनान्न्येदिशाञ्चपतयेनमोन
मोवृक्षेब्भ्योहरिकेशेब्भ्यः पशूनाम्पतयेनमोनमः शष्प्पिञ्जरायत्त्विषीमते
पथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लु

 शाय १७ नमोबभ्लुशाय॥ व्याधिनेन्नानाम्पतयेनमोनमोभुवस्यहेत्यैज
 गताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःसूताया
हन्त्यैवनानाम्पतयेनमोनमोरोहिताय॥ १८ नमोरोहिताय॥स्थपतयेवृ
क्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेनमोनमो
मन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्ती
नाम्पतयेनमोनमःकृत्स्नायतया १९ नमःकृत्स्नायतया॥ धावतेसत्वना
म्पतयेनमोनमःसहमानायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोन-

मोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्या
नाम्पतयेनमोनमोवञ्चते २० नमोवञ्चते॥ परिवञ्चतेस्तायूनाम्पतये
नमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमः सृकायि
भ्योजिघाँसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्यो
विकृन्तानाम्पतयेनमः २१ नमऽउष्णीषिणे॥ गिरिचरायकुलुञ्चाना
म्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽआतन्वाने-
भ्यः प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमो

संहि विसृजद्भ्यः २२ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्र पू·अ·
१२१ द्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधाव- १६
द्भ्यश्चवोनमोनमः सभाभ्यः २३ नमः सभाभ्यः ॥ सभापतिभ्यश्चवोन
मोनमोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्ती
भ्यश्चवोनमोनमऽउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगणेभ्यः २४ न
मोगणेभ्यो ॥ गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोन १२१
मोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्च

वोनमोनमः सेनाभ्यः २५ नमः सेनाभ्यः ॥ सेनानिभ्यश्चवोनमोनमो र
थिभ्योऽअरथेभ्यश्चवोनमोनमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्चवोनमोनमो
महद्भ्योऽअर्भकेभ्यश्चवोनमः २६ नमस्तक्षभ्यः ॥ नमस्तक्षभ्योरथकारे
भ्यश्चवोनमोनमः कुलालेभ्यः कर्मारेभ्यश्चवोनमोनमोनिषादेभ्यः पु-
ञ्जिष्ठेभ्यश्चवोनमोनमः श्वनिभ्योमृगयुभ्यश्चवोनमोनमः श्वभ्यः
२७ नमः श्वभ्यः श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः शर्वा
यचपशुपतयेचनमोनीलग्रीवायचशितिकण्ठायचनमः कपर्दिने २८

संहि॰ नमः॑कपर्द्दिने ॥ चव्युप्तकेशायचनमः॑सहस्राक्षायचशतधन्वनेचन पू॰अ॰
१२२ मोगिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय १६
२९ नमोह्रस्वाय ॥ चवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायच
सवृधेचनमोग्र्यायचप्रथमायचनमऽआशवे ३० नमऽआशवे ॥ चाजि
रायचनमः शीघ्र्यायचशीभ्यायचनमऽऊर्म्यायचावस्वन्यायचनमोना
देयायचद्वीप्यायच ३१ नमोज्ज्येष्ठायचकनिष्ठायचनमः॑पूर्वजायचापरजायच १२२
नमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायचनमःसोभ्याय ३२

नमः सोभ्याय । च प्प्रतिसर्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लो
क्क्याय चावसान्न्याय च नमऽ उर्व्वर्याय च खल्याय च नमो वन्न्याय ॥ ३३॥
नमो धन्न्याय ॥ च कक्क्ष्याय च नमः श्रवाय च प्प्रतिश्रवाय च नमऽ आशुषे-
णाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ३४ नमो बिल्मि
ने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च न
मो दुन्दुभ्भ्याय चाहनन्न्याय च नमो धृष्णवे ३५ नमो धृष्णवे ॥ च प्प्रमृशाय
च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय

क्षत्रन्द्रविणम्प्रतीचीमारोह ११ प्रतीचीमारोह। जगतीत्त्वावतुवैरूपꣳ
सामसप्तदशस्तोमोवर्षाऽऋतुर्विड्द्रविणमुदीचीमारोह १२ उदीचीमा
रोहानुष्टुप्त्वावतुवैराजꣳसामैकविꣳशस्तोमः शरदृतुः फलन्द्रविणमू
र्ध्वामारोह १३ ऊर्ध्वामारोह। पङ्क्तिस्त्वावतुशाक्वररैवतेसामनीत्रिणवत्रय
स्त्रिꣳशौस्तोमौहेमन्तशिशिरावृतूवर्च्चोद्रविणम्प्रत्यस्तन्नमुचेःशिरः
१४ सोमस्यत्त्विषिः। सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात्॥ मृत्योः
पाह्योजोसिसहोस्यमृतमसि १५ हिरण्यरूपाऽउषसः। हिरण्यरूपाऽउ

 चसुधन्वनेच ३६ नमः स्रुत्याय॥ चपथ्यायचनमः काट्यायचनीप्प्या
 यचनमः कुल्ल्यायचसरस्स्यायचनमोनादेयायचवैशन्तायचनमः कू-
प्प्याय ३७ नमः कूप्प्याय॥ चावट्ट्यायचनमोवीध्यायचातप्प्यायचन
मोमेग्घ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायचनमोवात्याय ३८
नमोवात्याय॥ चरेष्म्यायचनमोवास्तव्यायचवास्तुपायचनमः सोमा
यचरुद्रायचनमस्ताम्रायचारुणायचनमः शङ्गवे ३९ नमः शङ्गवे॥ च
पशुपतयेचनमऽउग्ग्रायचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमो

हन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ४० नमः
शम्भवाय॥चमयोभवायचनमःशङ्करायचमयस्करायचनमः
शिवायचशिवतरायच ४१ नमःपार्य्याय॥चावार्य्यायचनमःप्र
तरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यायच
फेन्यायचनमःसिकत्त्याय ४२ नमःसिकत्याय॥चप्रवाह्याय
चनमःकिंशिलायचक्षयणायचनमःकपर्दिनेचपुलस्तयेचनमः
इरिण्यायचप्रपथ्यायचनमोव्रज्याय ४३ नमोव्रज्याय॥चगो

ष्ठ्यायचनमस्तल्प्प्यायचगेह्य्यायचनमोहृदय्य्यायचनिवेष्प्यायच
नमः काट्ट्यायचगह्वरेष्ठायचनमः शुष्क्याय ४४ नमः शुष्क्याय॥
चहरित्यायचनमः पांसव्यायचरजस्यायचनमोलोप्प्यायचोल
प्प्यायचनमऽऊर्व्यायचसूर्व्यायचनमः पर्णाय ४५ नमः पर्णा-
य॥चपर्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिद
तेचप्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिके १२४
भ्योदेवानाᳬहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योन

मेऽआनिर्हृतेब्भ्यः ४६ द्रापेऽअन्धसः ॥ द्रापेऽअन्धसस्पतेदरिद्रनील
लोहित ॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोच्चनः किञ्चना
ममत् ४७ इमारुद्राय ॥ तवसेकपर्द्दिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥
यथाशमसद्द्विपदेचतुष्प्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ४८ या
ते ॥ रुद्रशिवातनूः शिवाविश्वाहाभेषजी ॥ शिवारुतस्यभेषजीतया
नोमृडजीवसे ४९ परिनः परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मति
रघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्ष्वमीढ्वस्तोकायतनयायमृड ॥ ५०

॥ मीढुष्टमशिवतम ॥ शिवोनः सुमनाभव ॥ परमेवृक्ष ऽ आयुधन्निधा
यकृत्तिंवसानः आचरपिनाकम्बिभ्रदागहि ५१ विकिरिद्रविलोहित ॥
नमस्ते ऽ अस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्न्यमस्मन्निवपन्तुताः ॥
५२ ॥ सहस्राणिसहस्रशः ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥ ता
सामीशानोभगवः पराचीनामुखाकृधि ५३ असङ्ख्यातासहस्राणि ॥ ये
रुद्राऽ अधिभूम्म्याम् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ५४ अ
स्मिन्महति ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽ अधि ॥ तेषाꣳसहस्र

योजनेवधन्वानितन्मसि ५५ नीलग्ग्रीवाःशितिकण्ठाः॥ नीलग्ग्रीवाः
शितिकण्ठादिवँरुद्राऽउपश्श्रिताः॥ तेषाᳫँसहस्रयोजनेवधन्वानि
तन्मसि ५६ नीलग्ग्रीवाःशितिकण्ठाः॥ शर्वाऽअधःक्षमाचराः॥ तेषा
ᳫँसहस्रयोजनेवधन्वानितन्मसि ५७ येवृक्षेषु॥ शष्प्पिञ्जरानील-
ग्ग्रीवाविलोहिताः॥ तेषाᳫँसहस्रयोजनेवधन्वानितन्मसि ५८ येभूता
नाम्॥ येभूतानामधिपतयोविशिखासःकपर्द्दिनः॥ तेषाᳫँसहस्रयो
जनेवधन्वानितन्मसि॥ ५९॥ येपथाम्॥ येपथाम्पथिरक्षयऽऐलबृ

संहि दाऽ आयुर्य्युधः ॥ तेषाᳫ सहस्रयोजनेवधन्वानितन्मसि ६० येतीर्था रु.अ.
१२६ नि॥ प्रचरन्तिसृकाहस्तानिषङ्गिणः॥ तेषाᳫ सहस्रयोजनेवधन्वानि १६
तन्मसि ६१ येन्नेषु॥ विविध्यन्तिपात्रेषुपिबतोजनान्॥ तेषाᳫ सहस्र
योजनेवधन्वानितन्मसि ६२ यऽएतावन्तश्चभूयाᳫसश्चदिशोरुद्रा

वितस्थिरे॥ तेषाᳫ सहस्रयोजनेवधन्वानितन्मसि ६४ नमोस्तु॥ रुद्रे
भ्योयेदिवियेषांᳫ वर्षमिषवः॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रती १२६
चीर्दशोदीचीर्दशोर्द्ध्वाः॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय

न्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ६४ नमोस्तु॥रुद्रेभ्योयेन्त
रिक्षेयेषांवातऽइषवः॥तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशो
दीचीर्दशोर्ध्वाः तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ६५ नमोस्तु॥रुद्रेभ्योयेपृथिव्यां-
येषामन्नमिषवः तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदी
चीर्दशोर्ध्वाः॥तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ६६ इतिवाजसनेयसंहितायांदीर्घ

संहि· पाठेषोडशोध्यायः १६ अश्मन्नूर्ज्जम् ॥ अश्मन्नूर्ज्जम्पर्वते शिश्रिया पू·अ·
१२७ णामद्भ्यऽओषधीभ्यो वनस्पतिभ्यो अधिसम्भृतम्पयः ॥ तान्नऽइष १७
मूर्ज्जन्धत्तमरुतः सꣳरराणाऽ अश्मँस्तेक्षुन्मयितऽऊर्ग्यन्द्विष्मस्त
न्तेशुगृच्छतु १ इमामे ॥ अग्नऽइष्टकाधेनवः सन्त्वेकाचदशचदशचश
तञ्चशतञ्चसहस्रञ्चसहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्रयु
तञ्चार्बुदञ्चन्यर्बुदञ्चसमुद्रश्चमध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअ- १२७
ग्नऽइष्टकाधेनवः सन्त्वमुत्रामुष्मिँल्लोके २ ऋतवस्थ ॥ ऽऋतावृध

ऽऋतुष्ठास्थेऽऋतावृधः ॥ घृतश्च्युतोमधुश्च्युतोविराजोनामकामदु
घाऽअक्षीयमाणाः ३ समुद्रस्येत्वा ॥ समुद्रस्यत्वावकयाग्नेपरिव्य
यामसि ॥ पावकोऽअस्मभ्यꣳशिवोभव ४ हिमस्येत्वा ॥ जरायुणा
ग्नेपरिव्ययामसि ॥ पावकोऽअस्मभ्यꣳशिवोभव ५ उपज्मन् ॥ उ
पज्मन्नुपवेतसेवतरन्नदीष्वा ॥ अग्नेपित्तमपामसिमण्डूकिताभि
रागहिसेमन्नोयज्ञम्पावकवर्ण्णꣳशिवङ्कृधि ६ अपामिदम् ॥ अपामि
दन्न्ययनꣳसमुद्रस्यनिवेशनम् ॥ अन्न्याँस्तेऽअस्मत्तपन्तुहेतयः पा

संहि॰ वकोऽअस्मभ्यर्ठ॰शिवोभव ७ अग्नेपावक॥ रोचिषामन्द्रयादेवजि पू॰अ॰
१२८ ह्वया॥ आदेवान्वक्षियक्षिच ८ सनः पावकदीदिवोग्नेदेवाँ२॥ऽइहाव १७
ह॥ उपयज्ञर्ठ॰हविश्चनः ९ पावकयायः॥ पावकयायश्चितयन्त्याकृ
पाक्षामन्नुरुचऽउषसोनभानुना॥ तूर्वन्नयामन्नेतशस्यनूरणऽआ-
योघृणेनततृषाणोऽअजरः १० नमस्ते॥ नमस्तेहरसेशोचिषेनमस्ते
ऽअस्त्वर्चिषे॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यर्ठ॰ १२८
शिवोभव ११ नृषदेवेट्॥ नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वनसदेवेड्स्वर्विदेवे

ट् १२ ये दे॒वाः॥ ये दे॒वा दे॒वानां॑ य॒ज्ञिया॑ य॒ज्ञियो॑नाᳪ संवत्स॒रीण॒मुप॑
भा॒गमास॑ते॥ अ॒हु॒तादो॑ ह॒विषो॑ य॒ज्ञेऽअ॒स्मिन्त्स्व॒यम्पि॑बन्तु॒ मधु॑नो घृ॒
तस्य॑ १३ ये दे॒वाः। ये दे॒वा दे॒वेष्वधि॑ दे॒व॒त्वमाय॒न्न्ये ब्रह्म॑णः पु॒रऽए॒तारो॑ऽ
अ॒स्य॥ येभ्यो॒ नऽऋ॒ते पव॑ते॒ धाम॒ किञ्च॒न न ते दि॒वो न पृ॑थि॒व्याऽअधि॑
स्नु॒षु १४ प्रा॒ण॒दाऽअ॑पान॒दाः॥ प्रा॒ण॒दाऽअ॑पान॒दा व्या॑न॒दा व॑र्चो॒दा व॑रि
वो॒दाः॥ अ॒न्याँस्ते॑ऽअ॒स्मत्त॑पन्तु हे॒तयः॑ पा॒व॒कोऽअ॒स्मभ्य॑ꣳ शि॒वो
भ॑व १५ अ॒ग्निस्ति॒ग्मेन॑॥ शो॒चिषा॒ यास॒द्विश्व॒न्न्य॑त्त्रिण॑म्॥ अ॒ग्नि-

संहि॰ न्नीवनतेरयिम् १६ यइमा ॥ विश्वाभुवनानिजुह्वदृषिर्होतान्यसीद- सू॰अ॰
१२९ त्पितानः॥सऽआशिषाद्रविणमिच्छमानःप्प्रथमच्छदवराँ॥आविवेश १७
१७किंꣳस्वित्॥किꣳस्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वित्कथासीत्
॥यतोभूमिञ्जनयन्विश्वकर्म्माविद्यामौर्ण्णोन्महिनाविश्वचक्षाः१८
विश्वतश्चक्षुरुत॥विश्वतोमुखोविश्वतोबाहुरुतविश्वतस्प्पात्॥
सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः१९किंꣳ १२९
स्वित्॥किंꣳस्विद्वनङ्कऽउसवृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः॥

मनीषिणोमनसापृच्छतेदुतद्यद्ध्यतिष्ठद्भुवनानिधारयन् २० याते॥ या
तेधामानिपरमाणियावमायामद्ध्यमाविश्वकर्म्मन्नुतेमा॥ शिक्षासखि
भ्योहविषिस्वधावः स्वयंय्यजस्वतन्वंवृधानः २१ विश्वकर्म्मन्हविषा
॥ वावृधानः स्वयंय्यजस्वपृथिवीमुतद्याम्॥ मुह्यन्त्वन्न्येऽअभितः सु
पत्क्नाऽइहास्माकम्मघवासूरिरस्तु २२ वाचस्पतिम्॥ वाचस्पतिंविश्व
कर्म्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम॥ सनोविश्वानिहवनानिजोष
द्विश्वशम्भूरवसेसाधुकर्म्मा॥२३॥ विश्वकर्म्मन्हविषा॥ वर्द्धनेनत्रातार

मिन्द्रंमरुणोरवृद्ध्यम्॥ तस्मैमोविशः समनमन्तपूर्वीरयमुग्रोविहव्योय
थासत् २४ चक्षुषः पिता॥ मनसाहिधीरो घृतमेनेऽअजनन्नम्नमाने॥
यदेदन्ताऽअददृहन्तपूर्वऽआदिद्द्यावापृथिवीऽअप्रथेताम् २५ विश्वक
र्म्माविमनाः॥ विश्वकर्म्माविमनाऽआद्विहायाधाताविधातापरमोतस
न्दृक्॥ तेषामिष्टानिसमिषामदन्तियत्त्रासप्तऽऋषीन्परऽएकमाहुः
२६ योनः पिताजनितायोविधाताधामानिवेदभुवनानिविश्वा॥ योदेवा १३०
नान्नामधाऽएकऽएवतꣳसम्प्रश्नम्भुवनायन्त्यन्या २७ तऽआयजन्त

द्रविणंःसमस्माऽऋषयःपूर्वेजरितारोनभूना॥ असूर्त्तेसूर्त्तेरजसिनि
षत्तेयेभूतानिसमकृण्वन्निमानि २८ पुरोदिवा॥ परऽएनापृथिव्यापरोदे
वेभिरसुरैर्यदस्ति॥ कंस्विद्गर्भम्प्रथमन्दध्रऽआपोयत्रदेवाःसमप
श्यन्तपूर्वे २९ तमित्॥ तमिद्गर्भम्प्रथमन्दध्रऽआपोयत्रदेवाःसमगच्छन्त
विश्वे॥ अजस्यनाभावध्येकमर्पितंयस्मिन्विश्वानिभुवनानितस्थुः
३० नतम्॥ नतंविदाथयऽइमाजजानान्यद्युष्माकमन्तरम्बभूव॥ नीहा
रेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ३१ विश्वकर्म्माहि॥

संहि ध्रुश्चकेम्मर्त्त्यऽजनिष्टदेवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः॥तृतीयः पि पू.अ.

१३१ ताजनितौषधीनामपाङ्गर्ब्भंव्यदधात्पुरुत्रा ३२ आशुःशिशानः॥आशुः १७

शिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम्॥सङ्क्रन्दनोनि

मिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रः ३३ सङ्क्रन्दनेनानिमिषे

ण॥जिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिन्द्रेणजयततत्सह

ध्वंयुधोनरऽइषुहस्तेनवृष्ण्णा ३४ सऽइषुहस्तैः॥सऽइषुहस्तैःसनिष १३१

ङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन॥सꣳसृष्टजित्सोमपावाहुश

ग्रुग्मधन्वाप्प्रतिहिताभिरस्ता ३५ बृहस्प्पतेपरि॥दीयारथेनरक्षोहा
मित्राँ२॥ऽअपबाधमानः॥प्प्रभञ्जन्त्सेनाःप्प्रमृणोयुधाजयन्नस्म्मा
कमेध्यविता रथानाम् ३६ बलविज्ञायस्त्थविरः॥बलविज्ञायस्त्थविरः
प्प्रवीरःसहस्वान्वाजीसहमानऽउग्ग्रः॥अभिवीरोऽअभिसत्वासहो
जाजैत्रमिन्द्ररथमातिष्ठगोवित् ३७ गोत्त्रभिदङ्गोविदम्॥गोत्त्रभिदङ्गो
विदं वज्ज्रबाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा॥इमꣳसजाताऽअनुवी
रयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम् ३८ अभिगोत्त्राणि॥अभिगोत्त्रा

संहि णिसहसागाहमानोदयोव्वीरः शतमन्युरिन्द्रः ॥ दुश्च्यवनः पृतनाषा यू.अ.
१३२ डयुद्ध्योऽस्म्माकꣳसेनाऽअवतुप्प्रयुत्सु ३९ इन्द्रऽआसाम् ॥ इन्द्रऽआसान्ने १७
ताबृहस्पतिर्द्दक्षिणायज्ञः पुरऽएतुसोमः ॥ देवसेनानामभिभञ्जतीना
ञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम ४० इन्द्रस्यवृष्ण्णः ॥ इन्द्रस्यवृष्ण्णोवरुणस्य
राज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥ महामनसाम्भुवनच्च्यवानाङ्घो
षोदेवानाञ्जयतामुदस्थात् ४१ उद्धर्षय ॥ मघवन्नायुधान्युत्सत्वनाम्मा १३२
मकानाम्मनाꣳसि ॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयतांय-

न्तुघोषाः ४२ अस्माकमिन्द्रः॥समृतेषुध्वजेष्वस्माकंजाऽइषवस्ताज
यन्तु॥अस्माकंवीराऽउत्तरेभवन्त्वस्माँ२॥ऽउदेवाऽअवताहवेषु ४३ अमी
षाञ्चित्तम्॥अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि॥अभि
प्रेहिनिर्द्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ४४ अवसृष्टापरा॥
पतशरव्येब्रह्मसꣳशिते॥गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः
४५ प्रेत॥प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु॥उग्रावः÷सन्तुबाहवोना
धृष्याय्यथासथ ४६ असौया॥सेनामरुतःपरेषामभ्येतिनओजसास्प

संहि· ईमाना॥ताङ्गृहतन्तमसापव्रतेनयथामीऽअन्योऽअन्यन्नजानन् ४७अ पू·अ·
१३३ न्धेबाणाः॥सम्पतन्तिकुमाराविशिखाऽईव॥तन्नऽइन्द्रोबृहस्पतिरदि १०
तिः शर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ४८मर्म्माणिते॥मर्म्माणितेवर्म्म
णाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्॥उरोर्वरीयोवरुणस्तेकृणो
तुजयन्तन्त्वानुदेवामदन्तु ४९उदेनम्॥उदेनमुत्तरान्नयाग्नेघृतेनाहुत॥रा
यस्पोषेणसꣳसृजप्रजयाचबहुङ्कृधि ५०शतम्॥९००॥इन्द्रेमम्॥इन्द्रे १३३
मम्प्रतरान्नयसजातानामसद्वशी॥समेनंवर्च्चसासृजदेवानाम्भागदाऽ—

असत् ५१ यस्यकुर्म्मेः॥ यस्यकुर्म्मोगृहेहविस्तमग्नेवर्द्धयात्वम्॥ तस्मै
देवाऽअधिब्रुवन्नयञ्चब्रह्मणस्पतिः॥५२॥ उदुत्वा॥ उदुत्वाविश्वेदेवाऽ
अग्नेभरन्तुचित्तिभिः॥ सनोभवशिवस्त्वꣳसुप्रतीकोविभावसुः ५३ प
ञ्चदिशः॥ पञ्चदिशोदैवीर्यज्ञमवन्तुदेवीरपामतिन्दुर्म्मतिम्बाधमानाः
रायस्पोषेयज्ञपतिमाभजन्तीरायस्पोषेऽअधियज्ञोऽअस्थात् ५४ स
मिद्धेऽअग्नौ॥ समिद्धेऽअग्नावधिमामहानऽउक्थपत्रऽईड्योगृभीतः॥
तप्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यज्ञमयजन्तदेवाः ५५ दैव्यायधर्त्रे

संहि॰ ।जोष्टे देवश्श्रीः श्रीमनाः शतपयाः ॥ परिगृह्य देवाखज्ञमायन्देवादेवेभ्यो ऽ पू॰अ॰
१३४ अध्वर्यन्तो ऽ अस्थुः ५६ वीतꣳ हविः शमितꣳ शमिताखजध्यै तुरीयो १७
खज्ञोखत्र हव्यमेति ॥ ततोवाका ऽ आशिषोनोजुषन्ताम् ५७ सूर्य्यर-
श्मिर्हरिकेशः पुरस्तात्सविताज्योतिरुदयाꣳ ॥ अजस्रम् ॥ तस्यपूषाप्र
सवे खाति विद्वान्त्सम्पश्यन्विश्वाभुवनानिगोपाः ५८ विमाने ऽ एषः ॥
विमान ऽ एषदिवोमध्य ऽ आस्त ऽ आपप्रिवान्रोदसी ऽ अन्तरिक्षम् ॥ स १३४
विश्वाचीरभिचष्टे घृताचीरन्तरापूर्वमपरञ्चकेतुम् ५९ उक्षासमुद्रः ॥

उक्षासमुद्रोऽअरुणः सुपर्णः पूर्वस्ययोनिम्पितुराविवेश। मध्येदि
वोनिहितः पृश्निरश्माविचक्रमेरजसस्पात्यन्तौ ६० इन्द्रंविश्वाः॥
इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः॥ रथीतमᳪंरथीनांवाजाना
ᳪंसत्पतिम्पतीम् ६१ देवहूर्यज्ञः॥ देवहूर्यज्ञऽआचवक्षत्सुम्नहूर्यज्ञऽ
आचवक्षत्॥ यक्षदग्निर्देवोदेवाँ२॥ऽआचवक्षत् ६२ वाजस्यमा॥ प्रस
वऽउद्ग्राभेणोदग्रभीत्॥ अधासपत्नानिन्द्रोमेनिग्राभेणाधराँ२॥ऽअकः
६३ उद्ग्राभञ्च॥ निग्राभञ्चब्रह्मदेवाऽअवीवृधन्॥ अधासपत्नानिन्द्रा

ग्नीमेविषूचीनान्व्यस्यताम् ६४ क्रमध्वमग्निना ॥ क्रमध्वमग्निनानाक
मुख्यꣳहस्तेषुबिभ्रतः ॥ दिवस्पृष्ठꣳस्वर्ग्गत्वामिश्रादेवेभिराध्वम् ६५
प्राचीमनु ॥ प्रदिशम्प्रेहिविद्वानग्नेरग्नेपुरोऽअग्निर्भवेह ॥ विश्वाआ
शादीद्यानोविभाह्यूर्ज्जन्नोधेहिद्विपदेचतुष्पदे ६६ पृथिव्याऽअहम्
॥ पृथिव्याऽअहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ॥ दिवोनाक
स्यपृष्ठात्स्वर्ज्ज्योतिरगामहम् ६७ स्वर्य्यन्तः ॥ स्वर्य्यन्तोनापेक्षन्तऽआ
द्याꣳरोहन्तिरोदसी ॥ यज्ञंयेविश्वतोधारꣳसुविद्वाꣳसोवितेनिरे ॥ ६८

अग्नेप्र॥ अग्ने प्रेहि प्रथमो देवयुतां चक्षुर्द्देवानामुत मर्त्यानाम्॥ इ
यक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ६९ नक्तो-
षासा॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची॥ द्या
वाक्षामा रुक्मो ऽअन्तर्विभाति देवा ऽअग्निं धारयन्द्रविणोदाः ७० अ
ग्ने सहस्राक्ष॥ शतमूर्द्धञ्छतन्ते प्राणाः सहस्रं व्यानाः॥ त्वꣳ साहस्र
स्य राय ऽईशिषे तस्मै ते विधेम वाजाय स्वाहा ७१ सुपर्णोसि गरुत्मा
न्पृष्ठे पृथिव्याः सीद॥ भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेज

संहि॰ सादिशुऽउद्दृꣳह ७२ आजुह्वानःसुप्रतीकः ॥ पुरस्तादग्नेस्वंयोनिमा यु॰अ॰
१३६ सीदसाधुया ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसी १७
दत ॥ ७३ ताꣳसवितुः ॥ ताꣳसवितुर्वरेण्यस्यचित्रामाहंवृणेसुमतिंविश्व
जन्याम् ॥ यामस्यकण्वोऽअदुहत्प्रपीनाꣳसहस्रधारांपयसामहीङ्गा
म् ॥ ७४ विधेमते ॥ परमेजन्मन्नग्नेविधेमस्तोमैरवरेसधस्थे ॥ यस्माद्यो
नेरुदारिथायजेतम्प्रत्वेहवीꣳषिजुहुरेसमिद्धे ७५ प्रेद्धोऽअग्ने ॥ प्रेद्धोऽअ १३६
ग्नेदीदिहिपुरोनोजस्रयासूर्म्यायविष्ठ ॥ त्वाꣳशश्वन्तऽउपयन्तिवाजाः

७६ अग्नेतम् ॥ अग्नेतमद्याश्वन्नस्तोमैः क्रतुन्नभद्रꣳहृदिस्पृशम् ॥
ऋध्यामातऽओहैः ७७ चित्तिञ्जुहोमि ॥ चित्तिञ्जुहोमिमनसाघृतेनयथादे
वाऽइहागमन्वीतिहोत्राऽऋतावृधः ॥ पत्युर्विश्वस्यभूमनोजुहोमिवि
श्वकर्म्मणेविश्वाहादाभ्यꣳहविः ७८ सप्ततेऽ ॥ ऽअग्नेसमिधः सप्तजि
ह्वाः ॥ सप्तऽऋषयः सप्तधामप्प्रियाणि ॥ सप्तहोत्राः सप्तधात्वायज
न्तिसप्तयोनीरापृणस्वघृतेनस्वाहा ७९ शुक्रज्ज्योतिश्च ॥ चित्रज्ज्यो
तिश्चसत्यज्ज्योतिश्चज्ज्योतिष्माँश्च ॥ शुक्रश्चऽऋतपाश्चात्यꣳहाः

संहि ८० ईदृङ्चं ॥ ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च ॥ मितश्च संमितश्च सभराः पू.अ.
१३७ ८१ ऋतश्चं सत्यश्च ध्रुवश्च धरुणश्च ॥ धर्ता च विधर्ता च विधारयः ८२ ऋ १७
तजिच्च ॥ सत्यजिच्च सेनजिच्च सुषेणश्च ॥ अन्तिमित्रश्च दूरेऽअमित्रश्च
गणः ८३ ईदृक्षास ऽएतादृक्षासः ॥ ईदृक्षास ऽएतादृक्षास ऽऊषुणः सदृ
क्षासः प्रतिसदृक्षासु ऽएतन ॥ मितासश्च संमितासो नो ऽअद्य सभरसो
मरुतो यज्ञे ऽअस्मिन् ८४ स्वतवाँश्च ॥ प्रघासी च सान्तपनश्च गृहमेधी १३७
च ॥ क्रीडी च शाकी चोज्जेषी ८५ इन्द्रं दैवीः ॥ इन्द्रं दैवीर्विशो मरुतोऽनुव

र्त्मानोभवन्यथेन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभवन्॥एवमिमंय
जमानन्दैवीश्चविशोमानुषीश्चानुवर्त्मानोभवन्तु ८६ इमꣳस्तनम्
॥इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्नेसरिरस्यमद्ध्ये॥उत्सञ्जुष
स्वमधुमन्तमर्वत्समुद्रियꣳसदनमाविशस्व ८७ घृतम्मिमिक्षे॥घृतमस्य
योनिर्घृतेश्रितोघृतम्वस्यधाम॥अनुष्वधमावहमादयस्वस्वाहाकृतंवृ
षभवक्षिहव्यम् ८८ समुद्रादूर्म्मिः॥समुद्रादूर्म्मिर्म्मधुमाँ२॥उदारदुपा
ꣳशुनासममृतत्वमानट्॥घृतस्यनामगुह्यँय्यदस्तिजिह्वादेवानाममृ

तेस्यनाभिः ८९ वयन्नाम॥वयन्नामप्प्रब्रवामाघृतस्यास्मिन्यज्ञेधारया
मानमोभिः॥उपब्रह्माशृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौरऽएतत् ९०
चत्वारिशृङ्गा॥चत्वारिशृङ्गास्त्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअ
स्य॥त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ँ॥आविवेश ९१ त्रिधाहि
तम्॥त्रिधाहितम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविन्दन्॥इन्द्रऽए
कर्ठ·सूर्य्यऽएकञ्जजानवेनादेक ँ स्वधयानिष्टतक्षुः ९२ एताऽअर्षन्ति॥
एताअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे॥घृतस्यधाराऽअभि

चाकशीमिहिरण्ययोवेतुसोमध्ध्येऽआसाम् ९३ सम्म्यक्स्रवन्ति॥
सरितोनधेनाऽअन्तर्हृदामनसापूयमानाः॥एतेऽअर्षन्त्यूर्म्मयोघृत
स्यमृगाऽइवक्षिपणोरीषमाणाः ९४ सिन्धोरिवप्राध्वने॥सिन्धोरिप्प्रा
ध्वनेशूघनासोवातप्प्रमियःपतयन्तियह्वाः॥घृतस्यधाराऽअरुषोन
वाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्वमानः ९५ अभिप्रवन्त॥अभिप्रवन्तस
मनेवयोषाःकल्याण्ण्यःस्मयमानासोऽअग्निम्॥घृतस्यधाराः
समिधोनसन्तताजुषाणोहर्य्यतिजातवेदाः ९६ कन्न्याऽइववहतुम्॥

संहि· कुन्त्याऽइवव्वहतुमेतुवाऽउऽअज्ज्यञ्ज्ञानाऽअभिचाकशीमि॥यत्र्रसोमः पू·अ·
१३९ सूयतेयत्र्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ९७ अभ्यर्षत॥सुष्टुतिङ्ग् १७
व्यमाजिमस्म्मासुभद्द्राद्द्रविणानिधत्त॥इमय्यज्ञन्नेयतदेवतानोघृतस्य
धारामधुमत्पवन्ते ९८ धामन्ते॥धामन्तेव्विश्श्वम्भुवनमधिश्श्रितमन्तः
समुद्द्रेहृद्द्य न्तरायुषि॥अपामनीकेसमिथेयऽआभृतस्तमश्श्यामुमधुम
त तऽऊर्म्मिम् ९९ इतिसंहितायांदीर्घपाठेसप्तदशोध्यायः॥१७॥ व्वा १३९
जेश्श्च॥मेप्प्रसवश्श्चमेप्प्रयतिश्श्चमेप्प्रसितिश्श्चमेधीतिश्श्चमेक्रतुश्श्चमेस्व

रश्चमेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्प
न्ताम् १ प्राणश्च॥मेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेवा
क्चमेमनश्चमेचक्षुश्चमेश्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् २
ओजश्च॥मेसहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिचमेस्थी
निचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ३
ज्यैष्ठ्यञ्च॥मऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमा
चमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्ध

 र्द्धिश्चमेयज्ञेनकल्पन्ताम् ४ सत्यञ्च॥मेश्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्च
 ञ्चमेमहश्चमेक्रीडाचमेमोदश्चमेजातञ्चमेजनिष्यमाणञ्चमेसूक्तञ्चमे १७
सुकृतञ्चमेयज्ञेनकल्पन्ताम् ५ ऋतञ्च॥मेमृतञ्चमेयक्ष्मञ्चमेनामय
च्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्च
मेसूषाश्चमेसुदिनञ्चमेयज्ञेनकल्पन्ताम् ६ यन्ताच॥मेधर्ताचमेक्षेमश्च
मेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरं १४
ञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ७ शंचमेमयश्चमेप्रियञ्चमेनुकामश्च

मेकामश्चमेसौमनसश्चमेभगश्चमेद्रविणञ्चमेभद्रञ्चमेश्रेयश्चमेवसी
यश्चमेयशश्चमेयज्ञेनकल्पन्ताम्॥ऊर्क्च॥मेसूनृताचमेपयश्चमेरसश्च
मेघृतञ्चमेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽ
औद्भिद्यञ्चमेयज्ञेनकल्पन्ताम्९रयिश्च॥मेरायश्चमेपुष्टञ्चमेपुष्टिश्चमे
विभुचमेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमे क्षु
च्चमेयज्ञेनकल्पन्ताम्१०वित्तञ्च॥मेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसु
गञ्चमेसुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमति

संहि॰ श्चमेसुमतिश्चमेयज्ञेनकल्पन्ताम् ११ व्रीहयश्च ॥ मेयवाश्चमेमाषाश्चमेति पू॰अ॰
१४१ लाश्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनीवारा १८
श्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनकल्पन्ताम् १२ अश्माच ॥ मेमृत्तिका
चमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेय
श्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम् १३ अग्नि
श्च ॥ मऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्च १४१
मेग्राम्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्च

मेयुज्ञेनकल्पन्ताम् १४ वसुच॥मेवसतिश्चमेकर्म्मचमेशक्तिश्चमेर्थ
श्चमऽएमश्चमऽइत्याचमेगतिश्चमेयुज्ञेनकल्पन्ताम् १५ अग्निश्च॥म
ऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीचमऽइन्द्र
श्चमेपूषाचमऽइन्द्रश्चमेबृहस्पतिश्चमऽइन्द्रश्चमेयुज्ञेनकल्पन्ताम् १६
मित्रश्च॥मऽइन्द्रश्चमेवरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्रश्चमेत्त्वष्टा
चमऽइन्द्रश्चमेमरुतश्चमऽइन्द्रश्चमेविश्वेचमेदेवाऽइन्द्रश्चमेयुज्ञेनक
ल्पन्ताम् १७ पृथिवीच॥मऽइन्द्रश्चमेन्तरिक्षञ्चमऽइन्द्रश्चमेद्यौश्चमऽ

संहि॰ इन्द्रश्चमेसमाश्चमऽइन्द्रश्चमेनक्षत्राणिचमऽइन्द्रश्चमेदिशश्चमऽइन्द्रश्च पू॰अ॰
१४२ मेयज्ञेनकल्पन्ताम् १८ अꣳशुश्च॥मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चम १८
ऽउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआश्विन
श्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्पन्ताम् १९ आग्र
यणश्च॥मेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावैश्वदे
वश्चमेमरुत्वतीयाश्चमेनिष्केवल्यश्चमेसावित्रश्चमेसारस्वतश्चमेपात्नी १४२
वतश्चमेहारियोजनश्चमेयज्ञेनकल्पन्ताम् २० स्रुचश्च॥मेचमसाश्चमेवा

यव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽआधवनी
यश्चमेवेदिश्चमेबर्हिश्चवभृथश्चमेस्वगाकारश्चमेयज्ञेनकल्पन्ताम् २१ अग्नि
श्च॥मेघर्मश्चमेर्कश्चमेसूर्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवीचमेदिति
श्चमेदितिश्चमेद्यौश्चमेङ्गुलयः शक्वरयोदिशश्चमेयज्ञेनकल्पन्ताम् २२ व्र
तञ्च॥मऽऋतवश्चमेतपश्चमेसंवत्सरश्चमेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेच
मेयज्ञेनकल्पन्ताम् २३ एकाच॥मेतिस्रश्चमेतिस्रश्चमेपञ्चचमेपञ्चचमे
सप्तचमेसप्तचमेनवचमेनवचमऽएकादशचमऽएकादशचमेत्रयोदशचमे

संहि॰ त्रयोदशचमे पञ्चदशचमे पञ्चदशचमे सप्तदशचमे सप्तदशचमे नवदशच यू॰अ॰
१४३ मे नवदशचमऽएकविꣳशतिश्चमऽएकविꣳशतिश्चमे त्रयोविꣳशतिश्चमे त्र १८
योविꣳशतिश्चमे पञ्चविꣳशतिश्चमे पञ्चविꣳशतिश्चमे सप्तविꣳशतिश्चमे
सप्तविꣳशतिश्चमे नवविꣳशतिश्चमे नवविꣳशतिश्चमऽ
एकत्रिꣳशच्चमऽएकत्रिꣳशच्चमे त्रयस्त्रिꣳशच्चमे यज्ञेनकल्पन्ताम् २४
चतस्रश्च ॥ मेऽष्टौचमेऽष्टौचमे द्वादशचमे द्वादशचमे षोडशचमे षोडशचमे विꣳश १४३
तिश्चमे विꣳशतिश्चमे चतुर्विꣳशतिश्चमे चतुर्विꣳशतिश्चमेऽष्टाविꣳशतिश्चमे

ष्टाविꣳशतिश्चमे द्वात्रिꣳशच्चमे द्वात्रिꣳशच्चमे षट्त्रिꣳशच्चमे षट्त्रिꣳशच्च
मेचत्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्च
मेऽष्टाचत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् २५ त्र्यविश्च॥मेत्र्यवीचमेदित्यवाट्
मेदित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्
मेतुर्य्यौहीचमेयज्ञेनकल्पन्ताम् २६ पष्ठवाट्॥मेपष्ठौहीचमऽउक्षाचमेवशा
चमऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ञेनकल्पन्ताम् २७ वाजाय
स्वाहा॥प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहावसवेस्वाहाहर्प्पतयेस्वा

हाग्नेमुग्ग्धाय्यैवैनर्ठ॑शिनायुस्वाहाविनर्ठ॑शिनऽआन्त्यायुनायुस्वाहान्त्याय
भौवुनायुस्वाहाभुवनस्युपतयेस्वाहाधिपतयेुस्वाहाप्प्रजापतयेुस्वाहा॥इुय
न्तेराण्मिुत्त्रायय्युन्तासियमनऽऊुर्ज्जेत्वाुवृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्याय २८
आयुर्य्युज्ञेनकल्प्पताम्प्राणोयुज्ञेनकल्प्पताुञ्चक्षुर्युज्ञेनकल्प्पताुर्ठ॑श्श्रो
त्रंयुज्ञेनकल्प्पतांवाग्युज्ञेनकल्प्पताुम्मनोयुज्ञेनकल्प्पतामात्माुयुज्ञेन
कल्प्पताम्ब्रुह्मायुज्ञेनकल्प्पताुञ्ज्योतिर्य्युज्ञेनकल्प्पताुर्ठ॑स्वर्य्युज्ञेनकल्प्प
ताम्पृष्ठंय्युज्ञेनकल्प्पतांयुज्ञोयुज्ञेनकल्प्पताम्॥स्तोमश्चुयजुश्चुऽऋक्चुसा

मंचबृहच्चरथन्तरञ्च॥स्वर्द्देवाऽअगन्मामृताऽअभूमप्रजापतेःप्रजाऽअ
भूमवेट्स्वाहा २९ वाजस्यनु॥प्रसवेमातरम्महीमदितिन्नामवचसाकरामहे
॥यस्यामिदंविश्वम्भुवनमाविवेशतस्यान्नोदेवःसविताधर्म्मसाविषत् ३०
विश्वेऽअद्य॥मरुतोविश्वऽऊतीविश्वेभवन्त्वग्नयःसमिद्धाः॥विश्वेनोदे
वाऽअवसागमन्तुविश्वमस्तुद्रविणंवाजोऽअस्मे ३१ वाजोनः॥सप्तप्र
दिशश्चतस्रोवापरावतः॥वाजोनोविश्वैर्द्देवैर्द्धनसाताविहावतु ३२ वाजो
नः॥वाजोनोऽअद्यप्रसुवातिदानंवाजोदेवाँ२॥ऽऋतुभिःकल्पयाति॥

संहि॰ व्वाजोहिमासर्व्ववीरञ्जजानव्विश्वाऽआशाव्वाजयतिर्ज्जयेयम् ॥ ३३ व्वाजः शु॰अ॰
१४५ पुरस्तात् ॥ व्वाजःपुरस्तादुतमध्यतोनोव्वाजोदेवान्हविषावर्द्धयाति ॥ व्वाजोहि १८
मासर्व्ववीरञ्चकारसर्व्वाऽआशाव्वाजपतिर्ब्भवेयम् ३४ सम्मा ॥ सृजामिप
यसापृथिव्याःसम्मासृजाम्यद्भिरोषधीभिः ॥ सोहंव्वाजꣳसनेयमग्ने
३५ पयःपृथिव्याम् ॥ पयःपृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेप
योधाः ॥ पयस्वतीःप्रदिशःसन्तुमह्यम् ३६ देवस्यत्वा ॥ सवितुःप्रसवे १४५
ऽश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेः

साम्म्राज्ज्येनाभिषिञ्चामि ३७ ऋताषाडृतधामा॥ ऋताषाडृतधामाग्नि
र्गन्धर्वस्तस्यौषधयोप्सरसो मुदो नाम॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै
स्वाहा वाट्ताभ्यः स्वाहा ३८ सꣳहितो विश्वसामा॥ सूर्य्यो गन्धर्वस्तस्य मरी
चयोप्सरसऽआयुवो नाम॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट्ता
भ्यः स्वाहा ३९ सुषुम्णः सूर्य्यरश्मिः॥ सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा ग
न्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम॥ सनऽइदम्ब्रह्मक्षत्रम्पा
तु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ४० इषिरो विश्वव्यचाः॥ इषिरो विश्वव्य

वातोगन्धर्वस्तस्यापोऽअप्सरसऽऊर्जोनाम॥ सनऽइदम्ब्रह्मक्षत्र
म्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ४१ भुज्युःसुपर्णः॥ भुज्युःसुपर्णोय
ज्ञोगन्धर्वस्तस्यदक्षिणाऽअप्सरसस्तावानाम॥सनऽइदम्ब्रह्मक्षत्र-
म्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ४२ प्रजापतिर्विश्वकर्मा॥ मनोगन्ध
र्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयोनाम॥सनऽइदम्ब्रह्मक्षत्रम्पातु
तस्मैस्वाहावाट्ताभ्यःस्वाहा ४३ सनः॥ सनोभुवनस्यपतेप्रजापतेयस्यत
ऽउपरिगृहायस्यवेह॥ अस्मैब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छस्वाहा ४४

समुद्रोसि। ससमुद्रोसिनभस्वानार्द्रदानुः शम्भुर्म्मयोभूरभिमावाहिस्वा
हामारुतोसिमरुतांङ्गणः शम्भूर्म्मयोभूरभिमावाहिस्वाहावस्यूरसिदु
वस्वाञ्छम्भूर्म्मयोभूरभिमावाहिस्वाहा ४५ यास्ते॥ऽअग्नेसूर्य्येरुचोदिवं
मातन्वन्तिरश्मिभिः॥ताभिर्न्नोऽअद्यसर्व्वाभिरुचेजनायनस्कृधि ४६ या
वः॥यावोदेवाःसूर्य्येरुचोगोष्वश्वेषुयारुचः॥इन्द्राग्नीताभिःसर्व्वाभी
रुचन्नोधत्तबृहस्पते ४७ रुचन्नः॥रुचन्नोधेहिब्राह्मणेषुरुचंराजस्
नस्कृधि॥रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ४८ तत्वा॥यामिब्रह्मं

 णाव्वन्दमानुस्तदाशास्त्तेयजमानोहुविर्ब्भिः॥ अहेडमानोव्वरुणेहबोध्युरु
 शꣳसमानुऽआयुःप्प्रमोषीः ४९ स्वर्ण॥ स्वर्णघुर्म्मःस्वाहास्वुर्णार्क्कः
स्वाहास्व्वर्णशुक्रःस्वाहास्व्वर्णज्ज्योतिःस्वाहास्व्वर्णसूर्य्यःस्वाहा ५० अ
ग्निंय्युनज्मि॥ अग्निंय्युनज्मिशवसाघृतेनदिव्यꣳसुपर्णंव्वयसाबृ
हन्तम्॥ तेनव्वयङ्गमेमब्ब्रध्नस्यविष्टपꣳस्वोरुहाणाऽअधिनाकमुत्तमम्
५१ शतम् १०००॥ इमौते॥ पुक्षावजरौपतुत्त्रिणौयाभ्याꣳरक्षाꣳस्यपुहꣳ
स्यग्ने॥ ताभ्याम्पतेमसुकृतामुलोकंय्यत्रऽऋषयोजुग्मुःप्प्रथमजाःपुरा

पाः ५२ इन्दुर्दक्षः ॥ श्येनऽऋतावा हिरण्यपक्षः शकुनो भुरण्युः
॥ महान्त्सधस्थे ध्रुवऽआनिषत्तो नमस्तेऽअस्तु मा मा हिꣳसीः ५३ दि
वो मूर्द्धा॥ सि पृथिव्या नाभिरूर्ग्गपामोषधीनाम् ॥ विश्वायुः शर्म्म स
प्रथा नमस्पथे ५४ विश्वस्य मूर्द्धन् ॥ विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रि
तः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिम्भिन्त ॥ दिवस्पर्ज्जन्यादन्त
रिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ५५ इष्टो यज्ञः ॥ इष्टो यज्ञो भृगुराशीर्दा
वसुभिः ॥ तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः ५६ इष्टोऽअग्निः ॥

॥ इष्टोऽअग्निराहुतःपिपर्त्तुनऽइष्टꣳ·हविः ॥ स्वगेदन्देवेभ्योनमः ५७
 यदाकूतात् ॥ यदाकूतात्समसुस्रोद्धृदोवामनसोवासम्भृतञ्चक्षुषोवा
॥ तदनुप्रेतसुकृतामुल्लोकंयत्रऽऋषयोजग्मुःप्रथमजाःपुराणाः
५८ एतꣳ·सधस्थ ॥ एतꣳ·सधस्थपरितेददामियमावहाच्छेवधिञ्जातवे
दाः ॥ अन्वागन्तायज्ञपतिर्वोऽअत्रतꣳस्मजानीतपरमेव्योमन् ५९
एतञ्जानाथ ॥ परमेव्योमन्देवाः सधस्थाविदरूपमस्य ॥ यदागच्छात्पथि
भिर्देवयानैरिष्टापूर्तेकृणवाथाविरस्मै ६० उद्बुध्यस्व ॥ उद्बुध्यस्वाग्ने-

प्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च॥अस्मिन्त्सधस्थेऽअ
ध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ६१ येनवहसि॥सहस्रंयेना
ग्नेसर्ववेदसम्॥तेनेमंयज्ञन्नोनयस्वर्देवेषुगन्तवे ६२ प्रस्तरेणपरिधिना
॥स्रुचावेद्याचबर्हिषा॥ऋचेमंयज्ञन्नोनयस्वर्देवेषुगन्तवे ६३ यद्दत्तम्॥
यद्दत्तंयत्परादानंयत्पूर्त्तंयाश्चदक्षिणाः॥तदग्निर्वैश्वकर्मणःस्व
र्देवेषुनोदधत् ६४ यत्रधाराः॥यत्रधाराऽअनपेतामधोर्घृतस्यचयाः॥
तदग्निर्वैश्वकर्मणः॥स्वर्देवेषुनोदधत् ६५ अग्निरस्मि॥अग्निरस्मि

जन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् ॥ अर्कस्त्रिधातूरज-
सोविमानोजस्रोधर्म्मोहविरऽस्मिनाम ६६ ऋचोनाम ॥ ऋचोनामा-
स्मियजूंषिनामास्मिसामानिनामास्मि ॥ येऽअग्नयःपाञ्चज
न्याऽअस्याम्पृथिव्यामधि ॥ तेषामसित्वमुत्तमःप्रनोजीवातवेसुव ६७
वार्त्रहत्यायशवसेपृतनाषाह्यायच ॥ इन्द्रत्वावर्तयामसि ६८ सहदा
नुम्पुरुहूत ॥ क्षियन्तमहस्तमिन्द्रसम्पिणक्कुणारुम् ॥ अभिवृत्रंवर्द्ध
मानम्पियारुमपादमिन्द्रतवसाजघन्थ ६९ विनः ॥ विनऽइन्द्रमृधोज

हिनीचार्थ्यछपृतन्यतः॥ यो ऽ अस्मार्ं ॥ ऽ अभिदासत्यधरङ्गमयातमेः
७०मृगोन॥ भीमः कुचरोगिरिष्ठाः परावत ऽ आजेगन्थापरस्याः॥ सृकꣳ
सꣳ शायपविमिन्द्रतिग्म्मंविशाच्छून्ताडिधिमृधोनुदस्व॥ ७१॥ वैश्वानरो
नः॥ वैश्वानरोनऽऊतयऽआप्प्रयातुपरावतः॥ अग्निर्न्नःसुष्टुतीरूपे
७२पृष्ठोदिवि॥ पृष्टोऽअग्निःपृथिव्यांपृष्टोविश्वाऽओषधीराविवेश
॥ वैश्वानरःसहसापृष्टोऽअग्निःसनोदिवासरिषस्प्पातुनक्तम् ७३
अश्यामतम्॥ अश्यामतङ्कामंमग्नेतवोतीऽअश्यामरयिꣳरयिवःसु

वीरम् ॥ अश्यामवाजमभिवाजयन्तोऽश्यामद्युम्नमजराजरन्ते ७४ व्वय
 न्तै ॥ ऽअद्यररिमाहिकामम्मुत्तानहस्तानमसोपसद्य ॥ यजिष्ठेनमनसा-
यक्षिदेवानस्त्रेधतामन्मनाविप्प्रोऽअग्ने ७५ धामच्छदग्निः ॥ धामच्छद्
ग्निरिन्द्रोब्रह्मादेवोबृहस्पतिः ॥ सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनः
शुभे ७६ त्वंय्यविष्ठ ॥ दाशुषोनॄः पाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना
७७ इतिसंहितापाठेअष्टादशोऽध्यायः १८ ॥ हरिः ओंम् ॥ स्वाद्वीं
त्वा ॥ स्वादुनातीव्रान्तीव्रेणामृताममृतेन ॥ मधुमतीम्मधुमतासृजामिस

ꣳसोमेन ॥ सोमोस्यश्विभ्याम्पच्यस्वसरस्वत्यैपच्यस्वेन्द्रायसुत्रा
म्णेपच्यस्व १ परीतः ॥ परीतोषिञ्चतासुतꣳसोमोयऽउत्तमꣳहविः
॥ दधन्वायोनर्य्योऽअप्स्वन्तरासुषावसोममद्रिभिः २ वायोः पूतः
॥ पवित्रेणप्रत्यङ्सोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्यःसखा ॥ वायोः
पूतः पवित्रेणप्राङ्सोमोऽअतिद्रुतः ॥ इन्द्रस्ययुज्यःसखा ३ पुना
तिते ॥ परिस्रुतꣳसोमꣳसूर्य्यस्यदुहिता ॥ वारेणशश्वतातना ४ ब्र
ह्मक्षत्रम् ॥ ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रियꣳसुरयासोमः सुतऽआ

संहि· सुतोमदाय॥ शुक्रेणदेवदेवताःपिपृग्धिरसेनान्नंयजमानायधे पू·अ·
१५१ हि ५ कुविदङ्ग॥ यवमन्तोयवंचिद्यथादान्त्यनुपूर्वंवियूय॥ इहेहै १९
षाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्तिंयजन्ति॥ उपयामगृहीतो
स्यश्विभ्यान्त्वासरस्वत्यैत्वेन्द्रायत्वासुत्राम्णऽएषतेयोनिस्तेजसे
त्वावीर्यायत्वाबलायत्वा ६ नानाहि॥ वान्देवहितꣳसदस्कृतम्मास
ꣳसृक्षाथाम्परमेव्योमन्॥ सुरात्वमसिशुष्मिणीसोमऽएषमामाहि १५१
ꣳसीःस्वांयोनिमाविशन्ती ७ उपयामगृहीतोसि॥ उपयामगृहीतो-

स्याश्विनन्तेजः सारस्वतंवीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिर्म्मोदाय
त्वानन्दायत्वामहसेत्वा ८ तेजोसि ॥ तेजोसितेजोमयिधेहिवीर्य्यम
सिवीर्य्यम्मयिधेहिबलमसिबलम्मयिधेह्योजोस्योजोमयिधेहिम
न्युरसिमन्युम्मयिधेहिसहोसिसहोमयिधेहि ९ याव्याघ्रम् ॥ याव्याघ्रंविषू
चिकोभौवृकञ्चरक्षति ॥ श्येनम्पतत्रिणꣳसिꣳहꣳसेम्पात्वꣳहसः
१० यदापिपेष ॥ मातरम्पुत्रः प्रमुदितोधयन् ॥ एतत्तदग्नेऽअनृणोभ
वाम्यहतौपितरौमया ॥ सम्पृचस्थसम्माभद्रेणपृङ्क्त विपृचस्थवि

 मा पाप्मनो पृङ्क्तः ॥ ११ ॥ देवा यज्ञम् ॥ देवा यज्ञमतन्वत भेष-
 जम्भिषजाश्विना ॥ वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः
१२ दीक्षायै रूपम् ॥ दीक्षायै रूपᳪ शष्पाणि प्रायणीयस्य तोक्मा-
नि ॥ क्रयस्य रूपᳪ सोमस्य लाजाः सोमाᳪशवो मधु १३ आतिथ्य-
रूपम्मासरम् ॥ आतिथ्यरूपम्मासरम्महावीरस्य नग्नहुः ॥ रूपमु-
पसदामेतत्तिस्रो रात्रीः सुरासुता १४ सोमस्य रूपम् ॥ सोमस्य रूप-
ङ्क्रीतस्य परिस्रुत्परिषिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रᳪ

सरस्वत्या १५ आसन्दीरूपम् ॥ आसन्दीरूपꣳ राजासन्द्यैवेद्यै
कुम्भीसुराधानी ॥ अन्तरऽउत्तरवेद्यारूपङ्कारोतरोभिषक् १६ वे
द्यावेदिः ॥ वेद्यावेदिः समाप्यतेबर्हिषाबर्हिरिन्द्रियम् ॥ यूपेनयूप
ऽआप्यतेप्रणीतोऽअग्निरग्निना १७ हविर्द्धानंय्यत् ॥ हविर्द्धानं
य्यदश्विनाग्नीध्रंय्यत्सरस्वती ॥ इन्द्रायैन्द्रꣳ सदस्कृतम्पत्नीशा
लङ्गार्हपत्यः १८ प्रैषेभिः प्रैषान् ॥ प्रैषेभिः प्रैषानाप्नोत्याप्रीभिरा-
प्रीर्य्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः १९ पशुभिः पशू

 न्॥पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या॥ छन्दोभिः सामि
 धेनीर्याज्याभिर्वषट्कारान् २० धानाः करम्भः सक्तवः परीवापः
पयो दधि॥ सोमस्य रूपꣳ हविष आमिक्षा वाजिनं मधु २१ धानानां
ꣳ रूपम्॥ धानानाꣳ रूपं कुवलं परीवापस्य गोधूमाः॥ सक्तूनाꣳ रूप
म्बदरमुपवाकाः करम्भस्य २२ पयसो रूपम्॥ पयसो रूपं यद्यवा द
ध्नो रूपं कर्कन्धूनि॥ सोमस्य रूपं वाजिनꣳ सौम्यस्य रूपमामिक्षा॥
२३ आश्रावय॥ आश्रावयेति स्तोत्रियाः प्रत्याश्रावो अनुरूपः॥

वित्रेणपुनीहि॥माशुक्रेणदेवदीद्यत्॥अग्नेक्रत्वाक्रतूँ२ऽरनु ४०
यत्तेपवित्रमर्चिष्यग्नेविततमन्तरा॥ब्रह्मतेनपुनातुमा ४१ पवमानः
सः॥पवमानःसोऽअद्यनःपवित्रेणविचर्षणिः॥यःपोतासपुनातु
मा ४२ उभाभ्यान्देव॥सवितःपवित्रेणसवेनच॥माम्पुनीहिविश्व-
तः ४३ वैश्वदेवीपुनती॥देव्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः॥
तयामदन्तःसधमादेषुवयंस्यामपतयोरयीणाम् ४४ येसमानाःस
मनसःपितरोयमराज्ये॥तेषाँल्लोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ४५

संहि· येसमानाः॥ येसमानाःसमनसोजीवाजीवेषुमामकाः॥ तेषाᳬंश्री पू·अ·
१५६ र्म्मयिकल्प्यतामुस्मिँल्लोकेशतᳬंसमाः ४६ द्वेसृती॥ऽअश्शृणवम्पितॄ १९
णामहन्देवानामुतमर्त्त्यानाम्॥ ताभ्यामिदंविश्श्वमेजत्समेतियदन्तरापित
रम्मातरञ्च ४७ इदᳬंहविः॥ इदᳬंहविःप्रजननम्मेऽअस्तुदशवीरᳬंस
र्वगणᳬंस्वस्तये॥ आत्मसनिप्रजासनिपशुसनिलोकसन्यभयसनि
॥ अग्निःप्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त ४८ उदी १५६
रताम्॥ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरःसोम्म्यासः॥ अ

यजेतिधाय्यारूपम्प्रगाथायेयजामहाः २४ अर्द्धऽऋचैरुक्थाना
म्॥ अर्द्धऽऋचैरुक्थानाꣳरूपम्पदैराप्नोतिनिविदः प्रणवैःशस्त्रा
णाꣳरूपम्पर्यसासोमऽआप्यते २५ अश्विभ्याम्प्रातःसवनम्॥अश्वि
भ्याम्प्रातःसवनमिन्द्रेणैन्द्रम्माध्यन्दिनम्॥वैश्वदेवꣳसरस्वत्यातृतीय
माप्तꣳसवनम्॥ २६ वायव्यैर्वायव्यानि॥वायव्यैर्वायव्यान्याप्नोति
सतेनद्रोणकलशम्॥कुम्भीभ्यामम्भृणौसुतेस्थालीभिःस्थालीराप्नो
ति २७ यजुर्भिराप्यन्ते॥यजुर्भिराप्यन्तेग्रहाग्रहैःस्तोमाश्चविष्टुतीः

संहि॰ ॥ छन्दोभिरुक्थाशस्त्राणिसाम्नावभृथऽआप्यंते २८ इडाभिर्भ- पू॰ अ॰
१५४ क्षान्॥ इडाभिर्भक्षानाप्नोतिसूक्तवाकेनाशिषः ॥ शंयुनापत्नीसंया १९
जान्त्समिष्टयजुषासंस्थाम् २९ व्रतेनदीक्षाम् ॥ व्रतेनदीक्षामाप्नो
तिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्य-
माप्यते ३० एतावद्रूपम् ॥ एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ त
देतत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते ३१ सुरावन्तम्बर्हिषदम् ॥ सुराव १५४
न्तम्बर्हिषदꣳसुवीरंयज्ञꣳहिन्वन्तिमहिषानमोभिः ॥ दधानाःसोमं

न्दिविदेवतासुमदेमेन्द्रंयजमानाःस्वर्काः ३२ यस्ते॥ यस्तेरसःस-
म्भृतऽओषधीषुसोमस्यशुष्मःसुरयासुतस्य॥ तेनजिन्वयजमानम्म
देनसरस्वतीमश्विनाविन्द्रमग्निम् ३३ यमश्विना॥ नमुचेरासुरादधि
सरस्वत्यसुनोदिन्द्रियाय॥ इमन्तꣳशुक्रम्मधुमन्तमिन्दुꣳसोमꣳरा
जानमिहभक्षयामि ३४ यदत्र॥ यदत्ररिप्तꣳरसिनःसुतस्ययदिन्द्रो
ऽअपिबच्छचीभिः॥ अहन्तदस्यमनसाशिवेनसोमꣳराजानमिहभक्ष
यामि ३५ पितृभ्यःस्वधायिभ्यः॥ स्वधानमःपितामहेभ्यःस्वधायि-

संहि· भ्यः स्वधानमः ॥ प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्ष पू·अ·
१५५ न्पितरोमीमदन्तपितरोऽतीतृपन्तपितरः पितरः शुन्धध्वम् ३६ पुनन्तुमा १९
पितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥ पवि
त्रेणशतायुषा ॥ पुनन्तुमापितामहाः ॥ पुनन्तुप्रपितामहाः ॥ पवित्रे
णशतायुषाविश्वमायुर्व्यश्नवै ३७ अग्नऽआयूंषि ॥ पवसऽआ
सुवोर्ज्जमिषंचनः ॥ आरेबाधस्वदुच्छुनाम् ३८ ॥ पुनन्तुमा ॥ देवजनाः १५५
पुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ३९ प

सुम्न्य ऽ ईयुरवृका ऽ ऋतज्ञास्तेनोवन्तु पितरो हवेषु ४९ अङ्गिरसो नः
॥ पितरो नवग्वा ऽ अथर्वाणो भृगवः सौम्म्यासः ॥ तेषां वयं सुमतौ
यज्ञियानामपि भद्रे सौमनसे स्याम ५० येनः ॥ ये नः पूर्वे पितरः सो-
म्म्यासौ ऽनूहिरे सौमपीथं वसिष्ठाः ॥ तेभिर्यमः संरराणो हवींष्यु
शन्नुशद्भिः प्रतिकाममत्तु ५१ त्वं सौम ॥ त्वं सौम प्रचिकितो मनी
षा त्वं रजिष्ठमनुनेषि पन्थाम् ॥ तव प्रणीती पितरो न ऽ इन्द्रो देवेषु रत्न
मभजन्त धीराः ५२ त्वया हि ॥ त्वया हि नः पितरः सोम पूर्वे कर्म्माणि च-

संहि॰ क्रुःपवमानधीराः ॥ वन्वन्नवातःपरिधी१ँऽरपोर्णुवीरेभिरश्वै पू॰अ॰
१५७ र्म्मघवाभवानः ५३ त्वꣳसोम ॥ पितृभिःसंविदानोनुद्यावापृथिवी १९
ऽआततन्थ ॥ तस्मैतऽइन्द्रोहविषाविधेमवयꣳस्यामपतयोरयीणा
म् ५४ बर्हिषदःपितरः ॥ बर्हिषदःपितरऽऊत्यर्वागिमावोहव्याचकृ
माजुषध्वम् ॥ तऽआगतावसाशन्तमेनाथानःशंय्योररपोदधात ५५
आहम् ॥ आहम्पितॄन्त्सुविदत्राꣳ२॥ ऽअवित्सिनपातञ्चविक्रमणञ्च १५७
विष्णोः ५६ बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः

॥उपहूताः पितरः॥सोम्म्यासो बर्हिष्ष्येषु निधिषु प्प्रियेषु॥त ऽआ-
गमन्तु त ऽइह श्श्रुवन्त्वधि ब्ब्रुवन्तु ते ऽवन्त्वस्म्मान् ५७ आयन्तु॥नः पि
तरः सोम्म्यासो ग्निष्वाताः पथिभिर्द्देवयानैः॥अस्म्मिन्न्यज्ञे स्वध
या मदन्तो धि ब्ब्रुवन्तु ते ऽवन्त्वस्म्मान् ५८ अग्निष्वाताः पितरः॥अग्नि-
ष्वाताः पितर ऽएह गच्छत सदः सदः सदत सुप्प्रणीतयः॥अत्ता हवी
ꣳषि प्प्रयतानि बर्हिष्ष्यथा रयिꣳ सर्व्ववीरन्दधातन ५९ ये ऽअग्निष्वा
ताः॥ये अग्निष्वाता ये ऽअनग्निष्वात्ता मद्ध्ये दिवः स्वधया मादयन्ते॥

संहि· तेभ्यः स्वराडसुनीतिमेतां यथावशन्तन्वङ्कल्पयाति ६० अग्निष्वा पू·अ·
१५८ त्तानृतुमतेः ॥ अग्निष्वात्तानृतुमतोहवामहेनाराशꣳसेसोमपीथंयऽ १९
आशुः ॥ तेनोविप्रासःसुहवाभवन्तुवयꣳस्यामपतयोरयीणाम् ६१
आच्याजानु ॥ दक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे ॥ माहिꣳसि
ष्टपितरःकेनचिन्नोयद्वऽआगःपुरुषताकराम ६२ आसीनासोऽअरु-
णीनाम् ॥ आसीनासोऽअरुणीनामुपस्थेरयिन्धत्तदाशुषेमर्त्याय ॥ पु १५८
त्रेभ्यःपितरस्तस्यवस्वःप्रयच्छततऽइहोर्ज्जन्दधात ६३ यमग्ने ॥

कव्यवाहनत्त्वंञ्चिन्मन्यसेरयिम् ॥ तन्नोगीर्भिःश्श्रवाय्यन्देवत्राप
नयायुजम् ६४ योऽअग्निः॥ कव्यवाहनः पितॄन्यक्षदृतावृधः ॥ प्रे
दुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यऽआ ६५ त्वमग्ने॥ त्वमग्नऽईडितः
कव्यवाहनावाड्ढव्यानिसुरभीणिकृत्वी॥ प्रादाः पितृभ्यः स्वधयातेऽअ
क्षन्नद्धित्वन्देवप्रयताहवींषि ६६ येचे॥ येचेहपितरोयेचनेहयाँश्चवि
द्मयाँ२॥ ऽउँचनप्रविद्म ॥ त्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञꣳ सु
कृतञ्जुषस्व ६७ इदम्पितृभ्योनमोऽअस्त्वद्ययेपूर्वासोयऽउपरासऽई

संहि· युः॥ येपार्थिवेरजस्यानिषत्तायेवानूनꣳसुवृजनासुविक्षु ६८ अधायथा पू·अ·
१५९ नःपितरःपरासःप्रत्नासोऽअग्नऽऋतमाशुषाणाः॥ शुचीदयन्दीधिति १९
मुक्थशासःक्षामाभिन्दन्तोऽअरुणीरपव्रन् ६९ उशन्तस्त्वा॥ उशन्तस्त्वा
निधीमह्युशन्तःसमिधीमहि॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे
७० अपांफेनेन॥ अपाम्फेनेननमुचेःशिरऽइन्द्रोदवर्तयः। विश्वायद
जयस्पृधः ७१ सोमोराजा॥ सोमोराजामृतꣳसुतऽऋजीषेणाजहा- १५९
न्मृत्युम्॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमि

दम्पयोमृतम्मधु ७२ अद्भ्यः क्षीरम् ॥ अद्भ्यः क्षीरं व्यपिबत्कुङ्ङाङ्गि·
रसो धिया ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस ऽइन्द्रस्येन्द्रि
यमिदम्पयोमृतम्मधु ॥ ७३ ॥ सोमं मद्भ्यः ॥ सोममद्भ्यो व्यपिब-
च्छन्दसा हꣳसः शुचिषत् ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्ध
स ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७४ ॥ ११०० ॥ कण्डि ॥ ० ॥ अन्नात्
परिस्रुतः ॥ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमं
प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस ऽइन्द्रस्ये-

न्द्रियमिदम्पयोमृतम्मधु ७५ रेतो मूत्त्रम् ॥ रेतोमूत्त्रंविजहातियो
१६० निम्प्रविशादिन्द्रियम् ॥ गर्ब्भोजरायुणावृतऽउल्ल्बञ्जहातिजन्न्मना ॥ १९
ऋतेनसत्यमिन्द्रियंविपानꣳशुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृ
तम्मधु ७६ दृष्ट्वारूपे ॥ व्याकरोत्सत्यानृतेप्रजापतिः ॥ अश्श्रद्धामनृते
दधाच्छ्रद्धाꣳसत्येप्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्क्रम
न्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७७ वेदेनरूपे ॥ व्यपिबत्सु- १६०
तासुतौप्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्क्रमन्धसऽइ॰

न्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७८ इन्द्रायपरिस्रुतः॥इन्द्रायपरिस्रु
तोरसंऽशुक्रेणशुक्रंव्यपिबत्पयःसोमंप्रजापतिः॥ऋतेनसत्यमि
न्द्रियंविपानंऽशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ७९
सीसेनतन्त्रम्॥सीसेनतन्त्रम्मनसामनीषिणऽऊर्णासूत्रेणकव
योवयन्ति॥अश्विनायज्ञंऽसविता सरस्वतीन्द्रस्यरूपंवरुणोभि-
षज्यन् ८० तदस्य॥रूपममृतंऽशचीभिस्तिस्रोदधुर्देवताः सऽ
रराणाः॥लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्यमाऽसमभवन्न

संहि· लाजाः॥८१॥तदश्विनाभिषजारुद्रवर्तनीसरस्वतीवयतिपेशोऽ शु·अ·
१६१ अन्तरम्॥अस्थिमज्जानम्मासरैःकारोतरेणदधतोगवान्त्वचि ८२ १९
सरस्वतीमनसा॥पेशलंवसुनासत्याभ्यांवयतिदर्शतंवपुः॥रसम्परि
स्रुतानरोहितन्नग्नहुर्धीरस्तसरन्नवेम ८३ पयसाशुक्रम्॥पयसाशु-
क्रममृतञ्जनित्रंसुरयामूत्राज्जनयन्तरेतः॥अपामतिन्दुर्मति-
म्बाधमानाऽऊवध्यंवातंसब्वन्तदारात्॥८४ इन्द्रःसुत्रामाहृदये १६१
नसत्यम्पुरोडाशेनसविताजजान॥यकृत्क्लोमानंवरुणोभिषज्यन्मत

स्न्नेघ्रायुर्द्यैर्न्नमिनातिपितम् ८५ आन्त्राणिस्थाली॰ ॥ आन्त्राणि
स्थालीर्म्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः॰ ॥ श्येनस्यपत्र
न्नप्लीहाशचीभिरासन्दीनाभिरुदरन्नमाता ८६ कुम्भोवनिष्ठुः॰ ॥ कु-
म्भोवनिष्ठुर्ज्जनिताशचीभिर्य्यस्मिन्नग्ग्रेयोन्याङ्गर्ब्भोऽअन्तः॰ ॥ प्ला
शिर्व्यक्तःशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृब्भ्यः ८७ मुखꣳस-
त्॰ ॥ मुखꣳसदस्यशिरऽइत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्वती ॥
चप्यन्नपायुर्ब्भिषगस्यवालोवस्तिर्न्नशेपोहरसातरस्वी ८८ अश्विब्भ्या-

संहि· श्चक्षुः ॥ अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनतेजोहविषाशृतेन ॥ शु·अ·
१६२ पक्ष्माणिगोधूमैः कुवलैरुतानिपेशोनशुक्रमसितंवसाते ८९ अविर्न्न १९
॥ मेषोनसिवीर्य्यायप्राणस्यपन्थाऽअमृतोग्रहाभ्याम् ॥ सरस्वत्युपवाकै
र्व्यानन्नस्यानिबर्हिर्बदरैर्ज्जजान ९० इन्द्रस्यरूपम् ॥ इन्द्रस्यरूपमृषभोबलायक
र्णाभ्यां श्रोत्रममृतङ्ग्रहाभ्याम् ॥ यवानबर्हिर्भ्रुविकेसराणिकर्क्कन्धू
र्जज्ञेमधुसारघम्मुखात् ९१ आत्मन्नुपस्थे ॥ आत्मन्नुपस्थेनवृकस्य १६२
लोममुखेश्मश्रूणिनव्याघ्रलोम ॥ केशानशीर्षन्यशसेश्रियैशि-

रवासिठंहस्यलोमत्विषिरिन्द्रियाणि १२ अङ्गान्यात्मन् ॥ अङ्गा
न्यात्मन्भिषजातदश्विनात्मानमङ्गैः समधात्सरस्वती ॥ इन्द्रस्यरू
पठं शतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः १३ सरस्वतीयोन्याम्
॥ सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्याम्पत्नीसुकृतम्बिभर्ति ॥ अपाठं
रसेनवरुणोनसाम्नेन्द्रठंश्रियैजनयन्नप्सुराजा १४ तेजः पशूनाम्
॥ तेजः पशूनाठंहविरिन्द्रियावत्परिस्रुतापयसासारघम्मधु ॥ अश्विभ्या
न्दुग्धम्भिषजासरस्वत्यासुतासुताभ्याममृतः सोमऽइन्दुः १५ इ० सं० एकोनविं० १९

संहि क्षत्रस्य योनिः॥ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि॥ मात्वा हिꣳसीन्मा पू.भ.
१६३ मा हिꣳसीः१ निषसाद॥ धृतव्रतो वरुणः पस्त्यास्वा॥ साम्राज्याय- २०
सुक्रतुः मृत्योः पाहि विद्योत्पाहि२ देवस्य त्वा॥ सवितुः प्रसवे ऽश्विनो
र्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसाया
भिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्ये
न्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि३ कोऽसि॥ कतमोऽसि कस्मै त्वा १६३
काय त्वा॥ सुश्लोक सुमङ्गल सत्यराजन्४ शिरो मे॥ शिरो मे श्रीर्यश-

शोमुखन्त्विषिः केशाश्चश्मश्रूणि॥ राजामेप्प्राणोऽअमृतꣳसम्म्रा
ड्चक्षुर्व्विराड्छ्रोत्रम् ५ जिह्वामे॥ भद्रंवाङ्महोमनोमन्युःस्वराड्भामः॥ मोदाः
प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ६ बाहूमे॥ बाहूमेबलमिन्द्रियꣳ
हस्तौमेकर्म्मवीर्य्यम्॥ आत्माक्षत्रमुरोमम ७ पृष्ठीर्म्मे॥ राष्ट्रमुदरमꣳ-
सौग्ग्रीवाश्चश्रोणी॥ ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व्वतः ८ ना
भिर्म्मे॥ चित्तंविज्ञानम्पायुर्म्मेपचितिर्ब्भसत्॥ आनन्दनन्दावाण्डौमेभ
गः सौभाग्ग्यम्पसः॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मिविशिराजाप्रतिष्ठि-

संहि· तः ९ प्प्रतिक्षत्रे ॥ प्प्रतितिष्ठामिराष्ट्रे प्प्रत्यश्वेषु प्प्रतितिष्ठामिगोषु ॥ पू·अ·
१६४ प्प्रत्यङ्गेषु प्प्रतितिष्ठाम्म्यात्मन्प्प्रतिप्प्राणेषु प्प्रतितिष्ठामिपुष्टे प्प्रतिद्या २०
वापृथिव्योः प्प्रतितिष्ठामियज्ञे १० त्रयादेवाः ॥ त्रयादेवाऽएकादशत्त्रय
स्त्रिꣳशाः सुराधसः ॥ बृहस्प्पतिपुरोहितादेवस्यसवितुः सवे ॥ देवा
देवैरवन्तुमा ११ प्रथमाद्वितीयैः ॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः
सत्येनसत्यंय्यज्ञेनयज्ञोयजुर्भिर्य्यजूꣳषिसामभिः सामान्यृग्भिर्ऋ १६४
चः पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्य्याज्याः वषट्कारैर्वषट्का

राऽ आहुतिभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा १२ लोमा
नि प्रयतिः ॥ लोमानि प्रयतिर्म्मम त्वङ्म ऽआनतिरागतिः ॥ माꣳ
सम्म ऽउप नतिर्व्वस्वस्थि मज्जा म ऽआनतिः १३ यद्देवाः ॥ यद्देवा देवहे
डनन्देवासश्चकृमा वयम् ॥ अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्व
ꣳहसः १४ यदि दिवा ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ॥
वायुर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः १५ यदि जाग्रत् ॥
यदि जाग्रद्यदि स्वप्न ऽएनाꣳसि चकृमा वयम् ॥ सूर्य्यो मा तस्मादेन

संहि· सोविश्वान्मुञ्चत्वर्ठ·हसः १६ यद्ग्रामे॥ यद्ग्रामेयदरण्येयत्सभायां पू·अ·
१६५ यदिन्द्रिये॥ यच्छूद्रेयदर्य्येयदेनश्चकृमावयंयदेकस्याधिधर्म्मणित २०
स्यावयजनमसि १७ यदापः॥ यदापोऽअघ्न्याऽइतिवरुणेतिशपामहे
ततोवरुणनोमुञ्च॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः॥ अवदे
वैर्द्देवकृतमेनोयक्ष्यवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि १८ समुद्रे
ते। समुऽद्रेतेहृदयमप्स्वन्तः सन्त्वाविशन्त्वोषधीरुतापः॥ सुमित्रिया १६५
नऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्च

घयान्द्विष्मः १९ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव ॥
पूतम्पवित्त्रेणेवाज्ज्यमापः शुन्धन्तुमैनेसः २० उद्वयम् ॥ उद्वयन्तमसस्प
रिस्वः पश्यन्तउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्ज्योतिरुत्तमम् २१ अ
पोऽअद्य ॥ अपोऽअद्यान्वचारिषᳪरसेनसमसृक्ष्महि ॥ पयस्वानग्न
ऽआगमन्तम्मासᳪसृजवर्च्चसाप्रजयाचधनेनच २२ एधोसि ॥ एधी-
स्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥ समाववर्तिपृथिवीस
मुषाः समुसूर्य्यः ॥ समुविश्वमिदञ्जगत् ॥ वैश्वानरज्ज्योतिर्भूया-

संहि· संविभून्कामान्व्यश्नवैभूःस्वाहा २३ अभ्यादधामि ॥ समिधमग्ने पू·अ·
१६६ व्रतपतेत्वयि ॥ व्रतञ्चश्रद्धाञ्चोपैमीन्धेत्वादीक्षितोऽअहम् २४ यत्रब्र २०
ह्म ॥ चक्षत्रञ्चसम्यञ्चौचरतःसह ॥ तँल्लोकम्पुण्यम्प्रज्ञेषंयत्र
देवाःसहाग्निना २५ यत्रेन्द्रः ॥ यत्रेन्द्रश्चवायुश्चसम्यञ्चौचर-
तःसह ॥ तँल्लोकम्पुण्यम्प्रज्ञेषंयत्रसेदिर्नविद्यते २६ अꣳशुनाते
॥ अꣳशुःपृच्यताम्परुषापरुः ॥ गन्धस्तेसोममवतुमदायरसोऽअ १६६
च्युतः २७ सिञ्चन्तिपरि ॥ षिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच ॥ सुरायैब-

ञ्चौमदै किन्त्वोद्यदति किन्त्वः २८ धानावन्तङ्करम्भिणम्॥ धानावन्तङ्करम्भिणमपू
पवन्तमुक्थिनम्॥ इन्द्र प्रातर्ज्जुषस्वनः २९ बृहदिन्द्राय॥ गायत मरुतो वृत्रहन्तम
म्॥ येनज्ज्योतिरजनयन्नृतावृधो देवन्देवाय जागृवि ३० अध्वर्य्यो ऽअद्रिभिः॥
सुतꣳ सोमम्पवित्र ऽआनय॥ पुनाहीन्द्राय पातवे ३१ यो भूतानाम्॥ यो भूताना
मधिपतिर्यस्मिँल्लोका ऽअधिश्रिताः॥ य ऽईशे महतो महाँस्तेन गृह्णामि त्वाम
हम्मयि गृह्णामि त्वामहम् ३२ उपयामगृहीतोस्यश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय-
त्वा सुत्राम्णे ऽएष ते योनिरश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्रा-

संहि· म्मणौ ३३ घ्राणा पामै ॥ ऽ अपानपाश्वंक्षुष्याः श्रौत्रपाश्वंमे ॥ पू·अ·
१६७ वाचोमें विश्वभेषजोमनसोसि विलायकः ३४ अश्विनकृतस्यते ॥ २०
अश्विनकृतस्यतेसरस्वतिकृतस्येन्द्रेणसुत्राम्णाकृतस्य ॥ उप
हूतऽउपहूतस्यभक्षयामि ३५ समिद्धऽइन्द्रः ॥ समिद्धऽइन्द्रऽउष-
सामनीकेपुरोरुचापूर्वकृद्वावृधानः ॥ त्रिभिर्देवैस्त्रिंशता वज्र-
बाहुर्जघानवृत्रंविदुरोववार ३६ नराशंसः प्रति ॥ नराशंसः १६७
प्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम ॥ गोभिर्वपावान्मधु-

नासमञ्जन्हिरण्यैरिन्द्रंयजाति प्रचेताः ३७ इडितोदेवैः॥ इ-
डितोदेवैर्हरिवाँ२ऽअभिष्टिराजुह्वानोहविषाशर्द्धमानः॥ पुरन्द-
रोगोत्रभिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः ३८ जुषाणोबर्हिः॥
॥ जुषाणोबर्हिर्हरिवान्नऽइन्द्रः प्राचीनꣳसीदत्प्रदिशापृथिव्याः॥
उरुप्रथाः प्रथमानꣳस्योनमादित्यैरक्तंवसुभिः सजोषाः ३९ इन्द्रं
दुरः॥ कवष्योधावमानावृषाणंयन्तुजनयः सुपत्नीः॥ द्वारोदे-
वीरभितोविश्रयन्ताꣳसुवीरावीरम्प्रथमानामहोभिः ४० उषासा-

संहि· नक्ता ॥ बृहतीबृहन्तम्पयस्वतीसुदुघेशूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा पू·अ·
१६८ संवयन्तीदेवानान्देवंयजतःसुरुक्मे ४१ दैव्यामिमाना ॥ मनुषःपुरु २०
त्राहोताराविन्द्रम्प्रथमासुवाचा ॥ मूर्द्धन्यज्ञस्यमधुनादधानाप्राचीन
ञ्ज्योतिर्हविषावृधातः ४२ तिस्रोदेवीः ॥ तिस्रोदेवीर्हविषावर्द्धमाना
ऽइन्द्रञ्जुषाणाजनयोनपत्नीः ॥ अच्छिन्नन्तन्तुम्पयसासरस्वतीडादे
वीभारतीविश्वतूर्त्तिः ४३ त्वष्टादधत् ॥ त्वष्टादधच्छुष्ममिन्द्रायवृष्णो- १६८
पाकोचिष्टुर्यशसेपुरूणि ॥ वृषायजन्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्य

समेनक्तु देवान् ४४ वनस्पतिरवसृष्टः ॥ वनस्पतिरवसृष्टोन पाशैन्
त्मन्यासमञ्जञ्छमितानदेवः ॥ इन्द्रस्य हव्यैर्ज्जठरम्पृणानः स्व-
दातियज्ञम्मधुनाघृतेन ॥ ४५ ॥ स्तोकानामिन्दुम् ॥ स्तोकानामि
न्दुम्प्रतिशूरऽ इन्द्रो वृषायमाणो वृषभस्तुराषाट् ॥ घृतप्रुषामनसा-
मोदमानाः स्वाहादेवाऽ अमृतामादयन्ताम् ४६ आयात्तु ॥ आयात्वि
न्द्रोवसऽ उपनऽ इह स्तुतः सधमादस्तु शूरः ॥ वावृधानस्तविषीर्य्य
स्य पूर्वीर्द्द्यौर्न्नक्षत्रमभिभूतिपुष्यात् ४७ आनः ॥ आनऽ इन्द्रो दूरा-

संहि· दानऽआसादभिष्टिकृदवसेयासदुग्ग्रः॥ओजिष्ठेभिन्नृपतिर्व्वज्ज्र- पू·अ·
१६९ बाहुः॥सङ्गेसमत्सुतुर्व्वणिः पृतन्यून् ४८ आनः॥आनऽइन्द्रोहरिभि· २०
र्य्यात्वच्छार्व्वाचीनोवसेराधसेच॥तिष्ठातिवज्ज्रीमघवाविरप्शीमंय्यु
ज्ञमनुन्नोव्वाजसातौ ४९ त्रातारमिन्द्रम्॥त्रातारमिन्द्रमवितारमिन्द्रꣳ
हवेहवेसुहवꣳशूरमिन्द्रम्॥ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो-
मघवाधात्विन्द्रः ५० इन्द्रःसुत्रामा॥इन्द्रःसुत्रामास्ववाँ२ऽ॥ऽअ १६९
वोभिःसुमृडीकोभवतुविश्ववेदाः॥बाधतान्द्वेषोऽअभयङ्कृणोतु

सुवीर्य्यस्यपतयः स्याम ५१ तस्यैव्वयम् ॥ तस्यैव्वयꣳसुमतौयज्ञिय-
स्यापिभद्रेसौमनसेस्याम ॥ ससुत्रामास्ववाꣳ२ऽ ॥ इन्द्रोऽअस्म्मेऽआरा
च्चिद्द्वेषः सनुतर्य्युयोतु ५२ आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिभिर्य्याहिम
यूररोमभिः ॥ मात्वाकेचिन्नियमन्विन्नपाशिनोतिधन्वेवताꣳ२ऽ इहि
५३ एवेत् ॥ एवेदिन्द्रंवृषणंव्वज्रबाहुंव्वसिष्ठासोऽअभ्यर्च्चन्त्यर्कैः ॥
सनस्तुतोव्वीरवद्धातुगोमद्यूयम्पातस्वस्तिभिः सदानः ५४ समिद्धोऽ
अग्निः ॥ समिद्धोऽअग्निरश्विनातप्तोघर्म्मोविराट्सुतः ॥ दुहेधेनुः

सरस्वतीसोमꣳ·शुक्रमिहेन्द्रियम् ५५ तनूपाभिषजा ॥ सुतेश्विनो
भासरस्वती ॥ मद्ध्वारजाꣳसीन्द्रियमिन्द्रायपथिभिर्वहान् ५६ इन्द्राये
न्दुम् ॥ इन्द्रायेन्दुꣳ·सरस्वतीनराशꣳ·सेननग्नहुम् ॥ अधातामश्विना
मधुभेषजम्भिषजासुते ५७ आजुह्वानासरस्वती ॥ न्द्रायेन्द्रियाणिवीर्य्य
म् ॥ इडाभिरश्विनाविषꣳ·समूर्ज्जꣳ·सꣳ·रयिन्दधुः ५८ अश्विनान
मुचेः ॥ सुतꣳ·सोमꣳ·शुक्रम्परिस्रुता ॥ सरस्वतीतमाभरद्बर्हिषेन्द्राय
पातवे ५९ कवष्योन ॥ व्यचस्वतीरश्विभ्यान्नदुरोदिशः ॥ इन्द्रोनरोद

सीऽउभेदुहेकामान्त्सरस्वती ६० उषासानक्तम् ॥ उषासानक्तमश्विना
दिवेन्द्रꣳ सायमिन्द्रियैः ॥ सञ्ज्जानानेसुपेशसासमञ्ज्जातेसरस्वत्या ६१
पातन्नः ॥ पातन्नोऽअश्विनादिवापाहिनक्तꣳ सरस्वती ॥ दैव्याहो-
ताराभिषजापातमिन्द्रꣳ सचासुते ६२ तिस्रस्त्रेधा ॥ सरस्वत्याश्विना
भारतीडा ॥ तीव्रम्परिस्रुतासोममिन्द्रायसुषुवुर्म्मदम् ६३ अश्विनाभे
षजम् ॥ अश्विनाभेषजम्मधुभेषजन्नः सरस्वती ॥ इन्द्रेत्वष्टायशः
श्रियꣳ रूपꣳ रूपमधुः सुते ६४ ऋतुथेन्द्रः ॥ ऋतुथेन्द्रोवनस्पतिः

संहि- शशमानः परिस्रुता ॥ कीलालमश्विभ्याम्मधु दुहे धेनुः सरस्वती ६५ पू॰ अ॰
१७१ गोभिर्न ॥ सोममश्विना मासरेण परिस्रुता ॥ समधात्तꣳ सरस्वत्या स्वा २०
हेन्द्रे सुतम्मधु ६६ अश्विना हविः ॥ अश्विना हविरिन्द्रियन्नमुचेर्धिया
सरस्वती ॥ आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥ ६७ यमश्विना ॥
यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन् ॥ स बिभेद बलम्मघन्नमुचावा
सुरे सचा ६८ तमिन्द्रम् ॥ तमिन्द्रम्पशवः सचाश्विनोभा सरस्वती ॥ दधा १७१
नाऽअभ्यनूषत हविषा यज्ञऽइन्द्रियैः ६९ यऽइन्द्रे ॥ य इन्द्रऽइन्द्रियन्दधुः

संविताव्वरुणोभगः॥ससुत्रामाहुविष्पतिर्य्यजमानायसश्चत
७०सविताव्वरुणः॥सविताव्वरुणोदधद्यजमानायदाशुषे॥आदत्तन
मुचेर्व्वसुसुत्रामाबलमिन्द्रियम् ७१व्वरुणःक्षत्रम् ॥व्वरुणःक्षत्रमिन्द्रिय
म्भगेनसविताश्रियम्॥सुत्रामायशसाबलन्दधानायज्ञमाशत ७२अ
श्विनागोभिः॥अश्विनागोभिरिन्द्रियमश्वेभिर्व्वीर्य्यम्बलम्॥हवि-
षेन्द्रꣳसरस्वतीयजमानमवर्द्धयन् ७३तानासत्या॥सुपेशसाहिरण्य
वर्तनीनरा॥सरस्वतीहविष्मतीन्द्रकर्म्मसुनोवत ७४ताभिषजा॥

 सुकर्म्मणासासुदुघासरस्वती॥सुवृंत्रहाशातन्क्रतुरिन्द्रायदधुरिन्द्रि
 यम् ७५ युवर्ठ·सुरामम्॥युवर्ठ·सुराममश्विनानमुचावासुरेसच्चा॥वि
पिपानाऽसरस्वतीन्द्रङ्कर्म्मस्वावतम् ७६ पुत्रमिवपितरौ॥पुत्रमिवपि-
तरावश्विनोभेन्द्रावथुःकाव्यैर्द्दर्ठ·सनाभिः॥यत्सुसमंव्यपिबःशची
भिःसरस्वतीत्वामघवन्नभिष्णक् ७७ यस्मिन्नश्वासः॥यस्मिन्न
श्वासऽऋषभासऽउक्षणोवशामेषाऽअवसृष्टासऽआहुताः॥कीला
लपेसोमपृष्ठायवेधसेहृदामतिञ्जनयचारुमग्नये ७८ अहाव्यग्ने॥

हविरस्येतेस्रुचीवघृतञ्चम्म्वीवसोमेः ॥ वाजसनिꣳरयिमस्मेसु
वीरम्प्रशस्यन्धौंहियशसम्बृहन्तम् ७९शतम् १२०० ॥ अश्विनातेजसा ॥ चक्षुः
प्राणेनसरस्वतीवीर्यम् ॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ८० गोमदूषुणासा
त्या ॥ गोमदूषुणासत्याश्वावद्यातमश्विना ॥ वर्तीरुद्रानृपाय्यम् ८१ न
यत् ॥ नयत्परोनान्तरऽआदधर्षद्वृषण्वसू ॥ दुःशꣳसोमर्त्योरिपुः ८२
तानः ॥ तानऽआवोढमश्विनारयिम्पिशङ्गसन्दृशम् ॥ धिष्ण्यावरि
वोविदम् ॥ ८३ ॥ पावकानः ॥ पावकानःसरस्वतीवाजेभिर्वाजिनीवती ॥

संहि॰ ॥यज्ञंवष्टुधियावसुः ८४चोदयित्रीसूनृतानाम्॥चोदयित्रीसूनृ- सू॰अ॰
१७३ तानाञ्चेतन्तीसुमतीनाम्॥यज्ञन्दधेसरस्वती ८५महोऽअर्णः॥ २०
महोऽअर्णःसरस्वतीप्रचेतयतिकेतुना॥धियोविश्वाविराजति
८६इन्द्रायाहि॥चित्रभानोसुताऽइमेत्वायवः॥अण्वीभिस्तनापू
तासः ८७इन्द्रायाहि॥धियेषितोविप्रजूतःसुतावतः॥उपब्रह्मा-
णिवाघतः ८८इन्द्रायाहि॥इन्द्रायाहितूतुजानऽउपब्रह्माणिहरिवः १७३
॥सुतेदधिष्वनश्चनः ८९अश्विनापिबताम्॥अश्विनापिबताम्म-

धुसरस्वत्यासजोषसा॥ इन्द्रः सुत्रामा वृत्रहाजुषन्ताᳬसोम्म्य-
म्मधु॥९०॥ ॥इतिवाजसनेयसंहितापाठेविंशोऽध्यायः॥२०॥

इतिवाजसनेयसंहितापूर्वविंशतिःसमाप्ता.

॥श्रीगणेशायनमः॥ हरिः॒ ॐम्॥ इमम्मेवरुणश्रुधीहवमद्याचमृडय॥
त्वामवस्युराचके॥१॥ तत्त्वा॥ यामिब्रह्मणावन्दमानस्तदाशास्तेयजमानो
हविर्भिः॥अहेडमानोवरुणेहबोध्युरुशंससमानआयुःप्रमोषीः॥२॥त्वन्नः
॥त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः॥यजिष्ठोवह्नितम
मःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥ ३ ॥ सत्वम्॥ सत्व
न्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणं
रराणोवीहिमृडीकंसुहवोनएधि॥४॥महीमूषु॥मातरंसुव्रतानां

 मृतस्यपत्नीमवसेहुवेम ॥ तुविक्षत्रामजरन्तीमुरूचीᳪ सुशर्म्माणम
दितिᳪ सुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीम् ॥ सुत्रामाणम्पृथि
वीन्द्यामनेहसᳪ सुशर्म्माणमदितिᳪ सुप्रणीतिम् ॥ दैवीन्नावᳪ स्वरित्राम
नागसमस्रवन्तीमारुहेमास्वस्तये ॥ ६ ॥ सुनावमारुहेयम् ॥ सुनावमारु
हेयमस्रवन्तीमनागसम् ॥ शतारित्राᳪ स्वस्तये ॥ ७ ॥ आनः ॥ आनोमि
त्रावरुणाघृतैर्ग्गव्यूतिमुक्षतम् ॥ मध्वारजाᳪसिसुक्रतू ॥ ८ ॥ प्रबाहवा ॥ १
सिसृतञ्जीवसेनऽआनोगव्यूतिमुक्षतङ्घृतेन ॥ आमाजनेश्रवयतंयुवा

नाश्रुतम्मैमित्रावरुणाहवेमा ॥९॥ शन्नः ॥ शन्नोभवन्तुवाजिनोहवेषु
देवतातामितद्रवःस्वर्काः ॥ जम्भयन्तोहिंवृकं·रक्षांसिसनेम्यस्म
द्युयवन्नमीवाः ॥१०॥ वाजेवाजेवत ॥ वाजिनोनोधनेषुविप्राऽअमृताऽ
ऋतज्ञाः ॥ अस्यमध्वः पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः ॥११
॥ समिद्धोऽअग्निः ॥ समिधासुसमिद्धोवरेण्यः ॥ गायत्रीछन्दऽइन्द्रिय
न्त्र्यविर्गौर्वयोदधुः ॥१२॥ तनूनपाच्छुचिव्रतः ॥ तनूनपाच्छुचिव्रतस्त
नूपाश्चसरस्वती ॥ उष्णिहाछन्दऽइन्द्रियन्दित्यवाड्गौर्वयोदधुः ॥१३॥

इडाभिरग्निः ॥ इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः ॥ अनुष्टुप्छन्दः
इन्द्रियम्पञ्चाविर्गौर्वयो दधुः ॥ १४ ॥ सुबर्हिरग्निः ॥ पूषण्वान्स्तीर्ण
बर्हिरमर्त्यः ॥ बृहतीछन्दः इन्द्रियन्त्रिवत्सो गौर्वयो दधुः ॥ १५ ॥ दुरो दे
वीः ॥ दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ॥ पङ्क्तिश्छन्दः इहेन्द्रि
यन्तुर्य्यवाड्गौर्वयो दधुः ॥ १६ ॥ उषसानक्ता सुपेशसा विश्वे देवा अम
र्त्याः ॥ त्रिष्टुप्छन्दः इहेन्द्रियम्पष्ठवाड्गौर्वयो दधुः ॥ १७ ॥ दैव्या होता २
रा ॥ भिषजेन्द्रेण सयुजा युजा ॥ जगतीछन्दः इन्द्रियमनड्वान्गौर्वयो दधुः

॥१८॥ तिस्रऽइडा॥ तिस्रऽइडा सरस्वती भारती मरुतो विशः॥ विराट्छ
न्दऽइहेन्द्रियं धेनुर्गौर्न्न वयो दधुः॥१९॥ त्वष्टा तुरीपः॥ त्वष्टा तुरीपोऽअद्भुत
ऽइन्द्राग्नी पुष्टिवर्द्धना॥ द्विपदा छन्दऽइन्द्रियमुक्षा गौर्न्न वयो दधुः॥२०॥
शमितानः॥ शमिता नो वनस्पतिः सविता प्रसुवन्भगम्॥ ककुप्छन्द
ऽइहेन्द्रियं वशा वेहद्वयो दधुः॥२१॥ स्वाहा यज्ञम्॥ स्वाहा यज्ञं वरुणः सुक्ष
त्रो भेषजं करत्॥ अतिछन्दाऽइन्द्रियं बृहदृषभो गौर्व्वयो दधुः॥२२॥ वस
न्तेनऽऋतुना देवा वसवस्त्रिवृता स्तुताः॥ रथन्तरेण तेजसा हविरिन्द्रे वयो

दधुः ॥ २३ ॥ ग्रीष्मेणऽऋतुना ॥ देवा रुद्राः पञ्चदशे स्तुताः ॥ बृहता य
शसा बलꣳ हविरिन्द्रे वयो दधुः ॥ २४ ॥ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तद
शे स्तुताः ॥ वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ २५ ॥ शारदेनऽऋतु
ना ॥ देवाऽएकविꣳशऽऋभवस्तुताः ॥ वैराजेन श्रिया श्रियꣳ हविरि
न्द्रे वयो दधुः ॥ २६ ॥ हेमन्तेनऽऋतुना ॥ देवास्त्रिणवे मरुतस्तुताः ॥ बले
न शक्करीः सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥ शैशिरेणऽऋतुना ॥ देवास्त्रय ३
स्त्रिꣳशेऽमृतास्तुताः ॥ सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥ २८ ॥

होतायक्षत् ॥ होतायक्षत्समिधाग्निमिडस्पदेश्विनेन्द्रꣳ सरस्वतीमजो
धूम्म्रोनगोधूमैः कुवलैर्ब्भेषजम्मधुशष्पैर्न्नतेजः इन्द्रियम्पयः सोमः प
रिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २९ ॥ होतायक्षत्तनूनपात्सर
स्वतीम् ॥ होतायक्षत्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभ
रन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवाकाभिर्ब्भेषजन्तोक्मभिः पयः सोमः परि
स्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न
ग्नहुम्पतिꣳ सुरयाभेषजम्मेषः सरस्वतीभिषग्रथोनचन्द्र्यश्विनोर्व्वपाः

संहि· इन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुता उ·अ·
४ घृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥ होतायक्षद्दिडेडितऽ ॥ होताय २१
क्षदिडेडितऽआजुह्वानः सरस्वतीमिन्द्रम्बलेनवर्द्धयन्नृषभेणगवेन्द्रियम-
श्विनेन्द्रायभेषजंय्यवैः कर्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयः सोमः परिस्रु
ताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाः
॥ होतायक्षद्बर्हिरूर्णम्म्रदाभिषङ्नासत्याभिषजाश्विनाश्वाशिशुमती ४
भिषग्धेनुः सरस्वतीभिषग्दुहऽइन्द्रायभेषजम्पयः सोमः परिस्रुताघृ-

तम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३३ ॥ होतायक्षद्दुरोदिशः कवष्योनव्य
चस्वतीरश्विभ्यान्नदुरोदिशइन्द्रोनरोदसीदुघेदुहेधेनुः सरस्वत्यश्विनेन्द्रा
यभेषजꣳशुक्रन्नज्ज्योतिरिन्द्रियम्पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वा
ज्ज्यस्यहोतर्य्यज ॥ ३४ ॥ होतायक्षत्सुपेशसोषेनक्तन्दिवाश्विनासमञ्जा
तेसरस्वत्यात्विषिमिन्द्रेनभेषजꣳश्येनोनरजसाहृदाश्रियानमासरम्पयः
सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३५ ॥ होतायक्षद्दैव्या
होतारा ॥ भिषजाश्विनेन्द्रन्नजागृविदिवानक्तन्नभेषजैः शूषꣳसरस्वती

संहि· भिषग्वसीसैनदुहऽइन्द्रियम्पयःसोमः परिस्रुतोघृतम्मधुव्यन्त्वाज्ज्य उ·अ·
५ स्युहोतुर्य्यज ॥ ३६ ॥ होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्न्नभे २१
षुजन्नयस्त्रिधातवोपसौरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीवाचा
सरस्वतीमहऽइन्द्रायदुहऽइन्द्रियम्पयःसोमःपरिस्रुतोघृतम्मधुव्या
न्त्वाज्ज्यस्यहोतुर्य्यज ॥ ३७ ॥ होतायक्षत्सुरेतसमृषभम् ॥ होताय-
क्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्विनाभिषजन्नसरस्वतीमो ५
जोनजूतिरिन्द्रियंवृकोनरभसोभिषग्यशःसुरयाभेषजंश्रियानमा

सरम्पयः सोमः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३८ ॥
होतायक्षद्वनस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳ
शतक्रतुम्भीमन्नमन्युꣳराजानंव्याघ्रन्नमसाश्विनाभामꣳसरस्वती
भिषगिन्द्रायदुहऽइन्द्रियम्पयः सोमः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्य
होतर्य्यज ॥ ३९ ॥ होतायक्षदग्निꣳस्वाहा ॥ होतायक्षदग्निꣳस्वाहाज्ज्य
स्यस्तोकानाꣳस्वाहामेदसाम्पृथक्स्वाहाच्छागमश्विभ्याꣳस्वाहामेषꣳस
रस्वत्यैस्वाहाऽऋषभमिन्द्रायसिꣳहायसहसऽइन्द्रियꣳस्वाहाग्निम्नभेषु

संहि· जꣳस्वाहासोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारंवरुणम्भि उ·अ·
६ षजाम्पतिꣳस्वाहावनस्पतिम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआज्य २१
पाजुषाणोऽअग्निर्भेषजम्पयःसोमःपरिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोत
र्य्यज॥ ४०॥होतायक्षदश्विनौछागस्य॥वपायामेदसोजुषेताꣳ हविर्हो
तर्य्यज॥ होतायक्षत्सरस्वतीम्मेषस्यवपायामेदसोजुषताꣳ हविर्होतर्य्य
ज॥होतायक्षदिन्द्रमृषभस्यवपायामेदसोजुषताꣳ हविर्होतर्य्यज॥ ४१॥ ६
होतायक्षदश्विनौसरस्वतीम्॥होतायक्षदश्विनौसरस्वतीमिन्द्रꣳ सुत्रा

मोणामिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्म-
भिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्र-
स्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सो-
म्यम्मधु पिबन्तु मदन्तु व्यन्तु होतर्यज॥४२॥ होता यक्षदश्विनौ छाग-
स्य॥ हविषऽआत्तामद्य मध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृ-
भो घस्तान्नूनं घासेऽअज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शत-
रुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामत्

संहि· तःउत्सादतोऽङ्गादङ्गादवत्तानाङ्करतऽएवाश्विनाजुषेताᳬंहविर्होतर्य्यज उ·अ·
७ ॥ ४३ ॥ होतायक्षत्सरस्वतीमेषस्यहविषऽआवयदद्यमध्यतोमेदऽउद्भृत २१
म्पुराद्द्वेषोभ्यः पुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽअज्राणांय्यवसप्रथमा
नाᳬंसुमत्क्षराणाᳬंशतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनाम्पार्श्वतः
श्रोणितःशितामतऽउत्सादतोऽङ्गादङ्गादवत्तानाङ्करदेवᳬंसरस्वतीजुषताᳬंह
विर्होतर्य्यज॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्यहविषऽआवयदद्यमध्यतो ७
मेदऽउद्भृतम्पुराद्द्वेषोभ्यःपुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽअज्राणांय्य

वसम्प्रथमानाᳯं सुमत्क्षराणाᳯं ज्ञातरुद्रियाणामग्निष्वात्तानाम्पीवोप
वसनानाम्पार्श्वतः श्रोणितः शितामतउत्सादतोऽङ्गादङ्गादवत्तानाङ्कर
देवमिन्द्रोजुषताᳯं हविर्होतर्यज ॥ ४५ ॥ होतायक्षद्वनस्पतिमभिहिपि
ष्टतमयारभिष्ठयारशनयाधित ॥ यत्राश्विनोश्छागस्यहविषः प्रिया-
धामानियत्रसरस्वत्यामेषस्यहविषः प्रियाधामानियत्रेन्द्रस्यऋषभस्य
हविषः प्रियाधामानियत्राग्नेः प्रियाधामानियत्रसोमस्यप्रियाधामानि
यत्रेन्द्रस्यसुत्राम्णः प्रियाधामानियत्रसवितुः प्रियाधामानियत्रव

संहि· रुणस्यप्प्रियाधामानियक्षद्वनस्पतेः प्प्रियापाथाꣳसियक्षद्देवानामा- उ·अ·
८ ज्यपानाम्प्रियाधामानियक्ष्याग्नेर्होतुः प्प्रियाधामानितक्षैतान्स्तुत्वैवोप २१
स्तुत्वैवोपावस्रक्षद्भीयसऽइवक्रत्वीकरद्देवन्देवोवनस्पतिर्ज्जुषताꣳहवि
र्होतुर्य्यज ॥ ४६ ॥ होतायक्षदग्निꣳस्विष्टकृतम् ॥ होतायक्षदग्निꣳस्वि-
ष्टकृतमयाडग्निरश्विनोश्छागस्यहविषः प्प्रियाधामान्ययाट्सरस्वत्यामेष-
स्यहविषः प्प्रियाधामान्ययाडिन्द्रस्यऽऋषभस्यहविषः प्प्रियाधामान्य ८
याडग्नेः प्प्रियाधामान्ययाट्सोमस्यप्प्रियाधामान्ययाडिन्द्रस्यसुत्राम्णः

प्रियाधामान्न्ययक्षत्सवितुः प्रियाधामान्न्ययक्षद्वरुणस्य प्रियाधामान्न्य-
यक्षद्वनस्पतेः प्रियापाथाᳬसियक्षद्देवानामाज्ज्यपानाम्प्रियाधामानि
यक्षदग्नेर्होतुः प्रियाधामानियक्षत्स्वम्महिमानमायजतामेज्ज्याऽइषः
कृणोतुसोऽअध्वराजातवेदाजुषताᳬहविर्होतर्यज ॥ ४७ ॥ देवम्बर्हिः स
रस्वतीसुदेवमिन्द्रेऽअश्विना ॥ तेजोनचक्षुरक्ष्योर्बर्हिषादधुरिन्द्रियंव-
सुवनेवसुधेयस्यव्यन्तुयज ॥ ४८ ॥ देवीर्द्वारोदेवीर्द्वारोऽअश्विनाभिष
जेन्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नसिद्वारोदधुरिन्द्रियंवसुवनेवसुधेयस्य-

संहि॰ व्यन्तुयज ॥ ४९ ॥ देवीऽउषासौ ॥ देवीऽउषासावश्विनासुत्रामेन्द्रे सरस्व उ॰अ॰
१ ती ॥ बलन्नवाचमास्यऽउषाभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ २१
॥ ५० ॥ देवीजोष्ट्रीदेवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्ण्णयोर्य्य
शोजोष्ट्रीभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५१ ॥ देवीऽऊ
र्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्यश्विनाभिषजावतः ॥
शुक्रन्नज्ज्योतिस्तनयोराहुतीधत्तऽइन्द्रियवसुवनेवसुधेयस्यव्यन्तुयज १
॥ ५२ ॥ देवादेवानाम् ॥ देवादेवानांभिषजाहोताराविन्द्रमश्विना ॥ वषट्कृ

रैःसरस्वतीत्विषिन्नहृदयेमतिꣳहोतृभ्यान्दधुरिन्द्रियंव्वसुवनेवसुधेय
स्यव्यन्तुयज ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीरश्विनेडास
रस्वती । शूषन्नमध्येनाभ्यामिन्द्रायदधुरिन्द्रियंव्वसुवनेवसुधेयस्यव्यन्तु
यज ॥ ५४ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रिवरूथः सरस्वत्याश्वि-
भ्यामीयतेरथः । रेतोनरूपममृतञ्जनित्रमिन्द्रायत्वष्टादधदिन्द्रियाणिव
सुवनेवसुधेयस्यव्यन्तुयज ॥ ५५ ॥ देवोदेवैः ॥ देवोदेवैर्वनस्पतिर्हिरण्य
पर्णोऽअश्विभ्याꣳसरस्वत्यासुपिप्पलऽइन्द्रायपच्यतेमधु ॥ ओजोनजुति

संहि· ऋषभोनभामंवनस्पतिर्न्नोदधदिन्द्रियाणिवसुवनेवसुधेयस्यव्यन्तुय उ·अ·
१० ज॥५६॥देवम्बर्हिः॥देवम्बर्हिर्व्वारितीनामध्वरेस्तीर्ण्णमश्विभ्यामूर्ण्णम्म्र २१
दाःसरस्वत्यास्योनमिन्द्रतेसदः॥ईशायैमन्युꣳराजानम्बर्हिषादधुरिन्द्रियं
वसुवनेवसुधेयस्यव्यन्तुयज॥५७॥देवोऽअग्निःस्विष्टकृद्देवान्यक्षद्यथाय
थꣳहोताराविन्द्रमश्विनावाचावाचꣳसरस्वतीमग्निꣳसोमꣳस्विष्टकृ
त्स्विष्टऽइन्द्रःसुत्रामासवितावरुणोभिषगिष्टोदेवोवनस्पतिःस्विष्टादेवा १०
ऽआज्यपाःस्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशोनदधदिन्द्रियमू

र्ज्जमपचितिᳩंस्वधांवसुवनेवसुधेयस्यव्यन्तुयज॥५८॥अग्निमद्यहो-
तारमवृणीतायंयजमानःपचन्पक्तीःपचन्पुरोडाशान्बध्नन्नश्विभ्या-
ञ्छागᳪंसरस्वत्यैमेषमिन्द्रायऋषभᳪंसुन्वन्नश्विभ्याᳩंसरस्वत्याऽइन्द्रा
यसुत्राम्णेसुरासोमान्त्सूपस्थाऽअद्य॥५९॥सूपस्थाऽअद्यदेवोवनस्प
तिरभवदश्विभ्याञ्छागेनसरस्वत्यैमेषेणेन्द्रायऋषभेणाक्षँस्तान्मेदस्तः
प्रतिपचताग्रभीषतावीवृधन्तपुरोडाशैरपुरश्विनासरस्वतीन्द्रःसुत्रामा
सुरासोमांस्त्वामद्यऽऋषऽआर्षेयऋषीणान्नपादवृणीता

संहि· यंय्यजमानोबृहुब्ध्युऽआसङ्‌तेभ्यऽएषमैदेवेषुवसुवार्य्यायक्ष्यतऽइति उ·अ·
११ तायादेवादैवदानान्न्यदुस्तान्न्येस्म्माऽआचुशास्स्वान्वंगुरस्वेषितश्च्चहोतुर- २२
सिंभद्रवाच्यायप्रेषितोमानुषःसूक्तवाकायसूक्ताब्रूहि॥६१॥इतिवाज
सनेयसंहितायांएकविंशोऽध्यायः॥२१॥ ॥तेजोसिशुक्रममृतमायु·
ष्पाऽआयुर्म्मेपाहि॥देवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोह-
स्ताभ्यामाददे॥१॥इमामगृभ्णन् ॥इमामगृभ्णन्नशनामृतस्यपूर्वऽआयु ११
षिविदथेषुकव्या॥सानोऽअस्मिन्सुतऽआबभूवऋतस्यसोमन्त्सरमारप

न्ती॥ २ ॥अग्निधाऽअसि॥अग्निधाऽअसिभुवनमसियन्तासिधर्त्ता॥
सत्वमग्निंवैश्वानरꣳसप्रथसङ्गच्छस्वाहाकृतः॥ ३ ॥स्वगात्वा॥देवेभ्यः
प्रजापतयेब्रह्मन्नश्वम्भन्त्स्यामिदेवेभ्यःप्रजापतयेतेनराध्यासम् ॥त
म्बधानदेवेभ्यःप्रजापतयेतेनराध्नुहि॥ ४ ॥प्रजापतयेत्वा॥प्रजापतये
त्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वाजुष्टम्प्रोक्षामिवायवेत्वाजुष्टम्प्रोक्षामिवि
श्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि॥योऽ
अर्वन्तञ्जिघाꣳसतितमभ्यमीतिवरुणः॥परोमर्त्तःपरःश्वा॥ ५॥अग्न

संहि॰ येस्वाहा॥ अग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवित्रेस्वाहावा उ॰अ॰
१२ यवेस्वाहाविष्णवेस्वाहेन्द्रायस्वाहाबृहस्पतयेस्वाहामित्रायस्वाहावरु २२
णायस्वाहा॥ ६ ॥हिङ्कारायस्वाहा॥हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्र
न्दतेस्वाहावक्रन्दायस्वाहाप्रोथतेस्वाहाप्रप्रोथायस्वाहागन्धायस्वा-
हाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्ग-
तेस्वाहासीनायस्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्रतेस्वाहाकूज- १२
तेस्वाहाप्रबुद्धायस्वाहाविजृम्भमाणायस्वाहाविचृत्तायस्वाहासꣳहाना

यस्वाहोपस्थितायस्वाहायनायस्वाहाप्रायणायस्वाहा॥७॥सुतेस्वाहा
सुतेस्वाहाधावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृताय-
स्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवायस्वाहाबलायस्वाहाविवर्त्त
मानायस्वाहाविवृत्तायस्वाहाविधून्वानायस्वाहाविधूतायस्वाहाशुश्रूषमा
णायस्वाहाशृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहावीक्षितायस्वाहा
निमेषायस्वाहायदत्तितस्मैस्वाहायत्पिबतितस्मैस्वाहायन्मूत्रङ्करोति
तस्मैस्वाहाकुर्वतेस्वाहाकृतायस्वाहा॥ ८ ॥ तत्सवितुः॥ तत्सवितु

 वरैंण्ण्यम्भर्ग्गों देवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ९ ॥ हिरे
 ण्ण्यपाणिमूतयें॥ सवितारमुपह्वये ॥ सचेत्तादेवतापदम् ॥ १० ॥ देव-
स्यचेततः ॥ देवस्यचेततोमहीम्प्रसवितुर्हवामहे ॥ सुमतिर्ठं·सत्यराध
सम् ॥ ११ ॥ सुष्टुतिर्ठं·सुमितीवृधःसुष्टुतिर्ठं·सुमतीवृधोरातिर्ठं·सवि
तुरीमहे ॥ प्रदेवायमतीविदे ॥ १२ ॥ रातिर्ठं·सत्पतिम् ॥ रातिर्ठं·सत्प
तिम्महेसवितारमुपह्वये ॥ आसवन्देववीतये ॥ १३ ॥ देवस्यसवितुः ॥ १३
देवस्यसवितुर्म्मतिमासवंविश्वदेव्यम् ॥ धियाभगम्मनामहे ॥ १४ ॥

अग्निꣳस्तोमेन ॥ बोधयसमिधानोऽअमर्त्यम् ॥ हव्यादेवेषुनोदधत् ॥
१५ ॥ सहव्यवाट् ॥ सहव्यवाडमर्त्यऽउशिग्दूतश्चनोहितः ॥ अग्निर्धिया
समृण्वति ॥ १६ ॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाꣳऽआसा
दयादिह ॥ १७ ॥ अजीजनोहिपवमानसूर्य्यंविधारेशक्मनापयः ॥ गोजी
रयारꣳहमाणःपुरन्ध्या ॥ १८ ॥ विभूर्म्मात्रा ॥ प्रभूःपित्राश्वोसिहयोस्य
त्योसिमयोस्यर्वासिसप्तिरसिवाज्यसिवृषासिनृमणाऽअसि ॥ ययुर्न्नामा
सिशिशुर्न्नामास्यादित्यानाम्पत्वान्विहिदेवाऽआशापालाऽएतन्देवेभ्योश्व

संहि· म्मेधायुष्प्रोक्षितꣳरक्षते हरन्तिरिहरमतामिहधृतिरिहस्वधृतिःस्वाहा उ·अ·
१४ ॥१९॥ कायस्वाहा॥ कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहास्वाहाधि २२
माधीतायस्वाहामनःप्रजापतयेस्वाहाचित्तंविज्ञातायदित्यैस्वाहादित्यैम
ह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायैस्वाहा
सरस्वत्यैबृहत्यैस्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापूष्णेनरन्धिषायस्वाहा
त्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाविष्णवेस्वाहाविष्णवेनि १४
भूयपायस्वाहाविष्णवेशिपिविष्टायस्वाहा॥२०॥ विश्वोदेवस्य॥नेतु

म्मर्त्तौ वुरीत सुख्यम् ॥ विश्श्वो रायऽइषुध्यति द्युम्म्नं वृणीत पुष्यसे स्वा-
हा ॥ २१ ॥ आब्ब्रह्मन् ॥ आब्ब्रह्मन्ब्राह्मणो ब्ब्रह्मवर्च्चसी जायतामा राष्ट्रे
राजन्न्युः शूरऽइषव्यो तिव्याधी महारथो जायतान्दोग्ग्ध्री धेनुर्वोढानड्वाना
शुः सप्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो-
जायतान्निकामे निकामेनः पर्ज्जन्न्यो वर्षतु फलवत्यो नऽओषधयः पच्च्यन्तां
य्योगक्षेमो नः कल्प्पताम् ॥ २२ ॥ प्राणाय स्वाहा ॥ पानाय स्वाहा व्यानाय-
स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ २३ ॥ प्राच्यै दि

शे। स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रती
च्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे·
स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २४ ॥ अद्भ्यः
स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्द
मानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवा
य स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ २५ ॥ वाताय स्वाहा ॥ धूमाय स्वाहा १५
ऽभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वा

हावर्षतेस्वाहाववर्षतेस्वाहोग्रंवर्षतेस्वाहाशीघ्रंवर्षतेस्वाहोद्गृह्णतेस्वाहो
द्गृहीतायस्वाहाप्रुष्णतेस्वाहाशीकायतेस्वाहाप्रुष्वाभ्यःस्वाहाह्रादुनीभ्यः
स्वाहानीहारायस्वाहा॥ २६ ॥अग्नयेस्वाहा॥ अग्नयेस्वाहासोमायस्वा
हेन्द्रायस्वाहापृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहादिग्भ्यःस्वाहा
शाभ्यःस्वाहोर्व्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा॥ २७ ॥नक्षत्रेभ्यःस्वाहा॥
नक्षत्रियेभ्यःस्वाहाहोरात्रेभ्यःस्वाहार्द्धमासेभ्यःस्वाहामासेभ्यःस्वाहऽ
ऋतुभ्यःस्वाहार्तवेभ्यःस्वाहासंवत्सरायस्वाहाद्यावापृथिवीभ्यांस्वाहा

संहि चन्द्रायस्वाहासूर्य्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यःस्वाहारुद्रेभ्यःस्वा उ॰अ॰
१६ हादित्येभ्यःस्वाहामरुद्भ्यःस्वाहाविश्वेभ्योदेवेभ्यःस्वाहामूलेभ्यःस्वाहाशा २२
खाभ्यःस्वाहावनस्पतिभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यः
स्वाहा ॥२८॥ शतम् ॥१३०० पृथिव्यैस्वाहा ॥ पृथिव्यैस्वाहान्तरिक्षायस्वा
हादिवेस्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहौष
धीभ्यःस्वाहावनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यःस्वाहास १६
रीसृपेभ्यःस्वाहा ॥२९॥ असवेस्वाहा ॥ असवेस्वाहावसवेस्वाहाविभुवेस्वाहाविवस्वते

स्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतयेस्वाहाशूषा
यस्वाहासꣳसर्प्पायस्वाहाचन्द्रायस्वाहाज्ज्योतिषेस्वाहामलिम्लुचायस्वाहा
दिवापतयतेस्वाहा॥ ३०॥ मधवेस्वाहा ॥ मधवेस्वाहामाधवायस्वाहाशुक्रायस्वा
हाशुचयेस्वाहानभसेस्वाहानभस्यायस्वाहेषायस्वाहोर्ज्जायस्वाहासहसेस्वा-
हासहस्यायस्वाहातपसेस्वाहातपस्यायस्वाहाꣳहसस्पतयेस्वाहा॥ ३१ ॥
वाजायस्वाहा॥प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहास्वःस्वाहामूर्ध्ने
स्वाहाव्यश्नुविनेस्वाहान्त्यायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वा

संहि हाधिपतयेस्वाहा।प्रजापतयेस्वाहा॥३२॥आयुर्यज्ञेन॥कल्पताꣳस्वा उ.अ.
१७ हा।प्राणोयज्ञेनकल्पताꣳस्वाहा।पानोयज्ञेनकल्पताꣳस्वाहा।व्यानोयज्ञेनक २३
ल्पताꣳस्वाहोदानोयज्ञेनकल्पताꣳस्वाहा।समानोयज्ञेनकल्पताꣳस्वाहा।चक्षु
र्यज्ञेनकल्पताꣳस्वाहा।श्रोत्रंयज्ञेनकल्पताꣳस्वाहा।वाग्यज्ञेनकल्पताꣳस्वाहा।मनोय
ज्ञेनकल्पताꣳस्वाहात्मायज्ञेनकल्पताꣳस्वाहा।ब्रह्मायज्ञेनकल्पताꣳस्वाहा।ज्योति
र्यज्ञेनकल्पताꣳस्वाहा।स्वर्यज्ञेनकल्पताꣳस्वाहा।पृष्ठंयज्ञेनकल्पताꣳस्वाहा।यज्ञोयज्ञे १७
नकल्पताꣳस्वाहा॥३३॥एकस्मैस्वाहा।द्वाभ्याꣳस्वाहाशतायस्वाहैकशता

यस्वाहैकेऽशातायस्वाहाव्युष्ट्यैस्वाहास्वर्ग्यायस्वाहा॥३४ इतिश्रीवाजसनेयसंहिता
यांदीर्घपाठेद्वाविंशोऽध्यायः॥२२॥ ॥हिरण्यगर्भःसम्॥हिरण्यग
र्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्॥सदाधारपृथिवीन्द्या
मुतेमाङ्कस्मैदेवायहविषाविधेम॥१॥उपयामगृहीतोसि॥प्रजापतये
त्वाजुष्टङ्गृह्णाम्येषतेयोनिःसूर्यस्तेमहिमा॥यस्तेहन्त्संवत्सरेमहिमास
म्बभूवयस्तेवायावन्तरिक्षेमहिमासम्बभूवयस्तेदिविसूर्येमहिमासम्बभूव
तस्मैतेमहिम्नेप्रजापतयेस्वाहादेवेभ्यः॥२॥यःप्राणतोनिमिषतोम

संहि. हित्वैकऽइद्राजा जगतो बभूव ॥ यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै उ.अ.
१८ देवाय हविषा विधेम ॥ ३ ॥ उपयामगृहीतोसि ॥ प्रजापतये त्वा जुष्टं गृह्णा २३
म्येष ते योनिश्चन्द्रमास्ते महिमा ॥ यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृ
थिव्यामग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव त-
स्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ ४ ॥ युञ्जन्ति ब्रध्नमरुषं चरन्त
म्परि तस्थुषः ॥ रोचन्ते रोचना दिवि ॥ ५ ॥ युञ्जन्त्यस्य ॥ युञ्जन्त्यस्य का- १८
म्या हरी विपक्षसा रथे ॥ शोणा धृष्णू नृवाहसा ॥ ६ ॥ यद्वातः ॥ यद्वातोऽअ

पो॒ऽअ॒ग्नेरी॑ग॒न्धिप्रि॒या मि॒न्द्रस्य॑ त॒न्वम्। एत॑ᳪं स्तोतर॒नेन॑ प॒था पुन॒रश्व॒मा

व॑र्तयासि नः ॥ ७ ॥ वस॑वस्त्वा ॥ अञ्जन्तु गाय॒त्रेण॒ छन्द॑सा रु॒द्रास्त्वा॑ञ्जन्तु॒ त्रै

ष्टु॑भेन॒ छन्द॑सादि॒त्यास्त्वा॑ञ्जन्तु॒ जाग॑तेन॒ छन्द॑सा ॥ भूर्भुवः॒ स्वर्लाजी॒३ञ्छाची॒३न्य

व्ये॒ गव्य॑ऽए॒तद॒न्नम॑त्त देवाऽए॒तद॒न्नम॑द्धि प्रजापते ॥ ८ ॥ कः स्वि॑त् ॥ कः स्वि॑दे-

का॒की च॑रति॒ क उ॑ स्विज्जायते॒ पुनः॑ ॥ किᳪं स्वि॑द्धि॒मस्य॑ भेष॒जं किम्वा॒वप॑नम्म॒

हत् ॥ ९ ॥ सूर्य॑ऽएका॒की ॥ च॑रति च॒न्द्रमा॑ जायते॒ पुनः॑ ॥ अ॒ग्निर्हि॒मस्य॑ भेष॒जं

भूमि॑रा॒वप॑नम्म॒हत् ॥ १० ॥ का स्वि॑त् ॥ का स्वि॑दासीत्पू॒र्वचि॑त्तिः॒ किᳪं स्वि॑दासीद्बृ॒हद्

संहि यः ॥ कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशङ्गिला ॥ ११ ॥ द्यौरासीत् उ॰अ॰
१९ ॥ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः ॥ अविरासीत्पिलिप्पिला रात्रि- २३
रासीत्पिशङ्गिला ॥ १२ ॥ वायुष्ट्वा ॥ पचतैरवत्वसितग्रीवश्छागैर्न्यग्रोधश्च-
मसैः शल्मलिर्वृद्ध्या ॥ एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्माकृष्णश्च-
नोवतु नमोग्नये ॥ १३ ॥ सꣳशितो रश्मिना ॥ रथः सꣳशितो रश्मि-
ना हयः ॥ सꣳशितोऽअप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥ १४ ॥ स्वयं वाजि- १९
न् ॥ स्वयं वाजिंस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व ॥ महिमा तेऽन्येन-

कुब्जम्प्रमुदेवामनन्द्वार्भ्यः स्रामꣳस्वप्नायान्धमधर्म्मायबधिरम्पवित्राय

भिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्प्रश्निनमुपशिक्षायाऽअभि
प्प्रश्निनम्मर्य्यादायैप्प्रश्नविवाकम् ॥१०॥ अर्म्मेभ्भ्यो हस्तिपम् ॥ अर्म्मे
भ्भ्यो हस्तिपञ्जवायाश्श्वपम्पुष्ट्यैगोपालंव्वीर्य्यायाविपालन्तेजसेजपाल
मिरायैकीनाशङ्कीलालायसुराकारम्भद्रायगृहपंश्श्रेयसेवित्तधमाद्ध्य
क्ष्यायानुक्षत्तारम् ॥११॥ भायैदार्व्वाहारम् ॥ भायैदार्व्वाहारम्प्रभायाऽअ
ग्न्येधम्ब्रध्नस्यविष्टपायाभिषेक्तारंव्वर्षिष्ठायनाकायपरिवेष्टारन्देवलोकाय
पेशितारम्मनुष्यलोकायप्प्रकरितारꣳसर्व्वेभ्भ्योलोकेभ्भ्यऽउपसेक्तारमवऽऋ

संहि॰ त्यैवपुधायौपमन्थितारम्मेधायै वासःपल्पूलीम्प्रकामायरजयित्रीम्॥ उ॰अ॰
६४ १२॥ ऋतयेस्तेनहृदयम्॥ ऋतयेस्तेनहृदयँवैरहत्यायपिशुनंविविक्त्यै ३०
क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्कन्दम्प्रियायप्रि
यवादिनमरिष्ट्याऽअश्वसादँस्वर्गायलोकायभागदुघंवर्षिष्ठायनाका
यपरिवेष्टारम्॥१३॥मन्यवेयस्तापम्॥ मन्यवेयस्तापङ्क्रोधायनिसरंयो
गाययोक्तारँशोकायाभिसर्तारङ्क्षेमायविमोक्तारमुत्कूलनिकूलेभ्यस्त्रि ६६
ष्ठिनंवपुषेमानस्कृतँशीलायाञ्जनीकारीन्निर्ऋत्यैकोशकारींयमायासूम्

॥१४॥ यमाय यमसूम् ॥ यमाय यमसूमथर्वभ्योऽवतोकाꣳ संवत्सराय-
पर्य्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायाति-
ष्कद्वरीं वत्सराय विजर्जराꣳ संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्धꣳ सा-
ध्येभ्यश्चर्म्मम्नम् ॥१५॥ सरोभ्यो धैवरम् ॥ सरोभ्यो धैवरमुपस्थावरा-
भ्यो दाशं वैशन्ताभ्यो बैन्दन्नड्वलाभ्यः शौष्कलम्पारायमार्गारमवारायकै-
वर्त्तन्तीर्थेभ्य आन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्ण्णकं गुहाभ्यः किरात-
ꣳ सानुभ्यो जम्भकं पर्वतेभ्यः किम्पूरुषम् ॥१६॥ बीभत्सायै पौल्कसम् ॥

संहि बीभत्सायैपौल्कसंवर्ण्णायहिरण्यकारन्तुलायैवाणिजम्पश्चादोषायग्ला उ.अ.
६५ विनंविश्वेभ्योभूतेभ्यःसिध्मलम्भूत्यैजागरणमभूत्यैस्वपनमार्त्यैजनवा ३०
दिनंव्यृद्ध्याऽअपगल्भꣳसंꣳशरायप्रच्छिदम्॥१७॥अक्षराजायकितव
म्॥अक्षराजायकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्पिनन्द्वापरायाधि-
कल्पिनमास्कन्दायसभास्थाणुम्मृत्यवेगोव्यच्छमन्तकायगोघातङ्क्षु-
धेयोगांविकृन्तन्तम्भिक्षमाणऽउपतिष्ठतिदुष्कृतायचरकाचार्य्यम्पाप्म ६५
नेसैलगम्॥१८॥प्रतिश्रुत्कायाऽअर्तनम्॥प्रतिश्रुत्कायाऽअर्तनङ्घोषा

यक्षुषमन्त्रायबहुवादिनमनन्तायमूकꣳशब्दायाडम्बराघातम्महसेवी-
णावादङ्क्रोशायतूणवध्ममवरस्परायशङ्खध्मंवनायवनपमन्यतोरण्या
यदावपम् ॥१९॥ नर्म्मायपुंश्चलूम् ॥ नर्म्मायपुंश्चलूꣳहसायकारिंयादसे-
शाबल्याङ्ग्रामण्यङ्गणकमभिक्रोशकन्तान्महसेवीणावादम्पाणिघ्नन्तू
णवध्मन्तान्नृत्तायानन्दायतलवम् ॥२०॥ अग्नयेपीवानम् ॥ अग्नयेपीवा
नम्पृथिव्यैपीठसर्प्पिणंवायवेञ्चाण्डालमन्तरिक्षायवꣳशनर्त्तिनन्दिवेख
लतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यःकिर्म्मिरञ्चन्द्रमसेकिलासमन्हेशुक्ल

म्पिंङ्गाक्षꣳ·राञ्यैं कृष्णाम्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतानष्टौ विरूपा
नालभतेतिंदीर्घंञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृ
ष्णञ्चातिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥
मागधः पुंश्चुली कितवः क्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥ २२ ॥
२ ॥ इतिसंहितापाठे त्रिंशत्तमोऽध्यायः ॥ ३० ॥ सहस्रशीर्षापुरुषः ॥ सह
स्राक्षः सहस्रपात् ॥ सभूमिꣳ·सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पु ६६
रुषऽएव ॥ पुरुषऽएवेदꣳ·सर्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उतामृतत्वस्येशानोय

दन्नेनातिरोहति ॥ २ ॥ एतावानस्य ॥ महिमातोज्ज्यायाँश्चपूरुषः ॥ पा
दोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्व ॥ त्रिपादूर्द्ध्व
ऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअ
भि ॥ ४ ॥ ततोविराट् ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥ सजातोऽअ
त्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्वहुतः स
म्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ त
स्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे ॥ छन्दाᳬसि

संहि जज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥७॥ तस्म्मादश्श्वाः॥ तस्म्मादश्श्वा उ॰अ॰
६७ ऽअजादन्तुयेकेचोभयादतः॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजा ३१
वयः॥८॥ तंय्यज्ञम्॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेनदे
वाऽअयजन्तसाद्ध्याऽऋषयश्चये॥९॥ यत्पुरुषम्॥ यत्पुरुषंव्व्यदधुः कति
धाव्व्यकल्प्पयन्॥ मुखङ्किमस्स्यासीत्किम्बाहूकिमूरूपादाऽउच्च्यते ॥१०॥
ब्राह्मणोस्स्य॥ ब्राह्मणोस्स्यमुखमासीद्बाहूराजन्न्यः कृतः॥ ऊरूतदस्स्य ६७
यद्वैश्यः पद्भ्याठंशूद्रोऽअजायत॥११॥ चन्द्रमामनसः॥ चन्द्रमामनसोजात

चक्षोः सूर्य्यौऽ अजायत॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥
१२॥ नाभ्याऽआसीत्॥ नाभ्याऽ आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत
॥ पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ऽअकल्पयन्॥१३॥ यत्पुरुषेण॥
हविषा देवा यज्ञमतन्वत॥ वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽ इध्मः शरद्धविः
॥१४॥ सप्तास्यासन्॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः
॥ देवा यद्यज्ञन्तन्वानाऽ अबध्नन्पुरुषम्पशुम्॥ १५॥ यज्ञेन यज्ञम्॥ यज्ञेन
यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्॥ ते ह नाकम्महिमानः सच

संहि· न्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः ॥१६॥ अद्भ्यःसम्भृतः ॥ पृथिव्यैरसाच्चवि उ·अ·
६८ श्वकर्म्मणःसमवर्त्तताग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्व ३१
माजानमग्ग्रे ॥१७॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः
परस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥१८॥ प्र
जापतिश्चरति ॥ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानोबहुधाविजायते ॥
तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥१९॥ योदे ६८
वेभ्यः ॥ योदेवेभ्यऽआतपतियोदेवानांपुरोहितः ॥ पूर्व्वोयोदेवेभ्योजातोन

मोरुचायब्ब्राह्म्मये॥ २०॥ रुचम्ब्राह्म्मम्॥ रुचम्ब्राह्म्मञ्जनयन्तोदेवाऽअ
ग्ग्रेतदब्ब्रुवन्॥ यस्त्वैवम्ब्राह्म्मणोविद्यात्तस्यदेवाऽअसन्वशे॥ २१॥ श्रीश्च
॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्त्राणिरूपमश्विनौव्यात्तम्॥
इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥ २२॥ इतिसंहितायां
एकत्रिंशोऽध्यायः॥ ३१॥ तदेव॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्
द्द्रमाः॥ तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्प्रजापतिः॥ १॥ सर्वेनिमेषाः॥
सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमद्ध्येपरिजग्भ्र

संहि॰ भतु ॥ २ ॥ नतस्य ॥ प्रतिमाऽअस्ति यस्यनाममहद्यशः ॥ हिरण्यगर्भऽ उ॰अ॰
६९ इत्येषमामाहिंꣳसीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोह ॥ देवः प्र- ३२
दिशोनुसर्वाः पूर्वोहजातः सऽउगर्भेऽअन्तः ॥ सऽएवजातः सजनिष्यमा-
णः प्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः ॥ ४ ॥ यस्माज्जातम् ॥ यस्माज्जात
न्नपुराकिञ्चनैवयऽआबभूवभुवनानिविश्वा ॥ प्रजापतिः प्रजयासꣳरराः
णस्त्रीणिज्योतीꣳषिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्रापृथि ६९
वीचदृढायेनस्वस्तभितंयेननाकः ॥ योऽअन्तरिक्षेरजसोविमानः कस्मैदे

वायहविषाविधेम॥६॥यङ्क्रन्दसी॥यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यै
क्षेताम्मनसारेजमाने॥यत्राधिसूरऽउदितोविभातिकस्मैदेवायहविषावि
धेम॥आपोहयद्बृहतीर्यश्चिदापः॥७॥वेनस्तत्॥वेनस्तत्पश्यन्निहितङ्गु
हासद्यत्रविश्वम्भवत्येकनीडम्॥ तस्मिन्निदꣳसञ्चविचैतिसर्वꣳसऽ
ओतःप्रोतश्चविभूःप्रजासु॥८॥प्रतत्॥प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वो
धामविभृतङ्गुहासत्॥त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुः
पितासत्॥९॥सनः॥सनोबन्धुर्जनितासविधाताधामानिवेदभुवनानि

अग्नेसख्येसुस्वन्दभेम्॥ ३ ॥ युक्ष्वाहि॥ दैवहूतमाइं॥अश्वाइं ॥अग्नेरथी-
रिव॥ निहोतापूर्व्यःसदः॥ ४॥ द्वेविरूपे॥चरतःस्वर्थेऽअन्यान्यावत्समुपधा
पयेते॥ हरिरन्यस्याम्भवतिस्वधावाञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्चाः॥५॥
शतम्॥१७००॥अयमिह॥प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः
॥यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे॥ ६॥त्रीणिशता॥त्री-
सहस्राण्यग्निन्त्रिंशच्चदेवानवचासपर्य्यन्॥औक्षन्घृतैरस्तृणन्बर्हिरस्मा
ऽआदिद्धोतारन्न्यसादयन्त॥ ७॥मूर्द्धानन्दिवः॥मूर्द्धानन्दिवोऽअरतिम्पृथिव्या

धेश्वानरमृतः आजातमग्निम् ॥ कविꣳसम्राजमतिथिञ्जनानामा-
सन्नापात्रञ्जनयन्त देवाः॥८॥अग्निर्वृत्राणि॥जङ्घनद्द्रविणस्युर्विपन्य
या॥समिद्धःशुक्रऽआहुतः॥९॥विश्वेभिःसोम्म्यम्॥विश्वेभिःसोम्म्य
म्मध्वग्नऽइन्द्रेणवायुना॥पिबामित्रस्यधामभिः॥१०॥आयन्तु॥आयदिषे
नृपतिन्तेजऽआनट्शुचिरेतोनिषिक्तन्द्यौरभीके॥अग्निःशर्द्धमनवद्यंयुवान
ꣳस्वाध्यञ्जनयत्सूदयञ्च॥११॥अग्नेशर्द्ध॥महतेसौभगायतवद्युम्नान्युत्-
तमानिसन्तु॥सञ्जास्पत्यꣳसुयममाकृणुष्वशत्रूयतामभितिष्ठामहाꣳसि

संहि सि ॥ १२ ॥ त्वार्थंहि ॥ मन्द्रतममर्क्कशोकैर्व्वृमहेमहिनः श्रोष्यग्ने ॥ इन्द्रन्न उ॰ अ॰
७२ त्वाशवसादेवतावायुम्पृणन्तिराधसानृतमाः ॥ १३ ॥ त्वेऽअग्ने ॥ स्वाहुतप्रि ३३
यासः सन्तुसुरयः ॥ यन्तारोयेमघवानोजनानामूर्वान्दयन्तगोनाम् ॥ १४ ॥
श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णवह्निभिर्द्देवैरग्नेसयावभिः ॥ आसी
दन्तुबर्हिषिमित्त्रोऽअर्य्यमाप्रातर्य्यावाणोऽअध्वरम् ॥ १५ ॥ विश्श्वेषाम-
दितिः ॥ विश्श्वेषामदितिर्य्यज्ञियानांविश्श्वेषामतिथिर्म्मानुषाणाम् ॥ ७२
अग्निर्द्देवानामवऽआवृणानः सुमृडीकोभवतुजातवेदाः ॥ १६ ॥ महोऽअ-

ग्नेः ॥ संमिधानस्यशर्म्मण्यनागामित्रेवरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवि
तुःसवीमनितद्देवानामवोऽअद्यावृणीमहे ॥ १७ ॥ आपश्चित् ॥ आप-
श्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरितारस्तऽइन्द्र ॥ याहिवायुर्न्ननियुतोनो
ऽअच्छात्वꣳहिधीभिर्द्दयसेविवाजान् ॥ १८ ॥ गावउप ॥ ॥ गावउपावतावतम्महीयज्ञ
स्यरप्सुदा ॥ उभाकर्ण्णाहिरण्यया ॥ १९ ॥ यदद्य ॥ सूरउदितेनागामित्रोऽ
अर्य्यमा ॥ सुवातिसविताभगः ॥ २० ॥ आसुतेसिञ्चतश्रियꣳरोदस्योर
भिश्रियम् ॥ रसादधीतवृषभम् ॥ तम्प्रत्नथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि-

संहि आतिष्ठन्तम्परि विश्वेऽ अभूषञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ महत्तद्वृष्णो उ.अ.
७३ ऽअसुरस्यनामाविश्वरूपोऽ अमृतानितस्थौ ॥ २२ ॥ प्रवः ॥ प्रवोमहे म ३३
न्दमा ।नायांधसोर्च्चाविश्वानराय विश्वाभुवे ।इन्द्रस्ययस्यसुमखंसहोम
हिश्रवोनृम्णञ्चरोदसीसपर्य्यतः ॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिध्मऽ एषा
म्भूरिशास्तम्पृथुःस्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहिम
त्स्यन्धसोविश्वेभिःसोमपर्वभिः ॥ महाँ २ ॥ ऽअभिष्टिरोजसा ॥ २५ ॥ इन्द्रो ७३
वृत्रम् ॥ इन्द्रोवृत्रमवृणोच्छर्द्धनीतिः प्रमायिनाममिनाद्वर्पणीतिः ॥ अहन्व्य

ठे॰समुद्राधुग्ग्वनैष्वा विन्द्रीनोऽ अकृणो द्वाम्म्याणाम् ॥ २६ ॥ कुतस्त्वम् ॥ कु
तस्त्वमिन्द्रमाहिनःसन्नेकोयासिसत्पतेकिन्तऽ इत्था ॥ सम्पृंछसेसमराणः
शुभानैर्वोचेस्तन्नोहरिवोयत्तेऽ अस्मे ॥ महा२ँ ॥ऽ इन्द्रोयओजसाकुदाचन
स्तरीरसिकुदाचनप्रयुच्छसि ॥ २७ ॥ आतत्तेऽ इन्द्रायवः पनन्ताभियऽ ऊर्व
ङ्गोमन्तन्तितृत्सान् ॥ सकृत्स्वंय्येपुरुपुत्राम्महीं सहस्रधाराम्बृहतीन्दुदुक्ष
न् ॥ २८ ॥ इमान्ते ॥ इमान्तेधियम्प्रभरेमहोमहीमस्यस्तोत्रेधिषणायत्तेऽ आ
नजे ॥ तमुत्सवेचप्रसवेचसासहिमिन्द्रन्देवासः शवसामदन्ननु ॥ २९ ॥ बि-

संहि॰ ७४

आ॒द्दृह॑त् ॥ धि॒ज्ञाद्दृ॑ह॒सि॑वतु॒सो॒म्म्य॒म्म॒ध्वा॒यु॒र्द्धी॑धद्य॒ज्ञप॑तावविह्नु॑तम् ॥ वा उ॰अ॰

तेजू॒तो॒जो॑ऽअ॒भि॒रक्षी॑ति॒त्म॒नो॑प्र॒जाः॑पु॒पो॑ष॒पु॒रु॒धा॒विरा॑जति ॥ ३० ॥ उ॒दु॒त्य ३३

म् ॥ उ॒दु॒त्यञ्जा॒तवे॑दसन्दे॒वंव॑हन्ति के॒तव॑ः ॥ दृ॒शे॒वि॒श्वा॑य॒सूर्य॑म् ॥ ३१ ॥ ये

नो॑पाव॒क ॥ ये॒नो॑पाव॒क॒चक्ष॑सा भु॒र॒ण्यन्त॒ञ्जना॒इँ॥ऽअनु ॥ त्वंव॑रुण॒पश्य॑सि

॥ ३२ ॥ दैव्या॑व॒ध्व॒र्य्यू॒ऽआग॑तु॒ꣳरथे॑न॒सूर्य॑त्वचा ॥ मध्वा॑य॒ज्ञꣳसम॑ञ्जाथे ॥ त

म्प्र॒त्नथा॒यंवे॒नश्चि॒त्रन्दे॒वानाम् ॥ ३३ ॥ आनः ॥ आन॒ऽइडा॑भिर्वि॒दथे॑सुश॒स्ति॒वि ७४

श्वान॑रः स॒वि॒ता दे॒वऽएतु ॥ अपि॒यथा॑युवानो॒मत्स॑थानो॒वि॒श्वञ्जग॑दभि॒पि

त्वेमनीषा ॥ ३४ ॥ यदद्य ॥ कच्चवृत्रहन्नुदगा॑ऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्र
तेव्वशे॑ ॥ ३५ ॥ तरणिर्व्विश्श्वदर्शतः ॥ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसू-
र्य्य ॥ व्विश्श्वमाभासिरोचनम् ॥ ३६ ॥ तत्सूर्य्यस्य ॥ देवत्वन्तन्महित्वम्मद्ध्या
कर्त्तोर्व्विततँ॰सञ्जभार ॥ यदेदयुक्तहरितः सधस्त्थादाद्रात्त्रीवासस्तनुतेसि
मस्म्मैं ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुते-
द्योरुपस्त्थे ॥ अनन्तमन्न्यद्रुशदस्यपाजः कृष्णमन्न्यद्धरितः सम्भरन्ति ॥
३८ ॥ बण्णमहान् ॥ बण्महाँ॥ऽअसिसूर्य्यबडादित्यमहाँ॥ऽअसि ॥

संहि॰ महस्तैसतोमहिमापनस्यतेऽद्धादेवमहाँ२ ॥ऽअसि॥ ३९ ॥ बट्सूर्य्यश्रव- उ॰अ॰
७५ सामहाँ२ ॥ऽअसिसत्रादेवमहाँ२ ॥ऽअसि ॥ मह्नादेवानामसुर्य्यः पुरो- ३३
हितोविभुज्ज्योतिरदाभ्यम् ॥ ४० ॥ श्रायन्तऽइवसूर्य्यम् ॥ श्रायन्तऽइवसू-
र्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम
॥ ४१ ॥ अद्यादेवाः ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृतानिरवद्या-
त् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः ॥ ४२ ॥ ७५
आकृष्णेन ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्यये

नसविता रथेना देवो याति भुवनानि पश्यन् ॥ ४३ ॥ प्रवावृजे ॥ सुप्रया ब
र्हिरेषामा विश्पतीव वीरिट ऽ इयाते ॥ विशामक्तोरुषसः पूर्वहूतौ वायुः पू-
षा स्वस्तये नियुत्वान् ॥ ४४ ॥ इन्द्रवायू बृहस्प्पतिम् ॥ इन्द्रवायू बृहस्प्पतिम्मि-
त्राग्निम्पूषणम्भगम् ॥ आदित्यान्मारुतङ्गणम् ॥ ४५ ॥ वरुणः प्राविता ॥
भुवन्मित्रो विश्वाभिरूतिभिः ॥ करतान्नः सुराधसः ॥ ४६ ॥ अधिनः ॥
अधिन ऽ इन्द्रैषां विष्णो सजात्यानाम् ॥ इता मरुतो ऽ अश्विना ॥ तम्प्रत्नथा-
यं वेनो ये देवास ऽ आ न ऽ इडाभिर्विश्वेभिः सोम्यम्मध्वोमासश्चर्षणीधृतः

संहि· ॥ ४७ ॥ अग्नऽ इन्द्र ॥ वरुणामित्रदेवाः शर्द्धः प्रयन्तमारुतोतविष्णो ॥ उ उ·अ·
७६ भानासत्यारुद्रोऽअधग्नाः पूषाभगः सरस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्नीमित्रा ३३
वरुणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीन्द्यामरुतः पर्वताꣳ ॥
अपः ॥ हुवेविष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳसꣳसवितारमूतये ॥
४९ ॥ अस्मेरुद्राः ॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः
॥ यः शꣳसतेस्तुवतेधायिपज्रऽ इन्द्रज्येष्ठाऽअस्माꣳ ॥ ऽअवन्तुदेवाः ॥ ७६
५० ॥ अर्वाञ्चोऽ अद्य ॥ अर्वाञ्चोअद्याभवतायजत्राऽआवोहार्दिभयमा-

नो ह्यये यम् ॥ आ त्वं नो देवा निजुरो वृकस्य आ त्वं कुर्ता दवपदो यजत्राः ॥५१
॥ विश्वेऽ अद्य ॥ मरुतो विश्वेऽ ऊती विश्वे भवन्त्वग्नयः समिद्धाः ॥ विश्वे
नो देवाऽ अवसा गमन्तु विश्वमस्तु द्रविणं वाजोऽ अस्मे ॥ ५२ ॥ विश्वेदेवाः ॥
शृणुतेमᳬं हवम्मे येऽ अन्तरिक्षे यऽ उप द्यवि ष्ठ ॥ येऽ अग्निजिह्वाऽ उत वा यज-
त्राऽ आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ ५३ ॥ देवेभ्यो हि ॥ प्रथमं यज्ञियेभ्यो
ऽमृतत्वᳬं सुवसि भागमुत्तमम् ॥ आदिद्दामानᳬं सवितर्व्यूर्णुषेऽनूचीना जी
विता मानुषेभ्यः ॥ ५४ ॥ प्र वायुम् ॥ प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्व

संहि· वीरठं·रथप्राम्॥ द्युतद्यामानियुतः पत्यमानः कविः कविमियक्षसि उ·अ·
७७ प्रयज्ज्यो॥५५॥इन्द्रवायूऽइमे॥सुताऽउपप्रयोभिरागतम्॥इन्द्रवोवामु ३३
शान्तिहि॥५६॥मित्रठं·हुवे॥पूतदक्षंवरुणञ्चरिशादसम्॥धियंघृ·ताचीं
ठंसाधन्ता॥५७॥दस्रायुवाकवः॥सुतानासत्यावृक्तबर्हिषः॥आयात-
ठं·रुद्रवर्तनी॥तमग्नेत्कथायंवेनः॥५८॥विदद्यादि॥विदद्यदीसरमारुग
णमद्रेर्म्महिपाथः पूर्व्यठं·सध्र्यक्कः॥अग्रन्नयत्सुपद्यक्षराणामच्छारवंप्रथ ७७
माजानतीगात्॥५९॥नहिस्पशम्॥नहिस्पशमविदन्नन्यमस्माद्वैश्वान-

रात्सुरऽ एतारमग्ने३ ॥ एमेनमवृधन्नमृताऽ अमर्त्यंवैश्वानरङ्क्षैत्रजित्यायदे-
वाः३ ॥ ६० ॥उग्राविघनिना ॥उग्राविघनिनामृधऽ इन्द्राग्नीहवामहे ॥ तानोमृ
डातऽईदृशे ॥ ६१ ॥उपास्मै ॥ गायतानरः पवमानायेन्दवे ॥ अभिदेवाइं ॥ऽ
इयक्षते ॥ ६२ ॥ येत्वा ॥ हिहत्यैमघवन्नवर्धन्येशाम्बरेहरिवोयेगविष्टौ ॥ये
त्वानूनमनुमदन्तिविप्राः पिबेन्द्रसोमंसगणोमरुद्भिः ॥ ६३ ॥जनिष्ठाऽ
उग्रः३ ॥सहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अवर्धन्निन्द्रम्मरुत
श्चिदत्रमातायद्वीरन्दधनञ्जनिष्ठा ॥ ६४ ॥आतु ॥आतूनऽइन्द्रवृत्रहन्नस्मा

संहि॰ कमर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्रप्रतूर्ति उ॰अ॰
७८ ष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविश्वतूरसित्वन्तूर्य्यतरु- २३
ष्यतः ॥ ६६ ॥ अनुते ॥ अनुतेशुष्मन्तुरयन्तमीयतुः क्षोणीशिशुन्नमातरा ॥
विश्वास्तेस्पृधःश्नथयन्तमन्यवेवृत्रंयदिन्द्रतूर्वसि ॥ ६७ ॥ यज्ञोदेवानाम् ॥
यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः ॥ आवोर्वाचीसुमतिर्व
वृत्यादंहोश्चिद्यावरिवोवित्तरासत् ॥ ६८ ॥ अदब्धेभिःसवितःपायुभिष्ट्वं- ७८
शिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नो

ऽ अघशर्ठ॑ऽस॒ऽ ईशत् ॥ ६९ ॥ प्रवीरया ॥ शुचयोदद्भिरेवाम ह्य्युभि
र्मर्धुमन्त्तः सुतासः ॥ घहैद्वायोनियुतोर्याह्यच्छापिबासुतस्यान्धसोमदा
य ॥ ७० ॥ गाव ऽ उप ॥ गाव ऽ उपावतावतम्मही यज्ञस्यरप्सुदा ॥ उभाकर्णा
हिरण्यया ॥ ७१ ॥ काव्ययोराजानेषु ॥ काव्ययोराजानेषु क्रत्वादक्षस्यदु
रोणे ॥ रिशादसासधस्थ ऽ आ ॥ ७२ ॥ दैव्यावह्य्यू ॥ दैव्यावह्य्यु ऽ आग
तंर्ठ रथेनसूर्य्यत्वचा ॥ मद्ध्वायज्ञर्ठ समञ्जाथे ॥ तम्प्रत्कथायंवेनः ॥ ७३ ॥
तिरश्चीनोविततः ॥ तिरश्चीनोविततोरश्मिरेषामधः स्विदासी ३ दुपरिस्विदा

संहि ३त् ॥ रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः परस्तात् ॥ उ॰ अ॰
७१ ७४ ॥ आरोदसी ॥ऽअपृणादास्वर्महज्जातंयदेनमपसोऽअधारयन् ॥ सोऽ ३३
अध्वरायपरिणीयतेकविरत्योनवाजसातयेचनोहितः ॥ ७५ ॥ उत्श्वकेभिर्वृत्र
हन्तमा ॥ उत्श्वकेभिर्वृत्रहन्तमायामन्दानाचिदागिरा ॥ आङ्गूषैराविवासतः ॥ ७६
॥ उपनः ॥ सुनवोगिरःशृण्वन्त्वमृतस्यये ॥ सुमृडीकाभवन्तुनः ॥ ७७ ॥ ब्रह्मा
णिमे ॥ मतयःशंसुतासःशुष्मऽइयर्तिप्रभृतोमेऽअद्रिः ॥ आशासतेप्रति ७१
हर्यन्त्युक्थेमाहरीवहतस्तानोऽअच्छ ॥ ७८ ॥ अनुत्तमाते ॥ मघवन्नकिर्नुनत्वा

वो३॥ऽअस्तिदेवताविदानः॥नजायमानोनशतेनजातोयानिकरिष्ष्याकृणु
हिप्प्रवृद्ध॥७९॥तदित्॥तदिदासभुवनेषुज्ज्येष्ठंयतोजज्ञऽउग्ग्रस्त्वेषनृम्मणः
॥सद्द्योजज्ञानोनिरिणातिशत्रूननुयंविश्श्वेमदन्त्यूमाः॥८०॥इमाऽउत्वा॥पुरू
वसोगिरोवर्द्धन्तुयाममं॥पावकवर्ण्णाःशुचयोविपश्चितोभिस्तोमैरनूषत॥८१॥
यस्यायम्॥यस्यायंविश्श्वऽआर्य्योदासःशेवधिपाऽअरिः॥तिरश्चिदर्य्ये
रुशमेपवीरवितुब्भ्येत्सोऽअज्ज्यतेरयिः॥८२॥अयर्ठसहस्रम्॥अयर्ठसह-
स्रमृषिभिःसहस्कृतःसमुद्रऽइवपप्प्रथे॥सत्यःसोऽअस्यमहिमागृणेशवो

संहि यज्ञेषुविप्रराज्ये॥८३॥अदब्धेभिःसवितः॥पायुभिष्ट्वठं शिवेभिरद्यपरि उ॰अ॰
८० पाहिनोगयम्॥हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोऽअघशठंऽस ३३
ऽईशत॥८४॥आनः॥आनोयज्ञन्दिविस्पृशंवायोयाहिसुमन्म्मभिः॥अ
न्तःपवित्रेऽउपरिश्रीणानोयज्ञठं शुक्रोऽअयामिते॥८५॥इन्द्रवायूसुसन्दृ
शा॥सुहवेहहवामहे॥यथानःसर्व्वऽइज्जनोनमीवःसङ्गमेसुमनाऽअसत्
॥८६॥ऋधगित्था॥समर्त्यःशशमेदेवतातये॥योनूनम्मित्रावरुणावभिष्टय ८०
ऽआचक्रेहव्यदातये॥८७॥आयातम्॥आयातमुपभूषतम्मध्वःपिबतमश्वि

ना ॥ दुग्धम्पयौ व्वृषणा जेन्न्यावसू मानौ मर्द्धि ह्वमागतम् ॥ ८८ ॥ प्रैतु ॥ प्रैतु ब्र
ह्मणस्प्पतिः प्र देव्व्येतु सूनृता ॥ अच्छा वीरन्नर्य्यम्पङ्क्तिराधसन्देवा यज्ञन्नय
न्तु नः ॥ ८९ ॥ चन्द्रमाऽ अप्प्स्वु ॥ चन्द्रमाऽ अप्प्स्वन्तरा सुपर्ण्णो धावते दिवि ॥
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहठं हरिरेति कनिक्क्रदत् ॥ ९० ॥ देवन्देवव्वः ॥ दे
वन्देवँव्वो वसे देवन्देवमभिष्टये ॥ देवन्देवठं हुवेम व्वाजसातये गृणन्तो देव्व्या
धिया ॥ ९१ ॥ दिविपृष्ठः ॥ दिवि पृष्टोऽ अरोचताग्निर्व्वैश्वानरो बृहन् ॥ क्ष्मया
व्वृधानऽ ओजसा चनो हितो ज्ज्योतिषा बाधते तमः ॥ ९२ ॥ इन्द्राग्नीऽ अपात् ॥

 इन्द्राग्नीऽअपादियम्पूर्वागात्पद्वतीभ्यः॥हित्वीशिरोजिह्वयावावदच्चरत्त्रि
८१ ꣳशत्पदान्यक्रमीत्॥१३॥देवासोहि॥ष्मामनवेसमन्यवोविश्वेसा ३३
कꣳसरातयः॥तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुवरिवोविदः॥१४॥
अपाधमत्॥अपाधमदभिशस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत्॥देवास्त
ऽइन्द्रसख्यायेमिरेबृहद्भानोमरुद्गण॥१५॥प्रवः॥प्रवऽइन्द्रायबृहतेम
रुतोब्रह्मार्चत॥वृत्रꣳहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा॥१६॥अ ८१
स्येत्॥अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यविष्णवि॥अद्यातमं

स्यमहिमानमायवोनुष्टुवन्तिपूर्वथा ॥ इमाऽउत्वा यस्यायमयꣳ सहस्रमू
र्द्धऽऊषुर्णः ॥९७॥ इतिसंहितापाठेत्रयस्त्रिंशोऽध्यायः ॥३३॥ य
ज्जाग्ग्रतः ॥ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्यो
तिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु ॥१॥ येनकर्म्माणि ॥ येनकर्म्मा
ण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ यदपूर्व्वंयक्षमन्तः प्रजाना
न्तन्मेमनः शिवसङ्कल्पमस्तु ॥२॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुतचेतोधृतिश्च-
यज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनकर्म्मक्क्रियतेतन्मेमनः

शिवसङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतम
मृतेनसर्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसङ्कल्पमस्तु ॥ ४ ॥
यस्मिन्नृचः ॥ यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभावि
वाराः ॥ यस्मिंश्चित्तꣳसर्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ५ ॥
सुषारथिरश्वानिव ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वा-
जिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ६ ॥ ८२
पितुन्नु ॥ स्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यत्रितोव्योजसावृत्रंविपर्वमर्द-

यत्॥७॥अन्वित्॥अन्विदनुमतेत्वम्मन्यासैशञ्चनस्कृधि॥क्रत्वेदक्षाय
नोहिनुप्प्रणऽआयूंषितारिषः॥८॥शतम्॥१८००॥अनुनः॥अनुनोद्या
नुमतिर्य्यज्ञन्देवेषुमन्यताम्॥अग्निश्चहव्यवाहनोभवतन्दाशुषेमयः॥९॥
सिनीवालिपृथुष्टुके॥सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा॥जुषस्वहव्यमाहु
तम्प्रजान्देविदिद्दिनः॥१०॥पञ्चनद्यः॥पञ्चनद्यःसरस्वतीमपियन्तिसस्रोत
सः॥सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥११॥त्वमग्ने॥प्प्रथमोऽअङ्गिराऽ
ऋषिर्देवोदेवानामभवःशिवःसखा॥तवव्रतेकवयोविद्मनापसोजायन्तमरुतोभ्राज

संहि ॥ हृष्ट्यः ॥१२॥ त्वन्नः ॥ त्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य ॥ उ॰अ॰
८३ ॥ त्रातातोकस्यतनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते ॥१३॥ उत्तानायामव ॥ ३४
॥ भराचिकित्वान्सद्यः प्रवीतावृषणञ्जजान ॥ अरुषस्तूपोरुशदस्यपाजऽइडा
यास्पुत्रोवयुनेजनिष्ट ॥१४॥ इडायास्त्वा ॥ पदेवयन्नाभापृथिव्याऽअधि ॥ जात
वेदोनिधीमह्यग्नेहव्यायवोढवे ॥१५॥ प्रमन्महे ॥ शवसानायशूषमाङ्गूषङ्गिर्व
णसेऽअङ्गिरस्वत् ॥ सुवृक्तिभिस्तुवतऽऋग्मियायार्चामार्कन्नरेविश्रुताय ॥ ८३
१६ ॥ प्रवः ॥ प्रवोमहेमहिनमोभरध्वमाङ्गूष्यꣳशवसानायसाम ॥ येनानः

पूर्व्वैंपितरःपदज्ञाऽअर्च्चन्तोऽअङ्गिरसोगाऽअविन्दन् ॥१७॥ इच्छन्तित्वा
॥ सोम्म्यासःसखायःसुन्वन्तिसोमन्दधतिप्रयाᳪंसि ॥ तितिक्षन्तेऽ
अभिशस्तिञ्जनानामिन्द्रत्वदाकश्चनहिप्प्रकेतः ॥१८॥ नतें ॥ दूरेपरमा-
च्चिद्रजाᳪंस्यातुप्प्रयाहिहरिवोहरिब्भ्याम् ॥ स्थिरायवृष्णेसवनाकृतेमायु
क्ताग्ग्रावाणःसमिधानेऽअग्नौ ॥१९॥ अषाढंय्युत्सु ॥ पृतनासुपप्रिᳪंस्व
र्षामप्स्वांव्वृजनस्यगोपाम् ॥ भरेषुजाᳪंसुक्षितिᳪं सुश्रवसञ्जयन्तन्त्वामन-
नुमदेमसोम ॥२०॥ सोमोधेनुम् ॥ सोमोधेनुᳪं सोमोऽअर्वन्तमाशुᳪं सोमो

वीरङ्कर्म्मण्यन्ददाति ॥ सादन्यंविदत्थ्यꣳसभेयम्पितृश्श्रवणंय्योददाश
दस्म्मै ॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽओषधीः सोमविश्श्वास्त्वमपोऽअजन
यस्त्वङ्गाः ॥ त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषाव्वितमोव्ववर्त्थ ॥ २२ ॥ देवेन
नः ॥ देवेननोमनसादेवसोमरायोभागꣳसहसावन्नभियुद्ध्य ॥ मात्वातनदी
शिषेव्वीर्य्यस्योभयेब्भ्यः प्प्रचिकित्सागविष्टौ ॥ २३ ॥ अष्टौव्वि ॥ अष्टौव्व्यक्ख्य
त्ककुभः पृथिव्यास्त्त्रीधन्वयोजनासप्तसिन्धून् ॥ हिरण्याक्षः सवितादेव
ऽआगाद्दधद्रत्नादाशुषेव्वार्य्याणि ॥ २४ ॥ हिरण्यपाणिः सविता ॥ व्विचर्ष

णिरुभे द्यावापृथिवी ऽअन्तरीयते ॥ अपामीवाम्बाधते वेति सूर्य्यमभिकृ-
ष्णेन रजसा द्यामृणोति ॥ २५ ॥ हिरण्यहस्तो ऽअसुरः ॥ सुनीथः सुमृडी
कः स्ववां यात्वर्वाङ् ॥ अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषङ्गृ
णानः ॥ २६ ॥ ये ते ॥ ये ते पन्थाः सवितः पूर्व्यासो ऽरेणवः सुकृता ऽअन्तरिक्षे
॥ तेभिर्नो ऽअद्य पथिभिः सुगेभी रक्षा च नो ऽअधि च ब्रूहि देव ॥ २७ ॥ उभा-
पिबतम् ॥ उभा पिबतमश्विनोभा नः शर्म्म यच्छतम् ॥ अविद्रियाभिरूति-
भिः ॥ २८ ॥ अप्नस्वतीमश्विना ॥ अप्नस्वतीमश्विना वाचमस्मे कृतन्नो

संहि दस्राद्वृषणामनीषाम् ॥ अघ्न्येवसेनिद्रुयेवांवृधेन्वनोभवतुंवाजसातौ ॥ उ॰अ॰
८५ २९ ॥ द्युभिरक्तुभिः ॥ द्युभिरक्तुभिःपरिपातमस्म्मानरिष्टेभिरश्विनासौ ३४
भगेभिः ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्योः
॥ ३० ॥ आकृष्णेन ॥ रजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययै
नसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्रि ॥ पार्थिवर्ठ्ठर
जःपितुरप्रायिधामभिः ॥ दिवःसदांसिबृहतीवितिष्ठसआत्वेषंवर्तते ८५
तमः ॥ ३२ ॥ उषस्तत् ॥ उषस्तच्चित्रमाभरास्म्मभ्यंवाजिनीवति ॥ येनतोक

च्युतन्नयश्च्युधामहे ॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳ हवामहेप्प्रा
तर्म्मित्रावरुणाप्प्रातरश्श्विना ॥ प्रातर्ब्भगम्पूषणम्ब्रह्मणस्प्पतिम्प्रातः सोम
मुतरुद्रꣳ हुवेम ॥ ३४ ॥ प्रातर्ज्जितम्भगम् ॥ प्रातर्ज्जितम्भगमुग्ग्रꣳ हुवेमव्व
यम्पुत्रमदितेर्य्यो विधर्त्ता ॥ आद्ध्रश्चिद्यम्मन्न्यमानस्तुरश्चिद्राजाचिद्यम्भ
गम्भक्षीत्याह ॥ ३५ ॥ भगप्प्रणेतः ॥ भगप्प्रणेतर्ब्भगसत्त्यराधोभगेमान्धियमु
दवाददन्नः ॥ भगप्प्रनोजनयगोभिरश्श्वैर्ब्भगप्प्रनृभिर्न्नृवन्तः स्याम ॥ ३६
॥ उतेदानीम् ॥ उतेदानिम्भगवन्तः स्यामोतप्पपित्वऽउतमद्ध्येऽअन्हाम् ॥

संहि उतोदितामघवन्त्सूर्य्यस्यवयन्देवानांᳬसुमतौस्याम॥ ३७ ॥भगऽएव॥ उ॰अ॰
८६ भगवाꣳ२ऽअस्तुदेवास्तेनवयम्भगवन्तः स्याम ॥ तन्त्वाभगसर्वऽइज्जोहवी ३४
तिसनोभगपुरऽएताभवेह ॥ ३८ ॥समध्वराय॥समध्वरायोषसोनमन्तदधि-
क्रावेवशुचयेपदाय॥ आर्वाचीनंवसुविदम्भगन्नोरथमिवाश्वावाजिनऽआ
वहन्तु॥ ३९ ॥अश्वावतीर्गोमतीः॥अश्वावतीर्गोमतीर्नऽउषासोवीर
वतीः सदमुच्छन्तुभद्राः॥घृतन्दुहानाविश्वतः प्रपीतायूयंपातस्वस्तिभिः ८६
सदानः॥ ४० ॥पूषन्तव॥ व्रतेवयन्नरिष्येमकदाचन॥स्तोतारस्तऽइहस्म्म-

सि॥ ४१ ॥पथस्पथः परिपतिम्॥ पथस्पथः परिपतिंवचस्याकामेनकृ
तोऽअभ्यानड्अर्कम्॥सनोरासच्छुरुधश्चन्द्राग्राधियन्धियंठ॰सीषधातिप्र
पूषा॥ ४२॥त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः॥अतोधर्माणिधा
रयन्॥ ४३ ॥ तद्विप्रासः॥तद्विप्रासोविपन्यवोजागृवाधःसः समिन्धते॥
विष्णोर्यत्परमम्पदम्॥ ४४॥धृतवतीभुवनानाम्॥ धृतवतीभुवनानामभि
श्रियोर्वीपृथ्वीमधुदुघेसुपेशसा॥ द्यावापृथिवीवरुणस्यधर्मणाविष्कभि
तेऽअजरेभूरिरेतसा॥ ४५॥ येनः सपत्नाऽअपतेभवन्त्विन्द्राग्निभ्यामव

बाधामहेतान् ॥ वसवोरुद्राऽआदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिरा
जमक्रन् ॥ ४६ ॥ आनासत्या ॥ त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयम
श्विना ॥ प्रायुस्तारिष्टन्नीरपाᳬंसिमृक्षतᳬंसेधतन्द्वेषोभवतᳬंसचाभुवा
॥ ४७ ॥ एषवः ॥ एषवस्तोमोमरुतऽइयङ्गीर्मान्दार्यस्यमान्यस्यकारोः ॥
एषायासीष्टतन्वेवयांविद्यामेषंवृजनञ्जीरदानुम् ॥ ४८ ॥ सहस्तोमाः सहच्छ
न्दसः ॥ सहस्तोमाः सहच्छन्दसऽआवृतः सहप्रमाऽऋषयः सप्तदैव्याः ॥
पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरथ्योनरश्मीन् ॥ ४९ ॥ आयुष्यं

वर्च्चस्यम्॥ आयुष्यंवर्च्चस्यꣳ रायस्पोषमौद्भिदम् ॥ इदꣳ हिरण्यंवर्च्च
स्वज्जैत्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नतद्रक्षाꣳसि न पिशाचास्तर-
न्ति देवानामोजः प्रथमजꣳ ह्येतत् ॥ यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स
देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ ५१ ॥ यदाबध्नन्॥
यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ॥ तन्मऽ
आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ५२ ॥ उत नः ॥ उत
नो हिर्बुध्न्यः शृणोत्वजऽ एकपात्पृथिवी समुद्रः ॥ विश्वेदेवाऽऋतावृधो

संहि हुवानास्तुतामन्न्वाः कविशस्ताऽअवन्तु ॥ ५३ ॥ इमागिरे ÷ ॥ इमागिरेऽआ उ·अ·
८८ दित्येब्भ्योघृतस्न्नूः सनाद्राजब्भ्योजुह्वाजुहोमि ॥ शृणोतुमित्त्रोऽअर्य्य- ३४
माभगोनस्तुविजातोबरुणोदक्षोऽअꣳशः ॥ ५४ ॥ सप्तऽऋषयः ॥ सप्तऽ
ऋषयः प्प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्प्रमादम् ॥ सप्तापः स्वपतोलो
कमीयुस्तत्त्रजागृतोऽअस्वप्नजौसत्त्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठब्रह्मण-
स्पतेदेवयन्तस्त्वेमहे ॥ उपप्प्रयन्तुमरुतः सुदानवऽ इन्द्रप्प्राशूर्ब्भवासचा ॥ ८८
५६ ॥ प्प्रनूनम् ॥ प्प्रनूनम्ब्रह्मणस्पतिर्म्मन्त्त्रंवदत्युक्त्थ्यम् ॥ यस्मिन्निन्द्रो

वरुणोमित्रोऽअर्य्यमादेवाऽओकाᳪंसिचक्रिरे ॥ ५७ ॥ ब्रह्मणस्पन
ते ॥ ब्रह्मणस्प्पतेत्वमस्ययन्तासूक्तस्यबोधितनयञ्चजिन्व ॥ विश्श्वन्तद्भ
द्रंय्यदवन्तिदेवाबृहद्वदेमविदथेसुवीराः ॥ यऽइमाविश्श्वाविश्श्वकर्म्मा
योनःपितान्नपतेन्नस्यनोदेहि ॥ ५८ ॥ ६ ॥ इतिसंहितापाठेचतुस्त्रिं
शोऽध्यायः ॥ ३४ ॥ अपेतः ॥ अपेतोयन्तुपणयोसुम्म्नादेवपीयवः
॥ अस्यलोकःसुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्ववसान
मस्म्मै ॥ १ ॥ सवितातै ॥ सविताते शरीरेब्भ्यः पृथिव्याल्लोकमिच्छतु ॥ तस्म्मै

मुञ्ज्यन्ता मुस्त्रियाः ॥ २ ॥ वायुः पुनातु ॥ सविता पुनात्वग्नेर्भ्राजसा सूर्य्य
स्य वर्च्चसा ॥ विमुच्यन्तामुस्त्रियाः ॥ ३ ॥ अश्वत्थे वः ॥ अश्वत्थे वो निषदं-
नम्पर्णे वो वसतिष्कृता ॥ गोभाज ऽ इत्किलासथ यत्सनवथ पूरुषम् ॥ ४ ॥
सविता ते ॥ शरीराणि मातुरुपस्थ ऽ आवपतु ॥ तस्म्मै पृथिवि शम्भव ॥ ५
॥ प्रजापतौ त्वा ॥ देवतायामुपोदके लोके निदधाम्यसौ ॥ अप नः शोशुचदघ
म् ॥ ६ ॥ परम्मृत्यो ॥ परम्मृत्यो ऽ अनु परेहि पन्थां यस्ते ऽ अन्य ऽ इतरो देवया
नात् ॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ ७ ॥

शंवातः ॥ शꣳ हितेघृणिः शन्तेभवन्त्विष्टकाः ॥ शन्तेभवन्त्वग्नयः पार्थि
वासोमात्वाभिशूशुचन् ॥ ८ ॥ कल्प्यन्तान्ते ॥ दिशस्तुभ्यमापः ॥ शिवतमा-
स्तुभ्यम्भवन्तु सिन्धवः ॥ अन्तरिक्षꣳ शिवन्तुभ्यङ्कल्प्यन्तान्ते दिशः सर्वाः
॥ ९ ॥ अश्मन्वतीरीयते सꣳ रभध्वमुत्तिष्ठत प्रतरता सखायः ॥ अत्राजही
मोऽशिवा येऽअसञ्छिवान्वयमुत्तरेमाभिवाजान् ॥ १० ॥ अपाघम् ॥ अपाघ
मपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गत्वमस्मदपदुःष्वप्न्यꣳ सुव
॥ ११ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयः सन्तुदुर्मित्रिया-

स्तस्म्मैसन्तुघ्रोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥१२॥ अनड्वाहमन्वारभाम
हेसौरभेयथंस्वुस्तयै॥सनऽइन्द्रऽइवदेवेभ्योवह्निःसन्तारणोभव॥१३॥
उद्वयम्॥उद्वयन्तमसस्प्परिस्स्वःपश्यन्तऽउत्तरम॥देवन्देवत्राासूर्य्यमगन्म
ज्ज्योतिरुत्तमम्॥१४॥इमञ्जीवेब्भ्यः॥परिधिन्दधामिमैषान्नुगादपरोऽ
अर्त्थमेतत्॥शतञ्जीवन्तुशरदःपुरुचीरन्तर्म्मृत्युन्दधताम्पर्वतेन॥१५॥
अग्नऽआयूंथंषि॥पवसऽआसुवोर्ज्जमिषञ्चनः॥आरेबाधस्वदुच्छुनाम्॥
१६॥आयुष्म्मानग्ने॥हविषाव्वृधानोघृतप्प्रतीकोघृतयोनिरेधि॥घृतम्पीत्वा

मधुचा रुगव्येम्पितेवपुत्रमभिरक्षतादिमान्त्स्वाहा॥१७॥ परीमे॥ गा
मनेषतपर्य्यग्निमहृषत॥ देवेष्वक्रतश्रवः कऽइमाँ२॥ऽआदधर्षति॥
॥१८॥ क्रव्यादमग्निम्॥ क्रव्यादमग्निम्प्रहिणोमिदूरंय्यमराज्ज्यङ्गच्छ
तुरिप्रवाहः॥ इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन्॥१९
॥ वहवपाम्॥ वहवपाञ्जातवेदः पितृभ्योयत्रैनान्वेत्थनिहितान्पराके॥
मेदसः कुल्याऽउपतान्त्स्रवन्तुसत्याऽएषामाशिषः सन्नमन्ताᳩस्वाहा॥
२०॥ स्योनापृथिवि॥ नोभवानृक्षरानिवेशनी॥ यच्छानः शर्म्मसप्रथाः॥

संहि· अपनः शोशुचदघम् ॥ २१ ॥ अस्म्मात्वम् ॥ अस्म्मात्वमधिजातोसित्व उ·अ·
९७ दयञ्जायताम्पुनः ॥ असौस्वर्गायलोकायस्वाहा ॥ २२ ॥ इतिसंहितापाठे ३५
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ऋचंवाचम् ॥ ऋचंवाचम्प्रपद्येमनोय-
जुः प्रपद्येसामप्राणम्प्रपद्येचक्षुः श्रोत्रम्प्रपद्ये ॥ वागोजः सहौजोमयिप्रा
पापानौ ॥ १ ॥ यन्मे ॥ छिद्रञ्चक्षुषोहृदयस्यमनसोवातितृणम्बृहस्पति
र्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्पतिः ॥ २ ॥ भूर्भुवः ॥ भूर्भुवः स्वः ९१
॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ३ ॥

कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठया-
वृता ॥ ४ ॥ कस्त्वा सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदारु-
जेवसु ॥ ५ ॥ अभीषुणः ॥ सखीनामविताजरितृणाम् ॥ शतम्भवास्यूति
भिः ॥ ६ ॥ कयात्वम् ॥ कयात्वन्नऽऊत्याभिप्रमन्दसेवृषन् ॥ कयास्तोतृभ्य
ऽआभर ॥ ७ ॥ इन्द्रोविश्वस्य ॥ राजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे
॥ ८ ॥ शन्नोमित्रः शंवरुणः शन्नोभवत्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्प-
तिः शन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोवातः ॥ पवताꣳशन्नस्तपतुसू

संहि· र्य्यः । शन्नः कनिक्रदद्देवः पर्ज्जन्योऽअभिवर्षतु ॥१०॥ अहानि शम् उ·अ·
९२ ॥ अहानि शम्भवन्तु नः शꣳ रात्रीः प्रतिधीयताम् ॥ शन्नऽइन्द्राग्नी भ ३६
वतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या ॥ शन्नऽइन्द्रापूषणा वाजसा
तौ शमिन्द्रासोमा सुविताय शंय्योः ॥११॥ शन्नः ॥ शन्नो देवीरभिष्टयऽ
आपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥१२॥ स्योना पृथिवि ॥ नो भ
वानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥१३॥ आपो हि ॥ ष्ठा मयो- ९२
भुवस्ता नऽऊर्ज्जे दधातन ॥ महे रणाय चक्षसे ॥१४॥ यो वः शिवतमो रस

स्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥१५॥ तस्मा ऽअरम् ॥ तस्मा
ऽअरङ्गमामवोयस्युक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ १६ ॥ द्यौः
शान्तिः ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरो
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः
सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥१७॥ दृतेदृꣳहमा
मित्रस्यमाचक्षुषासर्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषा
सर्वाणिभूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥१८॥ दृतेदृꣳ

संहि· हेमा ॥ जोत्क्कैसुन्दशीजीव्यासुञ्ज्योत्क्कैसुन्दशीजीव्यासम् ॥ १९ ॥ नमस्ते उ·अ·
१३ हरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्न्यांस्तेऽअस्म्मत्तपन्तुहेतयःपाव ३६
कोऽअस्म्मब्भ्यꣳशिवोभव ॥ २० ॥ नमस्ते ॥ ऽअस्तुविद्युतेनमस्तेस्तनयि
त्नवे ॥ नमस्तेभगवन्नस्तुयतःस्वःसमीहसे ॥ २१ ॥ यतोयतःसमीहसेत
तोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाब्भ्योभयन्नःपशुब्भ्यः ॥ २२ ॥ सुमि
त्रियानः ॥ सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्म्मैस ९३
न्तुयोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पु

रस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुया
मशरदः शतम्प्रब्रवामशरदः शतमदीनाःऽस्यामशरदः शतम्भूयश्च
शरदः शतात् ॥ २४ ॥ इतिसंहितायांदीर्घपाठेषट्त्रिꣳशोऽध्यायः ॥ ३६ ॥

देवस्यत्वा ॥ सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आद
देनारिरसि ॥ १ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्र
स्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुः प-
रिष्टुतिः ॥ २ ॥ देवीद्यावापृथिवी ॥ मखस्यवामद्यशिरोराध्यासन्देवयजे

संहि· पृथिव्याः॥मखायत्वा मखस्यत्वाशीर्ष्णे॥ ३ ॥देव्योवम्म्यः॥देव्योव उ·अ·
९४ म्म्यो मृतस्य प्रथमजा मखस्येवोद्यशिरोराध्यासन्देवयजने पृथिव्याः॥ ३७
मखायत्वा मखस्यत्वाशीर्ष्णे॥४॥शतम्॥१९००॥इयत्यग्रे॥इयत्यग्रऽआसी
न्मखस्यतेद्यशिरोराध्यासन्देवयजने पृथिव्याः॥ मखायत्वा मखस्यत्वा
शीर्ष्णे॥ ५ ॥इन्द्रस्यौजः॥ इन्द्रस्यौजस्थमखस्यवोद्यशिरोराध्यासन्दे
वयजने पृथिव्याःमखायत्वा मखस्यत्वाशीर्ष्णे ॥ मखायत्वा मखस्यत्वा ९४
शीर्ष्णे॥मखायत्वा मखस्यत्वाशीर्ष्णे ॥ ६ ॥प्रैतु॥ ब्रह्मणस्पतिःप्र

देव्येतुसूनृता॥ अच्छावीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनः॥म
खायत्वामखस्यत्वाशीर्ष्णे॥मखायत्वामखस्यत्वाशीर्ष्णे॥मखाय
त्वामखस्यत्वाशीर्ष्णे॥७॥मखस्यशिरः॥मखस्यशिरोसि॥मखाय
त्वामखस्यत्वाशीर्ष्णे॥मखस्यशिरोसि॥मखायत्वामखस्यत्वाशीर्ष्णे
॥मखस्यशिरोसि॥मखायत्वामखस्यत्वाशीर्ष्णे॥मखायत्वामखस्यत्वा
शीर्ष्णे॥मखायत्वामखस्यत्वाशीर्ष्णे॥मखायत्वामखस्यत्वाशीर्ष्णे॥
८॥अश्वस्यत्वा॥वृष्णःशक्नाधूपयामिदेवयजनेपृथिव्याः॥मखाय-

संहि· त्वामखस्यशीर्ष्णे ॥ अश्वस्यत्वावृष्णः शक्नाधूपयामिदेवयजनेपृथि उ·अ·
९५ व्याः ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ अश्वस्यत्वावृष्णः शक्नाधूपया ३७
मिदेवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामख
स्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वा-
शीर्ष्णे॥९॥ ऋजवेत्वा ॥ साधवेत्वासुक्षित्यैत्वा ॥ मखायत्वामखस्यत्वा-
शीर्ष्णे॥ मखायत्वामखस्यत्वाशीर्ष्णे॥ मखायत्वामखस्यत्वाशीर्ष्णे॥१०॥ ९५
यमायत्वा॥मखायत्वासूर्यस्यत्वातपसे ॥ देवस्त्वासवितामध्वानक्तुपृथि

ब्याः सुषुंस्पृशस्प्पाहि ॥ अर्ज्जिरसि शोचिरसि तपोसि ॥११॥ अनाधृ
ष्टापुरस्तात् ॥ अनाधृष्टापुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीद
क्षिणतऽइन्द्रस्याधिपत्येप्रजाम्मेदाः ॥ सुखदापश्चाद्देवस्यसवितुरा
धिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्येरायस्प्पोषम्मेदाः ॥
विधृतिरुपरिष्टाद्बृहस्प्पतेराधिपत्यऽओजोम्मेदाविश्वाभ्योमानाष्ट्राभ्य
स्प्पाहिमनोरश्वासि ॥१२॥ स्वाहामरुद्भिः ॥ परिश्रीयस्वदिवः सुषुं
स्पृशस्प्पाहि ॥ मधुमधुमधु ॥१३॥ गर्ब्भोदेवानाम् ॥ गर्ब्भोदेवानांपिता

संहि मेतीनाम्पतिः प्रजानाम् ॥ सन्देवोदेवेनसवित्रागतसꣳसूर्य्येणारोच उ.अ.
९६ ते ॥ १४ ॥ समग्निः ॥ समग्निरग्निनागतसन्दैवेनसवित्रासꣳसूर्य्येणा ३७
रोचिष्ट ॥ स्वाहासमग्निस्तपसागतसन्दैव्येनसवित्रासꣳसूर्य्येणारूरु
चत ॥ १५ ॥ धर्त्ता दिवः ॥ धर्त्तादिवोविभातितपसस्पृथिव्यान्धर्त्तादेवोदे
वानाममर्त्यस्तपोजाः ॥ वाचमस्मेनियच्छदेवायुवम् ॥ १६ ॥ अपश्यं-
गोपाम् ॥ अपश्यङ्गोपामनिपद्यमानमाचपराचपथिभिश्चरन्तम् ॥ सस ९६
ध्रीचीः सविषूचीर्वसानऽआवरीवर्त्तिभुवनेष्वन्तः ॥ १७ ॥ विश्वासा-

म्भुवाम् ॥ विश्र्वासाम्भुवाम्पतेविश्र्वस्यम नसस्पतेविश्र्वस्यवच्च-
स्पतेसर्व्वस्यवच्चसस्पते ॥ देवश्रुत्वन्देवधर्म्मदेवो देवान्पाह्यत्त्रप्रा-
वीरनुवान्देववीतये ॥ मधुमा ।ङ्धीञ्थाम्मधुमाधूचीञ्थाम् ॥ १८ ॥ हृदेत्वा
॥ मनसेत्वा दिवेत्वासूर्य्यायत्वा ॥ ऊर्द्ध्वोऽअध्वरन्दिविदेवेषुधेहि ॥ १९ ॥
पितानः ॥ पितानोसिपितानोबोधिनमस्तेऽअस्तुमामाहिᳬसीः ॥ त्व
ष्टृमन्तस्त्वासपेमपुत्रान्पशून्मयिधेहिप्रजामस्मासुधेह्यरिष्टाहᳬसु
हपत्याभूयासम् ॥ २० ॥ अहः केतुना ॥ जुषताᳬसुज्ज्योतिज्ज्योतिषा स्वा-

संहि· हो ॥ रात्रिः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा ॥ २१ ॥ इति उ·अ·
९७ वाजसनेयसंहितायां दीर्घपाठे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ देवस्यत्वा ॥ ३८
देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददेऽदित्यै
रास्नासि ॥ १ ॥ इडऽएहि ॥ इडऽएह्यदितऽएहि सरस्वत्येहि ॥ असावेह्य
सावेह्यसावेहि ॥ २ ॥ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासि घर्म्मा
य दीष्व ॥ ३ ॥ अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ स्वा ९७
हेन्द्रवत् स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥ यस्ते ॥ स्तनः शशयो यो मयोभूर्यो

रत्नधाव्वसुविद्यः सुदत्रः॥ येनविश्वापुष्यसिवार्य्याणिसरस्वतितमिह
धातवेकः॥ उर्व्वन्तरिक्षमन्वेमि॥ ५॥ गायत्रञ्छन्दः॥ गायत्रञ्छन्दो-
सित्रैष्टुभञ्छन्दोसिद्यावापृथिवीभ्यान्त्वापरिगृह्णाम्यन्तरिक्षेणोपयच्छा
मि॥ इन्द्राश्विनामधुनःसारघस्यघर्म्मम्पातवसवोयजतवाट्॥ स्वाहासू
र्य्यस्यरश्मयेवृष्टिवनये॥ ६॥ समुद्रायत्वा॥ वातायस्वाहासरिरायत्वावा
तायस्वाहा॥ अनाधृष्यायत्वावातायस्वाहाप्रतिधृष्यायत्वावातायस्वाहा
॥ अवस्यवेत्वावातायस्वाहाशिमिदायत्वावातायस्वाहा॥ ७॥ इन्द्रायत्वा॥

संहि· वसुमतेरुद्रवतेस्वाहेन्द्रायत्वादित्यवतेस्वाहेन्द्रायत्वाभिमातिघ्नेस्वाहा उ·अ·
१८ ॥सवित्रेत्वऽऋभुमतेविभुमतेवाजवतेस्वाहाबृहस्पतयेत्वाविश्वदेव्या ३८
वतेस्वाहा॥८॥यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा॥स्वाहाघर्म्मायस्वाहा-
घर्म्मःपित्रे॥९॥विश्वाऽआशाः॥विश्वाऽआशादक्षिणसद्विश्वान्दे
वानयाडिह॥स्वाहाकृतस्यघर्म्मस्यमधोःपिबतमश्विना॥१०॥दिविधाः॥
दिविधाऽइमंयज्ञमिमंयज्ञन्दिविधाः॥स्वाहाग्नयेयज्ञियायशंयजुर्भ्यः॥ १८
११॥अश्विनाघर्म्मम्॥अश्विनाघर्म्मम्पातंहार्द्दानमहर्द्दिवाभिरूतिभिः

॥तन्त्रायिणेनमोद्यावापृथिवीभ्याम्॥१२॥अपातामश्विना॥घर्म्ममनुद्यावा
पृथिवीऽअमᳪंसाताम्॥इहैवरातयः सन्तु॥१३॥इषेपिन्वस्व॥इषेपिन्वस्वो
र्ज्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्वद्यावापृथिवीभ्यांपिन्वस्व॥धर्म्मा
सिसुधर्म्मामेन्यस्मेनृम्णानि॥धारयब्रह्मधारयक्षत्रंधारयविशन्धारय॥१४॥स्वा
हापूष्णे॥शरसेस्वाहाग्रावभ्यःस्वाहाप्रतिरवेभ्यः॥स्वाहापितृभ्यऽऊर्द्ध्वबर्हिर्भ्यो
घर्म्मपावभ्यःस्वाहाद्यावापृथिवीभ्याᳪंस्वाहाविश्वेभ्योदेवेभ्यः॥१५॥स्वाहारुद्राय
रुद्रहूतयेस्वाहासञ्ज्योतिषाज्ज्योतिः॥अहः केतुनाजुषताᳪंसुज्ज्योतिर्ज्ज्योतिषास्वा

हा॥रात्रिः॒केतुना॑जुषताꣳ॒सुज्ज्योति॒ज्ज्योति॑षा॒स्वाहा॑॥मधु॑हुतमिन्द्र॑तमेऽअ॒ग्नाव॒
श्याम॑तेदेवघर्म्म॒नम॑स्तेऽअस्तु॒मामा॑हिꣳ॑सीः॥१६॥अ॒भीमम्॥अ॒भीम॑-
र्म्महि॒मादिवं॒विप्प्रो॑बभूवस॒प्प्रथाः॑॥उ॒तश्श्रव॑सापृथि॒वीꣳसꣳसी॑दस्वम॒हाँ
२॥ऽअसि॒रोच॑स्वदेव॒वीत॑मः॥विधू॒मम॑ग्नेऽअरु॒षम्मि॑येद्ध्यसृ॒जप्प्र॑शस्तद
र्श॒तम्॥१७॥यातेघर्म्म॑दि॒व्याशु॒ग्ग्यागा॑य॒त्र्याꣳह॑वि॒र्द्धाने॑॥सात॒ऽआप्प्या
यता॒न्निष्ट्याय॑ता॒न्तस्यै॑ते॒स्वाहा॑॥यातेघ॒र्म्मान्तरि॑क्षे॒शुग्ग्या॑त्रि॒ष्टुब्भ्याग्नी॑ध्रे॥ ९९
सात॒ऽआप्प्याय॑ता॒न्निष्ट्याय॑ता॒न्तस्यै॑ते॒स्वाहा॑॥यातेघर्म्म॑पृथि॒व्याꣳशु॒ग्ग्या

जगत्याछंसदुस्स्या॥ सातुऽआप्प्यायताुन्निष्प्यायताुन्तस्यैंतेस्वाहा॥
१८॥ क्षुम्नस्यैत्वा॥पुरस्पोयुब्ब्रह्मणस्तुन्न्वृम्पाहि॥ ब्विशास्त्वाधर्म्मणाव्वय
मनुक्क्रामामसुुविताय्यनव्व्यसे॥१९॥चतुः स्रक्किर्न्नाभिः॥चतुः स्रक्कि-
र्न्नाभिर्र्ऋतस्यसुप्प्रथाःसनोव्विश्वायुःसप्प्रथाःसनः सर्व्वायुःसप्प्रथाः
॥अपद्वेषोऽअपह्वरोन्न्यव्व्रतस्यसश्चिम॥२०॥ घर्म्मैतत्॥घर्म्मैतत्तेपुरीषु
न्तेनुवर्द्धस्वचाचप्प्यायस्व॥व्वर्द्धिषीमहिचव्वुयमाचप्प्यासिषीमहि॥२१॥अ
चिक्क्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः॥सर्ठसूर्य्येणादिद्युतदुदधिर्न्निधीः

॥२२॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयः सन्तुदुर्मित्रिया
स्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः॥२३॥ उद्वयम्॥ उद्वयन्तम-
सस्परिस्वः पश्यन्तऽउत्तरम्॥ देवन्देवत्रासूर्यमगन्मज्ज्योतिरुत्तमम्॥
२४॥एधोसि॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि॥२५॥
यावतीद्यावापृथिवी॥यावच्चसप्तसिन्धवोवितस्थिरे॥ तावन्तमिन्द्रतेग्र
हमूर्ज्जागृह्णाम्यक्षितम्मयिगृह्णाम्यक्षितम्॥२६॥मयित्यत्॥ मयि
त्यदिन्द्रियम्बृहन्मयिदक्षोमयिक्रतुः॥घर्म्मस्त्रिशुग्विराजतिविराजाज्ज्यो

तिषासहब्रह्मणातेजसासह ॥२७॥ पयसोरेतः ॥ पयसोरेतऽआभृतन्त
स्यदोहमशीमह्युत्तरामुत्तराᳩसमाम् ॥ त्विषःसंवृक्क्रत्वेदक्षस्यतेसुषु–
म्णस्यतेसुषुम्णाग्निहुतः ॥ इन्द्रपीतस्यप्रजापतिभक्षितस्यमधुमत
ऽउपहूतऽउपहूतस्यभक्षयामि ॥२८॥ इतिअष्टत्रिंशोऽध्यायः ॥३८॥
स्वाहाप्राणेभ्यः ॥ स्वाहाप्राणेभ्यःसाधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्न
येस्वाहान्तरिक्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥१॥ दि
ग्भ्यःस्वाहा ॥ चन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहावरुणायस्वाहा

॥नाभ्यैस्वाहा भूतायस्वाहा ॥ २ ॥ वाचेस्वाहा ॥ प्राणायस्वाहा ॥ प्राणा
यस्वाहा चक्षुषेस्वाहा चक्षुषेस्वाहा ॥ श्रोत्रायस्वाहा श्रोत्रायस्वाहा ॥ ३
॥ मनसः कामम् ॥ मनसः काममाकूतिंवाचꣳसत्यमशीय ॥ पशूनाꣳरूप
मन्नस्यरसोयशः श्रीः श्रयतांमयिस्वाहा ॥ ४ ॥ प्रजापतिः सम्भ्रियमा
णः सम्राड्सम्भृतोवैश्वदेवः संसन्नोघर्म्मः प्रवृक्तस्तेजउद्यतआ
श्विनः पयस्यानीयमानेपौष्णोविष्यन्दमानेमारुतः क्लथन् ॥ मैत्रः शा १०१
रसिसन्ताय्यमानेवायव्योह्रियमाणआग्नेयोहूयमानोवाग्घुतः ॥ ५ ॥

सविताप्प्रथमे ॥ हन्नग्निर्द्द्वितीयेव्वायुस्तृतीयऽआदित्यश्चतुर्थेचन्द्रमाः

पञ्चमऽऋतुः षष्ठेमरुतः सप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेवरुणो-

दशमइन्द्रऽएकादशोविश्वेदेवा द्वादशे ॥ ६ ॥ उग्ग्रश्च ॥ भीमश्च ध्वान्त-

श्चधुनिश्च ॥ सासह्वांश्चाभियुग्वाचविक्षिपः स्वाहा ॥ ७ ॥ अग्निꣳ हृ

दयेन ॥ अग्निꣳ हृदयेनाशनिꣳ हृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवं-

यक्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तः पर्शव्येनोग्ग्र

न्देवंव्वनिष्ठुनाव्वसिष्ठहनुः शिङ्गीनिकोश्याभ्याम् ॥ ८ ॥ उग्ग्रंल्लोहितेन ॥

मित्रꣳ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा॥ भवस्य क
ण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत्॥९॥ लोम
भ्यः स्वाहा॥ लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय
स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा॥ माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वा
हा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः
स्वाहा मज्जभ्यः स्वाहा॥ रेतसे स्वाहा पायवे स्वाहा॥१०॥ आयासाय स्वाहा
॥ प्रायासाय स्वाहा संय्यासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा॥

॥श्रुचे स्वाहा॥ शोचते स्वाहा॥ शोचमानाय स्वाहा॥ शोकाय स्वाहा॥ ११ ॥ तपसे स्वाहा॥ तप्यते स्वाहा॥ तप्यमानाय स्वाहा॥ तप्ताय स्वाहा॥ घर्माय स्वाहा॥ निष्कृत्यै स्वाहा॥ प्रायश्चित्यै स्वाहा॥ भेषजाय स्वाहा॥ १२ ॥ यमाय स्वाहा॥ यमाय स्वाहान्तकाय स्वाहा॥ मृत्यवे स्वाहा॥ ब्रह्मणे स्वाहा॥ ब्रह्महत्यायै स्वाहा॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ द्यावापृथिवीभ्याꣳ स्वाहा॥ इति एकोनचत्वारिꣳशोऽध्यायः॥ ३९॥ ईशावास्यम्॥ ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत॥ तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्वि-

संहि न्हूनम् ॥ १ ॥ कुर्वन्नेव ॥ कुर्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः ॥ एव- उ·अ·
१०३ न्त्वयिनान्यथेतोस्तिनकर्म्मलिप्प्यतेनरे ॥ २ ॥ असुर्य्यानाम ॥ असुर्य्याना ४०
मतेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्प्रेत्यापिगच्छन्तियेकेचात्महनो-
जनाः ॥ ३ ॥ अनेजदेकम् ॥ अनेजदेकम्मनसोजवीयोनैनद्देवाऽ आप्नुव-
न्पूर्व्वमर्शत् ॥ तद्धावतोन्न्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्श्वादधाति ॥
॥ ४ ॥ तदेजति ॥ तदेजतितन्नैजतितद्दूरेतद्वन्तिके ॥ तदन्तरस्यसर्व्वस्यतदुसर्व्व १०३
स्यास्यबाह्यतः ॥ ५ ॥ यस्तु ॥ सर्व्वाणिभूतान्न्यात्मन्नेवानुपश्श्यति ॥

सर्व्वभूतेषु चात्मानन्ततो न विचिकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणि ॥ भू
तान्यात्मैवाभूद्विजानतः ॥ तत्र को मोहः कश्शोक एकत्वमनुपश्यतः
॥ ७ ॥ सपरि ॥ सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्
॥ कविर्म्मनीषी परिभूः स्वयम्भूर्य्याथातथ्यतोऽर्त्थान्व्यदधाच्छाश्वती-
भ्यः समाभ्यः ॥ ८ ॥ अन्धतमः ॥ प्रविशन्ति येसम्भूतिमुपासते ॥ ततो भू
यऽइव ते तमो यऽउसम्भूत्याꣳ रताः ॥ ९ ॥ अन्यदेव ॥ अन्यदेवाहुः सम्भ
वादन्यदाहुरसम्भवात् ॥ इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

संहि ॥सम्भूतिञ्च॥ विनाशञ्चयस्तद्वेदोभयꣳसह॥ विनाशेनमृत्युन्तीर्त्वा उ॰अ॰
१०४ सम्भूत्यामृतमश्नुते॥ ११ ॥अन्धतमः॥ अन्धतमःप्रविशन्तियेविद्यामु ४०
पासते॥ ततोभूयऽइवतेतमोयऽउविद्यायाꣳरताः॥ १२ ॥अन्यदेव॥ अ
न्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः॥ इतिशुश्रुमधीराणाꣳयेनस्त
द्विचचक्षिरे॥ १३ ॥विद्याञ्च॥ विद्याञ्चाविद्याञ्चयस्तद्वेदोभयꣳसह॥
अविद्ययामृत्युन्तीर्त्वाविद्ययामृतमश्नुते॥ १४ ॥वायुरनिलम्॥ वायुरनिल १०४
ममृतमथेदम्भस्मान्तꣳशरीरम्॥ ओ३म्॥ क्रतोस्मर॥ क्लिबेस्मर ॥ क्र

तꣳ स्म्मर ॥ १५ ॥ अग्ग्नेनय ॥ सुपथाराय ऽ अस्म्मान्विश्श्वानिदेववयु
नानिविद्द्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनम ऽ उक्तिम्विधेम ॥ १६ ॥ हिरण्मयेनपात्रेण ॥ सत्यस्यापिहितम्मुखम् ॥ योसावादि
त्ये पुरुषः सोसावहम् ॥ १७ ॥ ॐ ३म् ॥ खम्ब्रह्म ॥ ॥ इतिवाजसनेयसꣳहितायान्दीर्घपाठेचत्वारिꣳशत्तमो ऽ ध्यायः ॥ ४० ॥ ॥ ॥

॥ ॥ श्रीमज्जगदीश्वरार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥

इदं पुस्तकं मुंबय्यां श्रीकृष्णात्मजेन गंगाविष्णुना "बॉम्बे सिटी प्रेस"
यंत्रालये मुद्रापितम्. संवत् १९४५.

यह पुस्तक गंगाविष्णु श्रीकृष्णदासके पास मिलेगा.
ठिकाणा- श्रीवेंकटेश्वर प्रेस, मुंबादेवी बजार,
मुंबई.

ग्रंथानुक्रम.

१ यजुर्वेदीयसंहिता, २ प्रतिज्ञासूत्र, ३ याज्ञवल्क्यशिक्षा,
४ अनुवाकसूत्र, ५ सर्वानुक्रम.

गंगाविष्णु श्रीकृष्णदास.
श्रीवेंकटेश्वरछापखाना मुंबई.

BOMBAY.

इति शुक्लयजुर्वेदमाध्यंदिनीयसंहिता स०